नं० ४५२१-घ

आश्वलायनसूत्रप्रयोगदीपिका

नं० ४५२१-घ

पत्राणि १८५

4521

F 185

२८५ पन्ना

नं० ४५२१-घ
आश्वालायन सूत्र प्रयोग दीपिका
पत्राणि १८५

[illegible]

[illegible]

सं॰ रि॰

१

॥श्री गणेशाय नमः॥ श्री गणेशाम्बिकाभ्यो नमः॥ यस्य फो चि विधेर्यं शौरी उपलेचि वि
धाभिधुः॥ तस्मै नमः कतुनुजो विघ्ल वेगमुविद्ध वे॥१॥ आश्वलायनसूत्रस्य प्रयोगस्य
गृह्यदीपिका॥ क्रियते मे वनार्येण वृत्तिकारानुसारतः॥२॥ अथैतस्य समाम्नायस्य विता
ने योगान् पद्धिं वक्ष्यामः॥ तत्र प्रथमसमन्याधेयस्यैव प्रयोगो वक्तव्यः॥ इत्यादि ष्टिश्च वि त्वा
५ नापेक्षितत्वात्तै दैष्टिकविधयः॥ धत्तैतस्य दर्शपूर्णमासयोराम्नातत्वात्॥ तत्र आरब्धानन्तरेणनाधानमिति दर्शपूर्ण
मासावेव प्रथमं प्रदर्शयति॥ अथ दर्शपूर्णमासयोः कर्मणोर्हविष्युवाहे ब्यासादित्येषु
होतान्वाहूतः॥ गार्हपत्यादाहवनीयाद्वस्थाय प्राङ्मुखो भूत्वा प्रयोगांगं यज्ञोपवीतं कृ २
त्वा ततो निष्क्रम्योपविश्य प्राङ्मुखः प्रयोगांगं स्मृतिविधानेनाचमनं कृत्वा दक्षिणे
नांसेनादस्य प्रणयनयोर्विहृतान्तर्दक्षिणांगमितिवाति॥ अथ यदि देवतोपास्या तासामनु

पूर्वैरु[illegible]श्चैरूपांश्रुतांश्च॥ यजमानप्रवरनक्षत्रनामधेयानि इत्यनेन गन्धेन देवतादीनध्व
र्युः पृष्ट्वा। अध्वर्युस्ते देवतादीन् वृणुयात्। प्रणीतोत्करावेतरेण। अथ प्रासंगिकमुच्यते। प्रणी
ते कर्मणि दृष्ट्वा अपरेणोत्करं पूर्वेण प्रपद्यते॥ चात्वालवत्सु कर्मसु चात्वालमपरेणोत्करं पू
र्वेण प्रपद्यते। एतदेतच्चात्वालोत्करान्तरं तीर्थमिति विद्वांस आचार्याः। एतेन यो विहारं प्रपद्यते होता वान्यो वा
तस्याविहितः श्वेष्टास्तानियमेन गच्छो भवति। तस्यापस्य धारणा च नित्या भवति। तस्य
यज्ञोपवीतत्वं चेन्नित्यं भवतः। तस्य विहारदेशादन्यत्र नित्यं भवति। तत्र चेत्कर्म वर्तते य
त्रैकत्रान्तीयां गवचनं भवति। यथा प्रपदेन बर्हिराक्रमेति। तथा गुरुस्थगताणि अवृक्षव्यति।
तत्र दक्षिणमङ्गं जानीयात्। अन्यादेशे च। एतदुक्तं भवति। यत्रांगस्यादेशो नास्ति कर्मचो
दनं चोद्यते। यथैन्द्रवायवमुत्तरे धे गृहीत्वेति तत्रापि दक्षिणमेवांगं प्रतीयात्। कर्त्रा दे

मं० टि०

२ ञो होतारं कर्त्तारं प्रतीयात्॥ तत्र संशयः॥ किमेषा परिभाषा होतारं प्रापयति। उत नियम
यतीति। तत्राद्यपक्षे अरण्याहरण पिंडपितृयज्ञसमारोपणादिषु होतुः कर्तृत्वं प्राप्नोति। न
प्रसंगेक ल्ले चेष्यते। अतो नेककर्तृके चेरोषमनादिस्य होतारं कर्त्तारं प्रतीयादिति नियामकमेतत्सूत्रं गम्या
ह्यां॥ कर्मनादेशो ददातीति कर्मचोदनायां यजमानं कर्त्तारं प्रतीयात्॥ तत्र संशयः। किं ददाति
2 शब्दो विवक्षितस्तदर्थो वेति। तत्र ददातिशब्दविवक्षापक्षे चतुरवत्तमोदनं ब्राह्मणान्भो
जयेदित्यादौ यजमानस्य कर्तृत्वं न प्राप्नोति। इष्यते चातः समाचनेऽव्यो द्देशेन स्वसत्तानिवृत्ति
पदार्थचोदनायां यजमानं प्रतीयादिति सूत्रार्थः। कर्मनादेशो प्रायश्चित्ते धिकृते जुहोति २
जपतीति कर्मचोदनायां ब्रह्माणं कर्त्तारं प्रतीयात्। पादेन हीने ऋचं प्रतीयात्। सूक्तादौ
हीने पादेन हीने सूक्तं प्रतीयात्। सूक्तादाव सूक्तादावप्यधिके पादेन हीने तच्चं प्रतीयात्।

जपः अनुमंत्रणं आप्यायनं उपस्थानं एतान्युपांशु भवंति। येमंत्राः कर्म[illegible]करणाः अद्रिर्मीतेसा ति
दयस्तेप्युपांशुर्भवंति। बहुविषया हि घोरत्वविषयो विधिर्बलीयान्भवति। इतिप्रासंगिकं। अ
थप्रयोगः। अग्रेण हृत्तरेण पादेन गत्वा। उत्तरस्यां वेदिश्रोण्यां दक्षिणं पार्ष्णिं समानिधाय
प्रपदेन बहिराक्रम्य विरलांगुलिके पाणी धारयेत्। हृदयसंमितं कसंमितौ वा कृत्वा। द्या
वापृथिव्योः संधिमीक्षमाणः स्थित्वा। अग्नये समिध्यमानायानुब्रूहीति प्रैषे कृते। नमः प्रवृ
क्त इत्यादिकं मंत्रं तदर्धवाच इत्येतामृचं जपति। प्रपद्येहमेवमामित्यवसाय स्वनामादिरोजवि
वृत्रार्भेण मिलितव देवत्। मूलेभ पिप्पलीसादिवानोअत्रांलिवहेति अंगुल्या ण्यवकृष्य। उत्त
तवेदो रमया पश्रृन्मयीति संदष्टान्। वर्ममे द्यावापृथिवी वर्माग्निर्वर्म सूर्य इत्यादि तदर्ध
वाचः प्रथमं मंत्रीये त्येतामृचं समाप्य। अभिहिंकृत्य सामिधेनीरन्वाह हिं ३ इत्यादिना उक्तैः

मं०द्वि०

२

स्वरेण हिंकृत्य भूर्भुवस्वरोमिति जपति। अस्याभिहिंकार इति संज्ञा। कौत्सस्तु भूर्भुवस्वरि
त्येवाह। अभिहिंकारात्पूर्वं जपं न जपति। प्र वो वाजा अभिद्यव इत्येका। अग्न आयाहि वीतय
इति तिस्रः। ईळेन्यो नमस्य इति तिस्रः। अग्निं दूतं वृणीमह इत्येका। समिध्यमानो अध्व
र इत्येका। समिद्धो अग्न आहुतेति द्वा इत्येकादश। आद्योत्तमयोस्त्रिरभ्यासा संचदश भ
वेति। आद्योत्तमे अर्धर्चकारं ब्रूयात्। तद्यथा। प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या
देवाञ्जिगाति सुम्नयों ३ प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या देवाञ्जिगाति सुम्नयों ३
प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या देवाञ्जिगाति सुम्नयो ३ म् अग्न आयाहि वीतये गृ ३
णानो हव्यदातये। नि होता सत्सि। एवमुत्तरयोः। एतत्र्यृचः एकः ऋतिसंततमनुब्रूयात्॥२॥ २
नि उदात्तानुदात्तः स्वरितानां परः संकर्षः एकश्रुत्यं स्वरादि मङ्गलमोकारं त्रिमात्रं मकारां

तं कृत्वोत्तरस्या अर्धर्चैव स्रोत्स्ना । तत्संततो । एवं शास्त्रादिषु ब्रूयात् ॥ अर्ध्वर्द्ध ईकारवर्जं । तासामुत्तमेन
प्रणवेनाग्ने महां असीति निगदशेषमुपसंतत्य ब्राह्मण भारतेत्यवसाय । यजमानस्यार्षेयानावरं
प्रवर्णीत । आंगिरस बार्हस्पत्य भारद्वाजेति । देवेद्धो मन्विद्ध इत्यादि निगदशेषमनुब्रूयात् । हव्यवा
डित्यवसाने । आवह देवान्यजमानायेत्यवसाय देवता आवाहयति द्वितीययाभिमन्त्र्य । देवता
मादिस्यत्वकारं प्लुतं कुर्वन्न् आवहेत्यावाहयति । प्रथमदेवताया अग्नेर् आवहेति विशेषः । अथ देव
ता क्रम उच्यते । अग्निश्च सोमश्चाज्यभागदेवते उभयत्र । अग्निरग्नीषोमौ प्रधानदेवते । अ
न्ययोर्मध्ये प्रजापतिर्वा विष्णुर्वा उपांश्वयाजः कर्तव्यः । इंद्रो वे मध्योप्यनुनिर्वाप्य एते पौर्णमा
स्यां । असन्नयतस्त्वग्नीषोमीयं तानि । अमावास्यायां तु अग्निरिंद्राग्नी प्रधानदेवते । असन्नय
तः । सन्नयतस्त्विंद्रो ग्नेयः स्थाने इंद्रो महेंद्रो योरन्यतरः । एवं प्रधानदेवता आवाह्य । देवां आज्य
पां आवहेति प्रयाजानुयाजदेवता आवाहनं । अग्निं होत्रायावह स्वं महिमानमावहेति स्विष्ट

४ देवसवितारेतिप्रवदणानमध्वर्युमनुमंत्रयेत् ॥ ८ ॥

४ कृद्दा वाहनो । अग्ने जातवेदः सुयजा यज इति निगदं जपेदुत्क्रान्ते चोर्ध्वजानुरुपविशेत् ॥ ९ ॥ दक्षि
णे सुहस्तस्तृणानि भूमौ प्रादेशं कुर्यात् ॥ अदितिर्मातेति मंत्रेण । आश्रावय यज्ञमिति मंत्रेण आश्रा
वयिष्यन्तमनुमंत्रयेत् ॥ मानुषः स्वः सख्ये कृत्वा ॥ उदायुषेत्युत्तिष्ठेत् ॥ उत्थाय यच्छ हविष्यां ध्वर्यवे इति मंत्र
५ मुक्त्वा ऋतस्य पंथामिति समभिक्रम्य । इदमन्तारभामह इति पार्श्वे स्वपाणिभ्यां अध्वर्युमाग्नीध्रं
च अंसयोरभिमृश्य । संमार्जीमीति संमार्गैस्तृणैः स्थिरंभ्यासं संमृज्जीत । सकृन्मंत्रेण द्विस्तूष्णीं
सृष्ट्वादकं । होतृषदनस्य पश्चाद्वस्थाय । अहे दैधिषव्य इति होतृषदनमभिमंत्र्य । अंगुष्ठोपक
निष्ठिकाभ्यां होतृषदनात्तृणं गृहीत्वा प्रसव्य दक्षिणायां दिशि निरस्येत् । निरस्तः परावसुरिति
सृष्ट्वादकं । इदमहमर्वाग्वसोः सदने सीदामीति । दक्षिणोत्तरिणोपस्थेन । वामोरूपरि दक्षि ४
णपादे संस्थाप्येतेत्युपस्थो भवति । एतावद्युनेतरुपस्थेनोपविश्य देव बर्हिरिति जपं तु ॥ १० ॥ अ
भिहिषहोतरिति जानुशिरसा बर्हिरुपस्पृश्य । भूपतये नम इत्यादिकं मंत्रशेषं जपेत् ॥ अथ

मदीमहद्धे। ॐ अग्निर्होता त्यनेन निगदेन स्रुचावाघारयेत्। योऽग्निर्मिस्य वृसाय। होता
रमवथा इति जपित्वा। घृतवतीमध्वर्यो इति ब्रूयात्। अथ पंचप्रयाजान्यजेत्। सर्वत्रानुया
जवर्जितानां यज्ञानामादावाघारभं वृति। ॐ लेवषड्कारेनुयाजसहितानां। येयुजाम
हइस्याग्नवौ षाळिति वषट्कारः। तयोरादिस्वरयो मो ओति वृद्धिः कार्या। याज्यांतवर्त
मानानां संध्यक्षराणां उकारं विवृत्य प्लावयेत्। प्रगृह्याणि चेत्स्वरूपेणैव प्लुतिः। व्यंजनांतो
वानचेद्यास्यांतः। यथा उेषश्च मंत्रो विश्वचर्षणा ३ इवौ। ऐकारस्योदाहरणं। इंदुं समस्य
न्नीतये समस्मा ३ इवौ। ओकारस्योदाहरणं। कविः कविमियक्षसि प्रययआ ३ उवौ। ओको
रस्यसहस्रस्थूणं बिभर्षः सहद्रा उवौ। विसर्जनीयोऽवर्णवर्जस्वरोपधो रेफमापद्यते। यथात्र
नोनवेभिस्तिरतं देक्षुवौ। अनाप्तुपधोपि विसर्जनीयो रिफितो यदि रेफ[illegible]प्रकृतिकोभव
ति। स एव चेद्दृफीत थासलिलुप्यते। उभयत्रोदाहरणे यथाक्रमं। सरस्वतिलमिह धालुवेकार
वौ। युक्तगावाजायतेदेवकामा ३ वौ। इति वर्गप्रथमस्य वर्गतृतीयमापद्यते। यथा सवेद्य

५ ऽस्मानुषाइत्येवौषट्॥ मकारे या ऽयांतेयस्मागुरुक्तेऽन्तस्यामनुनासिकामापद्यत इति॥ यथा
जिह्वामग्ने चकृषे हव्यवाहां३ वौषट्॥ ये३ यजामहे समिधः समिधो अग्न आज्यस्य व्यं
तु३ वौषट्॥ एवं सर्वत्र द्रष्टव्यं॥ वागोजरति सर्वत्र वषट्कारानुमंत्रणं॥ वसिष्ठ शुनक अत्रि
वृ भृगु वराजन्य वाभिरिकानां तनूनपादग्न आज्यस्य वेत्विति द्वितीयः॥ तेषां तु नराशंसो
अग्न आज्यस्य वेत्विति द्वितीयः॥ इडो अग्न आज्यस्य व्यंत्विति तृतीयः॥ बर्हिरग्न आ
ज्यस्य वेत्विति चतुर्थः॥ आग्नेयं स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा प्रजापतिं स्वा
हा विष्णुं स्वाहाग्नीषोमौ स्वाहेंद्रं वैमृधं स्वाहा देवा आज्यपा इत्यादि पौर्णमासं॥ सर्वत्रो ५
पांशु संबंधिनि आघ इत्स्वाहा याद्भिर्या धामानीदं हविर्महो ज्याय इत्येषां नैपदानां तं
त्र स्वर एव॥ तंत्र स्वराण्युपांशु रुद्रानीति वचनात्॥ स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं
स्वाहा विष्णुं प्रजापतिमिन्द्र पांशु स्वाहेंद्राग्नी स्वाहा देवा इत्यादि अमावास्यायाम सन्न

यतः। सञ्जयतस्त इदं अमहेंद्र योरन्यतरत्। एवमन्यत्रापि। पंचमे प्रयाजे आवाहनक्र
मेणैव स्वाहाकारयुक्तां देवतां द्वितीयया विभक्त्यानुद्रुत्य यजेत्। सामिधेनी प्रभृति
ग पंचमप्रयाजप्रभृति पर्यंतं मंद्रस्वरेण। आज्यभागौ मध्यमस्वरेण। प्रधानहवींषि म
ध्यमस्वरेण। स्विष्टकृन्मध्यमेनोत्तमेन वा। इडादि शंयुवाकांतमुत्तमेन। शंयुवाका
दूर्ध्वं मासमाप्तेर्मंद्रेण स्वरेण। एष तंत्रस्वरः। अथाज्यभागौ। अग्निर्वृत्राणि जंघनत्त्वं
सोमासि सत्पतिरिति अनुवाक्ये पौर्णमास्यां वार्त्रघ्नौ। अग्निः प्रत्नेन मन्मना सोमगी
र्भिष्ट्वा वयमिति विवृधन्वंतावमावास्यायां। जुषाणो अग्निराज्यस्य वेत्वित्यग्नेर्याज्या। जुषा
णः सोम आज्यस्य हविषो वेत्विति सोमस्य। आगूर्यं द्वितीयया विभक्त्या देवतामादिश्य
याज्यया संधाय यजेत्। यथा। ये ३ यजामहे अग्निं जुषाणो। अग्निराज्यस्य वेतु ३ वौषट्
इति। एवं सर्वत्र याज्यासु द्रष्टव्यं। अनुवाक्यारहितानां अप्रैषाणां अन्वाया स्यौरल नां

मं०टी०
६
6
स्मिन्नेवासने वैश्वानरीयस्य यजतीति या वैश्वानरीयेष्टिः॥ पत्नीसंयाजेष्ववरिता
वभृथं व्रजंतीत्यत्र ये पत्नीसंयाजा एतन्मध्यवर्ति सोमिकानां चारदेशेन कर्त
व्यः॥ आदेशप्रभृत्येतदंतं वाग्यमनं॥ इत उर्ध्वमपि याज्यानुवाक्ययोरंतरा च प्रमा
दाद्वाग्यमनभंगे इदं विष्णुरित्यृचं जपेत्॥ ततो देवाअवंतु नइति वाजपेत॥ अथ प्रधा
नयागः॥ अग्निर्मूर्धा भुवोय त्वस्येत्यग्नेर्याज्यानुवाक्ये॥ प्रजापते नत्वदेतान्यन्य
स्त्व वेमेलोकाः प्रदिशो दिशश्चेति प्रजापतेः विष्णोः॥ इदं विष्णुर्विचक्रमे त्रिर्देवः पृ
थिवीमेष एतामितिउपांशुनामागः प्रणव वषट्काराउच्चैर्भवंति। प्राणसंतता ६
च याज्यानुवाक्याभ्यां॥ अग्नीषोमा सवेदसा युवमेतानि इत्यग्नीषोमयोः॥ विनइंद्र
मृधो जहि मृगो न भीमः कुचरो गिरिष्ठा इतीद्रस्य वैमृधस्य॥ [illegible]

इंद्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमान इति इंद्राग्न्योः॥ ऐंद्र सानसिं रयिं प्रस
साहिषे पुरुहूत शत्रून्निति इंद्रस्य॥ महाँऽइंद्रो यऽओजसानुवस्त्वमिंद्र ब्रह्मणा महानिति
महेंद्रस्य॥ यद्य अग्नीषोमीय उपांशुयाजः॥ अग्नीषोमा यो अद्य वामान्यं दिवो मातरिश्वा
जभारेति याज्यानुवाक्ये॥ अथ स्विष्टकृतः॥ पिप्रीहि देवाँ इति अनुवाक्या॥ ये ३ यजाम
हेऽग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाडग्नेः
प्रिया धामान्ययाट् प्रजापतेः विष्णोरुपांशु प्रिया धामान्ययाडग्नीषोमयोः
प्रिया धामान्ययाडिंद्रस्य वैमृधस्य प्रिया धामान्ययाड् देवानामाज्यपानां प्रिया धा
मानीत्सादि जुषतां हविरग्ने यद् अद्य विशो अध्वरस्य होत नवान यजति प्रकृत्या वा॥ प्रकृ
ति पक्षे वैकृतं हि यज्वेत्यनवसानमृचैव पौर्णमास्यां॥ अमावास्यायां तु॥ ये ३ यजामहे

मं० टी० ग्निंस्विष्टतमयाऽऽग्निरग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामान्ययाऽग्नेः प्रियाधामा
७ न्ययाट् विष्णोः प्रियाधामान्ययाडिंद्राग्न्योः प्रियाधामान्ययाड् देवानामाज्यपानां प्रिया
धामानि। यक्षदग्नेर्होतुरित्यादि पूर्ववत्। सन्नयतस्तु इंद्राग्न्योस्थाने इंद्रमहेंद्रतयोरन्यत
रः। एवमन्यत्रापि। ये३ यजामहेऽग्निं स्विष्टकृतमयाऽऽग्निरग्नेः प्रियाधामान्ययाडित्युक्त्वा
आवाहनक्रमेणैव षष्ठ्या विभक्त्या देवता अनुकृत्य प्रियाधामान्ययाट् शब्देनोपसंतत्य
देवानामाज्यपानामित्यादि। प्रदेशिन्याः पर्वणी उत्तमे अध्वर्युणा अंजयित्वा वाचस्प
तिनेत्युत्तरपर्वलेपमुत्तरे ओष्ठे अभ्यात्मं निमार्ष्टि। मनसस्पतिनेत्यधरपर्वलेपमध
रोष्ठे निमार्ष्टि स्पृष्ट्वोदकं। अंजलिनेडां प्रतिगृह्य सव्ये पाणौ निधाय इडायाः पश्चाद्द ७
क्षिणपाणिमुत्तानांगुलिं निधाय अंगुल्यंगुष्ठयोर्मध्येनांतरेणामध्वर्युंपावदापयो

ता। पुनस्तेनैव मार्गेणाद्वितीयं स्त्रुच मादाय। अंगुष्ठेनोपसंगृह्यांगुलीर मुष्टिं कृत्वा। अ
वांतरेडासहितेन दक्षिणपाणिना दक्षिणातइडां प्रति गृह्य। आस्यसंमिता नासिकासं
मिता वा धारयन्नुपह्वयते। इडोपहूतेत्यादि तस्मिन्नुपहूतइत्यंतं। तत्र इडा हविष्किरूय ता
मित्यंतमुपांशु शेषमुच्चैरुपह्वय तीर्थेन निष्क्रम्य। इडे भागं जुषस्व नइत्यवांतरेडां प्राश्य।
तूष्णीमिडाप्राशनं च कृत्वा चम्य तीर्थेन प्रविश्य। वेदिपरिस्तरणे रंजलिमंतर्धायके न
चित्सह कारिणा। अप आसेचयित्वा मार्जयेत। पृथिवी भागासीति चतुर्थाकरणं। ततः क
स्इदं कस्माअदात्। इत्यन्वाहार्याभिमर्शनं। कइदं कस्माअदादित्यस्य सोमप्रकरणे भिधा
नात्। प्राक्सोमात् तूष्णीमिति केचित्। अथानुयाजास्त्रय एकैकं प्रेषितो यजति नाग्रूः॥
देवं बर्हिः। देवो नराशंसः। देवो अग्निः स्विष्टकृद्दनवानं यजति प्रकृत्या वा। प्रकृति पक्षे अम

मं०टी० स्तेत्यवसानं। प्रेषितः सूक्तवाकं ब्रूयात्। इदं द्यावापृथिवी इत्यादि नमो देवेभ्य इत्यन्तं। तयोरा
८ विदीत्यवसाय। आवाहनक्रमेणैव प्रथमया विभक्त्या देवतामादिश्य इदं हविरजुषतावीवृ
8 धत महोज्यायोऽकृतेत्येकपसं तनुयात्। द्वित्वे हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातां। बहु
त्वे हविरजुषन्तावीवृधन्त महोज्यायोऽक्रतेति ऊहः। अग्निरिदं हविः। सोम इदं हविः। अग्नि
५ उपांशु रिदं हविः। प्रजापतिः इदं हविः। विष्णुः इदं हविरित्युच्चैः। अग्नीषोमाविदं जुषेतामवी
वृधेतां महोज्यायोऽक्रातां। इन्द्रो वैमृध इदं हविः। इति पौर्णमास्यां। अग्निरिदं हविः। सोम इ
दं हविः। अग्निरिदं हविः। विष्णुरिदं हविरित्युपांशु। इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां
महोज्यायोऽक्रातां। इति अमावास्यामसंनयतः। संनयतस्त्वैन्द्राग्नस्य स्थाने। इन्द्र इदं ह ८
विः। महेन्द्र इदं हविरिति वा। देवा आज्यपा इत्यादि यथापठितमेव ब्रूयात्। अयं यज

मानइत्यवसाय।यजमानस्यद्वेनामनी आदिशति।व्यावहारिकं नक्षत्रनाम च।यत्नेश्वर
शर्मा रौहिणः।आयुराशास्त्वइत्यादि।नक्षत्रनामग्रहणप्रकारउच्यते।कार्तिकः।कृत्तिका
रौहिणः।मार्गशीर्षः।आर्द्रकः।पुनर्वसुः।पुष्यस्तिष्यइतिवा।आश्लेषः।माघः।फल्गुनः।चै
त्रः।स्वातिः।वैशाखः।अनुराधः।ज्येष्ठः।मूलकः।आषाढः।श्रवणः।श्रावणइतिवा।ध
निष्ठः।शतभिषजः।शतभिषग्वा।पूर्वप्रोष्ठपादः।उत्तराप्रोष्ठपादः।रैवतः।आश्वयु
जः।अश्वयुक्इतिवा।तथाचोक्तं।रोरेममज्येचित्युत्तषिरादौ छं त्से च वात्सश्रवणाश्व
युक्ताश्लेषपुनाम्वेकः पर स्वरोत्यः स्वघोरदीर्घः।सविसर्गइष्टः।शंसुवाकायसंप्रेषित
स्तच्छंयोरावृणीमहइत्याहानुवाक्यावद्भूयात्सपावरहिता॥अथाध्वर्युर्वेदंप्रयच्छ
ति।तंवेदोसीतिमंत्रेणगृहीत्वा।उदायुषेत्येतेनोपोत्थायगार्हपत्यस्यपश्चादुपविश्य

मं०टी० पत्नीसंयाजान्यजति। तत्राध्वर्युप्रत्ययेन देवताक्रमः। सोमस्त्वष्टा राका सिनीवाली कुहूर्दे
९ वानां पत्नीरग्निर्गृहपतिः। तत्र राकाद्यास्तिस्रः काम्याः। इतरास्तु नित्याः। आप्यायस्व समे
तु ते सं ते पयांसि इति सोमस्य। इह त्वष्टारं तन्न स्तुरीपमिति त्वष्टुः। राकामहमिति द्वे राकायाः
। सिनीवालि पृथुष्टुक इति द्वे सिनीवाल्याः। कुहूमहमिति द्वे कल्पजे कुह्वाः। देवानां पत्नीरु
9 शतीरवन्तु न इति द्वे देवानां पत्नीनां। अग्निर्होता गृहपतिर्हव्यवाडग्निरित्यग्नेर्गृहपतेः। पू
र्ववत्स्वविजनादि। आज्यं पाणितले वेदाप्ययीत। पूर्ववद्दिव्ळामुपहूय तूष्णीं प्राश्याचम्य।
वेदं पत्न्यै प्रदाय वाचयेत्। वेदोसि वित्तिरसीत्यादिकामायत्वेत्यन्तं। पत्नी प्रजाकामा चेत्। वेद
शिरसा नाभिदेशमालभेत। अथ होता पत्न्या योक्त्रं प्रत्यामुञ्चामीत्यृचा विमुच्याद्भिर्युक्त्वा ह
त्वा गार्हपत्यस्य पश्चात्स्वाक्पाशं निधाय तस्योपरिष्टाद्वेदं विस्रस्य उदगग्रं निधाय वेदेन संश्लि

हं प्रोक्षणीपात्रं पुरो निधायाद्भिः पूरयित्वा। स्वयं पत्नी वाभिमन्त्र्य पत्नीं वाचयेत्। पूर्णमसीत्या
दि। अथ पूर्णपात्रात्प्रतिदिशमुदकं स्वयं पत्नी वा वपति। प्राच्यां दिशीत्यादयः। अथ पत्न्या उत्ता
नमञ्जलिमात्मनः सव्यमुत्तानहस्तं योक्त्रस्याधस्तान्निधायाभ्यात्मं पूर्णपात्रं निनयन्वाचये
त्। माहं प्रजामिति। पत्नी हि त्वेन्वा सर्वासां योक्त्राणि क्रमेण विमुच्य सर्वाणि सहैव हि द्विगुणी कृ
त्य योक्त्रविमोचने मन्त्रस्यावृत्तिः। पूर्णपात्राभिमर्शनवाचने। उक्षणनिनयनानि सर्वासां पृथ
ग्भवन्ति। अथ दक्षिणेन पाणिना वेदतृणान्यग्रे गृहीत्वा अविक्षन्वन्तं तन्तुं तन्वन्नित्यनेन सव्ये
२ वेदतृणानि न पाणिना संततं स्तृणन्गार्हपत्यादाहवनीयं गच्छेत्। शेषमन्तर्वेदि निधाय। प्रत्युदगाहवनी व
याद्वरत्न्यायरत्न्याः स्रुवेणाज्यमादाय सर्वप्रायश्चित्तानि जुहोति। अयाश्चेत्येका कल्पजा। अ
तो देवा इति द्वे। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वः स्वाहा। एवं समाहुतीर्जुहोति। प्रथमस्या

रग्निरस्यादेवता।द्वितीयस्यादेवादेवता।तृतीयस्याविष्णुर्देवता॥व्याहृतीनांव्यस्तानामग्निर्वा
युःसूर्यश्चयथाक्रमंसमस्तानांप्रजापतिः।अथओंचमेस्वरश्चमइतिसंस्थाजपेनाहवनीयमु
पस्थायतीर्थेननिष्क्रामेत्।एतावद्दर्शपूर्णमासयोर्हौत्रंकर्म।अथब्रह्मणइत्येवमादि।ब्रह्माक्र
मेंगमाचमनंकृत्वाहोतृवत्।तीर्थेनविहारंप्रपद्यसमस्तपापंप्रणुत्त्वाग्रेणाहवनीयंपरीत्य॥
आहवनीयस्यदक्षिणतोब्रह्मासनंभवति।तस्यदक्षिणतउदङ्मुखोब्रह्मासनात्पांहोतृ
वन्निरस्याआहवनीयमभिमुखहोतृवदुपविशति।उपविश्यजपति।बृहस्पतिर्ब्रह्मेत्येव
मादि।अथाध्वर्युराह।ब्रह्मन्नपःप्रणेष्यामीतिश्रुत्वा।अथब्रह्माभूर्भुवस्वर्बृहस्पतिप्रसूत
इतिजपित्वाओंप्रणयेस्यतिसृजेत्।प्रणवामुच्चैरूर्ध्वंवाप्रणवात्।अतऊर्ध्वंवाग्यतआस्ते। १०
आहविष्कृतउद्वासनात्।अन्यत्रहोतृवद्वाग्यमनं।ब्रह्मन्प्रोक्षिष्यामीतिश्रुत्वा।भूर्भुवस्वरि

त्येवमादि जपित्वा। ॐ प्रोक्षेत्युतिसृजेत्। परिग्रहीष्यामीतिकृत्वा। ॐ परिगृहाणेत्युतिसृजे
२ मेव त्। पुनरुत्तरे परिग्राहे एवं ब्रह्मन्निध्मं प्रोक्षिष्यामीतिकृत्वा भूरित्येवमादिजपित्वा। ॐ प्रोक्षे
त्युतिसृजेत्। बर्हिः प्रोक्षणे एवमेव ब्रह्मन्नप वरायाश्रावयिष्यामीतिकृत्वा भूरित्येवमादि
जपित्वा ओमाश्रावयेत्युतिसृजेत्। अथ प्राशित्रमानीयमानमीक्षते। मित्रस्य त्वेत्यनेन॥
प्राशित्रमंजलिना प्रतिगृह्य देवस्य त्वेत्यनेन कुशैः प्रागग्रं प्राशित्रहरणं निदधाति। अंगु पृथिव्यास्त्वे त्यनेन ५
ष्ठोपकनिष्ठिकाभ्यां गृहीत्वा निःक्रम्याग्नेष्ट्वास्येन प्राश्नामीत्यनेन प्राश्नाति दंतैरभिंदन्। आ
क्ष चम्य उदकं भूयेत्। सत्येन त्वेत्यनेन। पुनराचम्य इंद्रस्य त्वेत्यनेन नाभिमालभेत। प्रविश्य
विहारं प्रक्षाल्य प्राशित्रहरणं त्रिरनेनाभ्यात्मम पोनिनयेत्। इडां भक्षयित्वा हो त्ववन्मार्ज
यित्वा। अस्मिन्ब्रह्मभागं निदध्यात्। पश्चात्कुशेषु यजमानभागं निदध्यात्। अन्वाहार्यमवेक्षे

मं०उ० तां प्रजापतेर्भाग इत्यनेन। अन्वाहार्यार्थं गुष्टौ पक्वनिष्ठिकाभ्यां गृहीत्वा प्राणापानावित्यनेनाभि
११ मृशेन्नवप्राश्य। अथ दक्षिणाग्रहणं होतृवत् कृत्वा स्वकीयं भागं गृहीत्वा ब्रह्मभागेन निदध्यात्।
शिष्टं। ब्रह्मन् प्रस्थास्यामीति श्रुत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्ट इत्येवमादि जपित्वा ओं प्र
तिष्ठेत्यतिसृजेत्। संस्थिते कर्मणि ऋत्विजांश्च जघन्यः सर्वप्रायश्चित्तानि जुहुयात्। अयाश्चा
|| ग्न इत्येवमादिभिर्मन्त्रैर्होतृवत्। अथ संस्थाजपं ॐ च मह इत्येवमादि तीर्थेन निष्क्रम्य। नियमः।
इत्याश्वलायनप्रयोगदीपिकायां मंचनाचार्यविरचितायां प्रथमोऽध्यायः॥ ॥अथ पावमाने
ष्ट्यादयो द्वितीयाध्याये समाम्नाता इष्टयो वक्ष्यन्ते। तासां च दर्शपौर्णमासिकमेव तन्त्रं। दर्शपू
र्णमासाविष्टीनां प्रकृतिरिति वचनात्। आज्यभागौ तु सर्वत्र वार्त्रघ्नावेव। एतदभिप्रायेण ११
पौर्णमासेनेष्टिपशुसोमा उपदिष्टा इत्यक्रमाचार्येण तस्यायमर्थः। पौर्णमासेन कर्मणा इ

ध्यादयोव्याख्याताः। नदर्शने। एतदत्र फलति। वार्त्रघ्नावाज्यभागौभवतोनवृधन्वंताविति
॥ यत्तु जैमिनिनासान्नाय्यंतावत् द्रव्यत्वादित्यत्र पश्नोः सान्नाय्यविकारत्वमुक्तं। यतः यद्यपि
प्रकृतिभावनिर्णये द्रव्यसामान्यंदुर्बलमितिस्थितं तथापि। औपमानिकात् प्रत्यक्षं देव
व तासामान्यंबलवद्देवतस्मादाग्नीषोमीयपुरोडाशविकारत्वादुपपन्नं। वार्त्रघ्नावाज्यभागा
विति। इष्टिषुतुयत्रपौर्णमासप्रकृतत्वंन्यायतोवक्तुमशक्यंतत्राज्यभागयोर्वाचनिकत्वं
द्रष्टव्यं। सोमेअपूर्वेपिपौर्णमासातिदेशेकुर्वतस्तत्रवृत्तिकारस्यायमभिप्रायः। असमा
म्नानामिष्टीनांसोमेप्रयुज्यमानानांपौर्णमासमेवतंत्रंकार्यं। नाथोतंत्रेविकारइति। तौरि
ष्टिपशुसोमेरमावास्यायामेवयजेत। पौर्णमास्यामेववा। नप्रकृतिवत् द्व्यहकालतांका
२२ र्यं। एतदग्न्याधेयमंगहीनाश्रोत्रियस्य ... द्वर्जमिति। राजन्योमावास्यायांचपौर्णमास्यांच

मं०डी० अग्निहोत्रं जुहुयात्। अमावास्यापौर्णमास्यातोन्यत्र तप्रस्थिनेब्राह्मणायहोमद्रव्यमग्निहोत्र
१२ कालेदद्यात्। यस्तुराजन्योवाऽब्भनेस्सयोर्वाचएववायथार्थत्वप्रवर्तनक्षीणःस्वः। योवासोमया
जीभवतिसराजन्यःसदाग्निहोत्रंजुहुयात्। नामावास्यापौर्णमासयोरेव। अनेकेष्वर्थेष्व
नेकेषामर्थानामुपदेशेसतिप्रथमस्यप्रथमोद्वितीयस्याद्वितीयइत्यानंतर्ययोगोयात्र्यः
याज्यानुवाक्येतुएकैकस्यद्वेद्वेकृत्वाआनंतर्ययोगोयात्र्यः। अदृष्टादेशेचेद्याज्यानुवा
क्येततोनित्येभवतः। एतदुक्तंभवति। यत्रकर्मणिदेवतामुद्दिश्ययाज्यानुवाक्येस्वशा
स्त्रेनादिष्टे। तथाप्यध्वर्युशास्त्रेप्यादेशोनदृश्यते। तत्रकर्मणितस्यैदेवतायैयेस्मच्छा
स्त्रेप्रसिद्धेतेयाज्यानुवाक्येकर्तव्ये। अथाग्न्याधेयमुच्यते। तत्रकृत्तिकासुरोहिण्यांमृ १२
गशिरसिपूर्वोत्तरासुफाल्गुनीषुविशाखयोरुत्तरयोःप्रोष्ठपदयोःएतेषांसप्तानांनक्ष

त्राणां मध्ये कस्मिंश्चिद्वसंते पर्वणि ब्राह्मण आदधीत। यदि वसंते ऋतौ नक्षत्रपर्वणोः समु
च्चयो न लभ्यते। तदा एतेषां नक्षत्राणां मध्ये कस्मिंश्चिदादधीत पूर्वं तदपेक्षितव्यं। ग्रीष्मव
र्षाशरत्सु कालेषु क्षत्रियवैश्यरथकाराय यथाक्रममादधीरन्। नक्षत्रपर्वणि तु पूर्वव
त्। अथ वा यः कश्चिद्दतो यस्मिन्कस्मिंश्चिद्दतावादधीत नक्षत्रपर्वणी तु पूर्ववत्। सोमा
धानं कर्तुमिच्छन्। न ऋतुं प्रतीक्षेत। न नक्षत्रं प्रतीक्षेत। इत्याधानकालः। अश्वत्थाच्छमी
गर्भादरणी आहरेत्। यजमानः अनपेक्षमाणः। यो अश्वत्थ इति मंत्रेण। अत्र सूत्रे शमी
गर्भशब्दे संशयः। किं शम्या गर्भः शमीगर्भः। शम्या उपरि यो जात इत्यर्थः। एवं तत्पुरुषो वा
ग्राह्यः। उत शमी गर्भे यस्येति। शमी यस्योपरि जायत इत्यर्थः। एवं बहुव्रीहिर्वा ग्राह्य इति
अत्र तत्पुरुष एव ग्राह्यो न बहुव्रीहिः। शमीगर्भशब्दस्य अंतोदात्तस्य वेदे पाठात्। पूर्णा

मं॰डी॰ कृत्स्नंतमग्न्याधेयंभवति। इष्टयस्तु वैकल्पिकाः। तत्र यदीष्टिः। कुर्याद्ध्वर्यवः ततस्तदंतम
१२ ग्न्याधेयंभवति। अन्यथा तु पूर्णाकृत्स्नंतमग्न्याधेयं। केचित्पूर्णाकृत्स्नंतमग्न्याधेयमग्निहो
त्रहोमार्थमिच्छंति। नेतरकर्मार्थं। अन्यकर्मार्थे तस्मिन्निष्टयो नित्याभवंति। केचित्वाग्ने
यीमेवेष्टिंनित्यामिच्छंति। अन्या अनित्याः। अथ गार्हपत्यागारे अग्न्याधाने क्रियमाणे ब्र
13 ह्मणस्त्रानासनयोर्विकल्पः। तथारण्योः प्रदानकाले तथा ब्रह्मौदनश्रपणमाणकालेत
थाअजबंधनकालेतथाअरण्योः प्रदानकाले तथा समिदाधानकाले। अथ निरसनो
काले पवेशनेकृत्वाब्रह्मजपंजपति। ततआहवनीयाधानेदक्षिणतआहवनीयस्यनिरस
नोपवेशनेकृत्वाब्रह्मजपंजपित्वाआस्ते। आपूर्णाहुतिहोमात्। चेष्टाश्च मंत्राश्च स्त्रा १२
नासनयोर्विकल्पः। सर्वत्र स्त्रानासनंवा आकर्मणः परिसमाप्तेः। यदित्विष्टयस्तनुयुः॥

तत्र आवाहने विशेषः। आज्यभागावावाह्य। अग्निं आ ३ वह। अग्निं पवमान आ ३ वह॥
देवाँ आज्यपानित्यादि। पंचमे प्रयाजे। ये ३ स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहाग्निं पवमा
नं स्वाहा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ॥ आग्नेयस्य अग्निर्मूर्धेत्यनुवाक्या। याज्यायां
तु विशेषः अयमग्निः सहस्रिण इति याज्या। अग्न आयूंषि पवस इत्यग्नेः
पवमानस्य। अथ स्विष्टकृतः सहव्यवाळ्मर्त्य इत्यनुवाक्या। ये ३ यजामहेऽग्निं स्विष्टकृत
मयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाळग्नेः पवमानस्य
देवानामाज्यपा जुषतां हविरग्निर्होता पुरोहित इति याज्या। संयाज्ये इत्युक्ते स्विष्टयागसं कृ
बंधिन्यौ याज्यानुवाक्ये प्रतीयात्। सूक्तवाके। अग्निरिदं हविः। सोम इदं हविः। अग्निरिदं
हविः। अग्निः पवमान इदं हविः। देवा आज्यपा इत्यादि। अन्यद्वरुणानादिनिष्क्रमणांतं पौ

मं०टी० र्णमासेनव्याख्यातं।अन्यत्रापि।सर्वत्रदेवतागमेनित्यानामपायोयाः स्विष्टकृतमंतराज्यभागौ
१४ चतास्तस्थानएषसमानजातिधर्मः।तथादेवतायादेवतयोर्देवतानांवाआगमेसर्वासांप्रसि
ध्दानामपायोभवति।एतदुक्तंभवति।नित्यदेवताधर्मोलभंतइति।एषसमानजातिधर्मोविदि
14 तव्यः।एतदुक्तंभवति।यस्यप्राकृतस्यस्थानेवैकृतंतज्जातीयमागतंभवति।तद्वैकृतंप्राकृ
तधर्मकंवक्तव्यं।प्राकृतंत्वपनेतव्यं।यथापित्र्यायांसामिधेन्यः।अथाहुतीयेष्टिः।तस्यामा
वाहनेविशेषः।आज्यभागावावाद्य।अग्निंपावकंआउवह।अग्निंशुचिंआउवह।देवाँआ
ज्यपाँइत्यादि।पंचमेप्रयाजे।ये३० स्वाहाग्निंस्वाहासोमंस्वाहाअग्निंपावकँअग्निंशुचिंस्वा स्वाहा
हादेवाइत्यादि।वृधन्वंतावाज्यभागौभवतः।सनःपावकदीदिवोग्नेपावकरोचिषेतिअग्नेः १४
स्य पावकस्याज्यानुवाक्ये।अग्निःशुचिव्रततमउदग्नेशुचयस्तवेत्यग्नेःशुचेः।अथास्विष्टकृतः।

साक्षान्विश्वा अभियुज इत्यनुवाक्या। ये ३ यजामहेऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाधा
मान्ययाट् सोमस्य प्रियाधामान्ययाट् अग्नेः पावकस्य प्रियाधामान्ययाट् अग्नेः शुचेः प्रि
याधा० देवानामाज्यपा इत्यादि। जुषतां हविरग्निमीळे पुरोहितमिति याज्या। अथ सूक्तवा
के। अग्निरिदं हविः। सोम इदं हविः। अग्निः पावक इदं हविः। अग्निः शुचिः इदं० देवा आज
पा इत्यादि। अन्यद्दर्शेन व्याख्यातं। अथ तृतीयाऽऽइष्टिः। तस्यामिष्टौ सामिधेन्यः प्रक्षिपति।
समिध्यमानो अध्वर इत्यस्या उपरिष्टात्। उत्तमसमीपयोः प्राक् पृथुपाजा अमर्त्य इति द्वे।
यत्र यत्र धाय्या इत्युच्यते तत्र तत्र एते ऋचावेतद्धर्मके वेदितव्ये। आवाहने। अग्नीषोमौ॥
इंद्राग्नी॥ विष्णुः इति त्रीणि देवतानि भवंति। त्रीण्यपि न भवंति वा। अदितिर्नियमेन भवति।
। आज्यभागावावाह्य। इंद्राग्नी आ ३ वह। अदितिं आ ३ वह। देवाँ आज्यपानित्यादि। पंचमे

मं०टी० ९५

प्रयाजे। ये३यजा महे स्वाहाग्निं स्वाहा सोमं स्वाहा इंद्राग्निं स्वाहा अदितिं स्वाहा देवा इत्यादि। पुष्टि
मंता वाज्यभागौ। अग्निना रयिमश्नवज्जयस्फा नो अमीवहेत्याज्यभागयोरनुवाक्ये। नित्ये या
ज्ये। आद्यानां त्रयाणां दर्शपूर्णमासप्रकरणोउक्ता याज्यानुवाक्याः। तत्राग्नीषोमयोः पौरो
डाशिके वेदितव्ये। नो पांशुयाजसंबंधिन्यौ। उत त्वामदिते महि महामू षु मातरं सुव्रतानां
मिस्थ चावदितेर्याज्यानुवाक्ये। अथ स्विष्टकृतः। प्रेद्धो अग्ने दीदिहीत्यनुवाक्या। ये३यजा
महे ग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाट् इंद्रा
ग्न्योः प्रिया धामान्ययाट् अदित्याः प्रिया धामान्ययाट् देवानामित्यादि। जुषतां हविरिमो
अग्ने वीततमानि हव्येति याज्या। विराजावित्युक्ते एते संयाज्ये प्रत्येतव्ये सर्वत्र। सूक्तवाके। ९५
अग्निरिदं हविः। सोम इदं हविः। इंद्राग्नी इदं० जुषताम० कातां। अदितिः इदं हविः। देवा आज्य

पाद्यादि। अन्यत् पौर्णमासवत्। अथ प्रासंगिकं। इति तिस्रः। अस्यायमर्थः। तिस्र इष्टय
एवं तंत्रका भवंति। अन्या अपीष्टयो भवंति तास्त्वन्यथा तंत्रा भवंति। उक्तेष्टित्रयमध्ये यदि
देवतान्यत्वं भवति तथापि तस्य प्रथमाया आम्नातं तंत्रं तदेव प्रथमायां भवति। यद्द्वितीयस्या
आम्नातं तंत्रं तदेव द्वितीयस्यां भवति। यच्च तृतीयस्यां तदेव तृतीयस्यां नान्यथा तंत्रं का
र्यं इति तिस्र इष्टयः। अथवा आद्योत्तमे वा इष्टी भवतः। अथवाद्या वा इष्टिर्भवति। साप आ
ष्टुविष्का भवति सर्वदेवतायुक्ता। तथा सति तदाज्यभागयुक्तायां प्रथमायां धाय्ये भव
तः। विराजौ तु संयाज्ये भवतः। इति मात्रो विकारो यस्यामिष्ट्यां भवति। असाविष्टिर्वैराज
तंत्रे विजानीयात्। एवं चाध्वर्युवशात् यदा आद्यैव क्रियते तदा द्वितीयतृतीययोरपि दे
वतास्तस्यामेव यष्टव्याः। तदनुसारेण प्रयोग उच्यते। आवाहने विशेषः। अग्निमग्न उ

मं०दी०
१६

आ३वह। सोममावह। अग्निं आ३वह। अग्निं पवमानं आ३वह। अग्निं पावकं आ३वह। अग्निं
शुचिं आ३वह। इन्द्राग्नी आ३वह। अदितिं आ३वह। देवाँ आज्यपानित्यादि। पंच मे प्रयाजे।
ये३यजामहेग्निं स्वाहाग्निं स्वाहा सोमं स्वाहा अग्निं स्वाहा अग्निं पवमानं स्वाहा अग्निं पा
16 वकं स्वाहा अग्निं शुचिं स्वाहा इन्द्राग्नी स्वाहा अदितिं स्वाहा देवा इत्यादि। अग्न्याधेयप्रभृति
चातुर्मास्यपर्यंतं या इष्टयः तासां प्रधानानामुपांशुप्रचारः। अग्न्याधेयप्रभृत्यान्त उपांशु
हविष इति वचनात्। प्रधानयागस्य याज्यानुवाक्या इष्टित्रये उक्ताः। अथ स्विष्टकृतः। प्रे
ष्ठे अग्न इत्यनुवाक्या। ये३यजामहेग्निं स्विष्टकृतं अयाळग्निरग्नेः प्रिया धामान्ययाट् सो
मस्य प्रिया धामान्ययाट् अग्नेः पावमानस्य प्रिया धामान्ययाट् अग्नेः पावकस्य प्रिया धा १६
मा० अग्नेः शुचेः इन्द्राग्न्योः० अदित्याः प्रिया धामान्ययाट् देवानामाज्यपानामित्यादि। जु

षतां हविरिमो अग्न इत्यादि। सूक्तवाके। अग्निरिदं हविः। सोम इदं० अग्निः इदं०। अग्निः प
वमानः इदं०। अग्निः पावकः इदं० अग्निः शुचिः इदं० इंद्राग्नी जुषेतां क्रातां। अदितिः इदं ह
विरजुषतावीवृधत महो ज्यायो कृत। देवा आज्यपा इत्यादि। पौर्णमासवत्सर्वे संस्थाजपां
तं। यदा अग्निः पवमानः केवलः क्रियते। पूर्वकारिवशात्। तदा प्रथमायामेव तंत्रं कर्त
व्यं। एवमग्नेरपि केवलस्य। यदाग्न्याधानं सेष्टिकं समाप्तं भवति। तस्मात्कालादारभ्य द्वाद
शरात्रमजस्रा अग्नयो भवंति। य अधिगतश्रीः। तस्य सर्वकालमजस्रा अग्नयो भवंति।
गतश्रियो नाम प्राप्तश्रीरित्यर्थः। इत्यग्न्याधेयं समाप्तं। अथाग्निहोत्रमुच्यते। अग्न्यु
त्सर्गे क्रियते नित्यधृतं गार्हपत्यं यजमानः प्राक्प्रणयनात्संप्रेष्यत्युद्धराहवनीयमिति॥
स्वयं होमित्वे न संप्रैषो भवति। अथ गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानयंति। वैश्यकुला

२ अथवा अरणीमंथनं कार्यं।

मं०टी० त्। यस्मात्कस्माच्चिच्छिन्नव्रतो वा। दक्षिणाग्निमानयेत्। एकयोनय अग्नय इत्यन्ये मन्यंते। अ
१७ स्मिन्पक्षे गार्हपत्यादेव दक्षिणाग्नेरुद्धरणं कार्यं। अथवा नित्य एव तस्य दक्षिणाग्नेः प्रज्व
लनं कार्यं। यथा यथोक्तेन विधिना यत एव दक्षिणाग्नेराहरणमाधाने प्रारब्धं तत एव
17 कर्तव्यं। आद्यं तावत्। एवं प्रकारेण दक्षिणाग्नेः प्रणयनं कृत्वा गार्हपत्यादाहवनीयं ज्वलं
तमादाय पात्रांतरं कुर्यात्। अथ देवं त्वा देवेभ्य इति मंत्रेण पात्रस्थमाहवनीयमुद्यमेत्।
अथ उद्धेयमाया उध्वर पाभने[illegible] इति मंत्रेण आहवनीयायतनस्य पुरतः आदित्याभि
मुखो भूत्वा अग्ने ता हुतिरिति मंत्रेण आहवनीयायतने निदधाति। सायं। यथा सायं तथा
प्रातरपि गार्हपत्यं प्रज्वाल्येत्यादि सर्वं कर्तव्यं। विशेषस्तूच्यते। व्युष्टायां प्रज्वलनादि भ १७
वति। तमाहवनीयं एवाभिमुखो भूत्वा निदध्यादायतने प्रणयनमंत्रेण आ[illegible]यदेनर्

५ रूपस्य स्थाने रा ...यदेनर्

तिकृत्वाप्रणयेत्। अतः कालादूर्ध्वमजस्रधृताग्निर्व्रतचारी भवत्याहोमात्। अनुदित
होमी च आउदयाद्व्रतचारी भवति। अत्र व्रतशब्देन यथासंभवं चातुर्मास्यव्रतानि सन्त्रिय
माश्च यथासंभवं गृह्यन्ते। अथाग्निहोत्रद्रव्याहरणं करोति। ततोऽस्तमित आदित्ये होमः
कार्यः। होतव्यकर्मणि गमाचमनं कृत्वा तीर्थेन प्रपद्य एकैकमग्निं सोदकेन पाणिना त्रि
स्त्रिः परिसमूहति तूष्णीं। अथ ऋतसत्याभ्यामिति मन्त्रं जपित्वा पर्युक्षेत् त्रिस्त्रिरेकैक
मग्निं पुनः पुनरुदकमादाय त्रिरेव च मन्त्र अग्नीनामानन्तर्ये विकल्पो भवति। अथ
वा दक्षिणाग्निमेव प्रथमं पर्युक्षेत्। न विकल्पेन कुर्यात्। एवं ह्यर्थवादे श्रूयते। अग्नी
नां यो दक्षिणः पिता गार्हपत्यः पुत्रः। आहवनीयः पौत्रः। तस्मादनेन क्रमेण पर्युक्षे
त्। परिसमूहनेऽपि एष एव विधिर्वेदितव्यः। अथ गार्हपत्यादारभ्याविच्छिन्नामुदकधा ६

मं० टी०
३८

रांहरेत्। तं तुं तन्त्वं नित्यं चा। आहवनीयात्। अथ साकारो मर्यादायां नाभिविधौ। अथ पश्चा
द्गार्हपत्यस्योपविश्य तत्कृत्वा निरसनोपविशते। अथ गार्हपत्याउदगंगारानपोहेत्॥
स्कुतकृतस्थेति मंत्रेण। अथ तेष्वंगारेष्वपोहितेषु अग्निहोत्रार्थं द्रव्यमधिश्रयेत्॥
अधिश्रितमिति मंत्रेण। इष्वायास्पदमिति वा मंत्रेण। दधि चेदग्निहोत्रार्थं तन्नाधि
श्रयेत्। तदप्याधिश्रयेदित्येके मन्यंते। पयसा नित्यहोमः। नित्यश्चासौ होमश्च नित्य
होमः। पयसा कर्तव्यः। तंडुलानामग्निहोत्रहोमो वा। अकामस्याग्निहोत्रहोमः पयसा
तंडुलादिना कर्तव्य इत्यर्थः। अथ काम्यद्रव्याणि। यवागूरोदनो दधिसर्पिः एतानि द्र
व्याणिग्रामकामान्नाद्यकामेंद्रियकामतेजस्कामानामाहिताग्नीनां यथासंख्येन भवंति। २८
यवाग्वोदनयोः कश्चित्संसियोरूपदानमिच्छंति केचिदत्रैव श्रपणं। अधिश्रितं यदग्निहोत्र

द्रव्यं तदवज्वलयेत्। अनधिश्रयं दध्यवज्वलयेत्। अग्निष्टे तेज इति मंत्रेण। यदकज्वालि
तं तत्स्रुवेण प्रतिषिंचेत्। शांतिरसीति मंत्रेण। नवा प्रतिषिंच्यात्। तयोः प्रतिषेचनाप्रति
षेचनयोर्व्यवस्था कार्या। एतदुक्तं भवति। यदा प्रतिषेक आदौ न कृतस्तदा प्रतिषेको न क
दाचिद्भवति। यदा तु प्रतिषेक आदौ कृतस्तदा प्रतिषेको भवति। अथ येन त्वर्णेनाग्निहो
त्रमवज्वलयितव्यं तेन तृणेन पुनर्ज्वलतातं परिहरेत्। त्रिः अंतरिक्षं इति मंत्रेण। सकृ लंर
न्मंत्रेण द्विस्तूष्णीं। अथाग्निहोत्रद्रव्यं तापेन समुद्गतः अंतो यस्य तथाभूतं कर्षं निर्वादि
वेक्षे सादित्रिभिर्मंत्रैस्त्रीनिधानानि कुर्वन्नुदगुद्वासयेत्। अथ स्रुक्स्रुव कृतस्तु हुतम
कार्ष्टेति मंत्रेण। अपोहितानंगारानितरांगारमध्ये निक्षिपेत्। अथ स्रुक्स्रुवं प्रतितपेत्।
प्रत्युष्टमित्यादिना। उत्तरतः स्थाल्याः स्रुक्च मासाद्य। ॐ इमुन्नयानीति मंत्रेण। अतिसर्जयी।

मं०टी० ताहिताग्निंक्षीरहोता।एतदंतंकर्महोताकरोति।अथाहिताग्निस्तक्षातिसर्जनवाक्यात्प्रागेव
१८ प्रयतोप्याचम्य।अपरेणवेदिमतिव्रज्य।दक्षिणतस्तूष्णीमुपविशेदित्येके।विहारस्य
दक्षिणतआहवनीयस्यसमीपेउपविशेदित्यन्ये।अथातिसर्जनवाक्यंश्रुत्वा ॐ३मुन्नय।
19 इतिअतिसृजेदाहिताग्निः।उभयत्रापिप्रणवस्त्रिमात्रः।प्रवसितेयजमानेक्षीरहोतार
मन्योतिसृजेत्।अन्यस्याभावेक्षीरहोतैवआत्मानमतिसृजेत्।अन्यथायजमानंप्रवासि
तोयजमानएवकरोति।स्वयंहोमेतुयजमानएवातिसर्जनप्रत्यतिसर्जनेकरोति।एवम
तिसृष्टःक्षीरहोताभूरिडेत्यादिचतुर्भिर्मन्त्रैश्चतुरस्त्रवान्पूरयित्वास्थाल्यागृहीत्वास्रु
चिप्रक्षिपति।योयजमानःपुत्राणामनुज्येष्ठमृद्धिमिच्छेत्।तस्यक्षीरहोताअग्निमस्रुवं १६
पूर्णमुन्नयेत्।अथवास्ययजमानस्ययःप्रियःपुत्रोभवति।तमप्रतिपूर्णस्रुवमुन्नयेत्।

बहुपुत्रस्य यजमानस्य चतुर्थ्या उपरि ॥ प्रियेपुत्रे सति पंच मस्कवं तूष्णीमुन्नयेदित्येके ॥
सत्रे पुनरुन्नयनग्रहणात्। अत एव केचित्संस्र[illegible]मं स्रुक्स्कवं तूष्णीं सर्वेषामिच्छंति। पंचावत्ति
नामित्यपरे। यदुचितं तत्कार्यं। अथाग्निहोत्रस्थालीमभिमृश्य। समिधं स्रुक्चं गृहीत्वा गा
र्हपत्यस्योपर्युपरि हृत्वा प्राप्या संमितं कृत्वा आहवनीयसमीपं नीत्वा। तस्य पश्चात्सर्वमे
वस्थापितेषु प्रागग्रेषु कुशेषु उपसाद्य। जान्वाच्य समिधमादध्यादाहवनीये। रजतां त्वेति
मंत्रेण। यजमानोऽग्नय इदं न ममेति। समि[illegible]दाधानवन्निपातितजानुरेवोदकं स्पृशेत्। वि
द्युदसीति मंत्रेण। अथ प्रदीप्तां समिधं द्व्यंगुलमात्रे देशेऽभिजुहुयात्। जान्वाच्य। भूर्भुवस्स्व
रोम्। अग्निरिति मंत्रेण। अस्याः पूर्वाहुतिरिति संज्ञा[illegible]। यजमानोऽग्नये ज्योतिष इदं न ममेति।
एतां हुत्वा कुशेषु स्रुक्चं साद[illegible]यति। निपातितजानुरेव। अथ तथाभूत एव गार्हपत्यमवेक्ष

मं०द्वि० तेपश्चान्मेयच्छतिमंत्रेण। अन्येतुगार्हपत्यंगत्वा पश्चात्प्राङ्मुखोभूत्वातमेवेक्षंतेतिमन्यंते। अथ
२० जान्वाच्योत्तरांसंतत्कामाहुतिंजुहुयात्। अमंत्रकांतथापूर्वस्याहुतेर्भूयसीतयाचासंसृष्टांपू
20 र्वाहुतेः प्रागुदग्देशेउत्तरतोवा। अस्यामाहुत्यांहूयमानायांप्रजापतिशब्दंचतुर्थ्यंतंध्याये
त्। स्वाहाकारस्यकेचित्स्थानमिच्छंति। केचिदुपांशुप्रयोगं। प्रजापतयइदंनममेतित्यागः।
हो अग्निहोत्रमादन्यत्रापितूष्णींहोमेषुचोद्यमानेषुसएवविधिःप्रत्येतव्यः। अथउत्तरस्या
हुतेर्भूयिष्ठंस्रुक्च्यवरूणाप्य। तदाहवनीयस्योपरित्रिरनुप्रकंप्यकुशेषुस्रुचंनिधाय। पुष्क
रलेपमग्रादारभ्यबिलमानीयहस्तलेपंकुशमूलेषुनिक्षपति। पशुभ्यस्त्वेतिमंत्रेण। अथ
ण दक्षिणतअंगुलीउत्तानाः करोति। कुशानांदक्षिणतोनकुशमूलानां। अथप्राचीनावीतीभू २०
त्वाअंगुलीरंगुष्ठांतरेणतूष्णीं। स्वधापितृभ्यइतिवामंत्रेण। अपोवनिनीय। तृप्तिरसीति

मंत्रेणोपस्थस्थास्वीयमनंतरं कर्म कुर्यात्। अथ याजमानं उच्यते। तत्र क्षीर होता समिधमा
धीयमानां आहिताग्निरनुमंत्रयते। समिदाधानमंत्रेण स्वाहाकारेण तेन ऋषियोस्यनेनच।
त्रा अस्य सद्दोहस इत्यृचा पूर्वामाहुतिमनुमंत्रयेत हूयमानां उत्तरामाहुतिमुत्थायानुमं
त्रयते। भूर्भुवस्स्वरिति मंत्रेण। अथवाहुतीमीक्षमाण एवमंत्रोक्तानि फलान्याकांक्षेत। उ
पलाग्नेदिवेदिव इतीति स्त्रभिः। आग्नेयीभिश्च प्रत्यहमुत्तराहुतिमनुमंत्रयते। अग्न आयूं
षिपवस इतीति स्त्रभिः संवत्सरेनुमंत्रयते। तदा च उपलाग्न इत्यासां निवृत्तिरित्येके। अ
१ इमिर न्ये त्वाग्नेयीभिरनुमंत्रणमिच्छंतिनाहुतेः। इति याजमानं। स्वयं होमित्वे तु विशेष उच्यते।
तत्र समिदाधानानंतरं समिदनुमंत्रणमित्येके। पूर्वाहुत्यनुमंत्रणं कुशेषु सादनादूर्ध्वं
कार्यं। केचित्तु समित्पूर्वाहुत्योरनुमंत्रणं गार्हपत्यावेक्षणादूर्ध्वमिच्छंति। उत्तराहुत्यनुमंत्र

यंतुस्रुग्धस्तस्रुगेवोष्णायभवति।इतिस्वयंहोमित्वेविशेषः।अन्यत्रक्षीरहोताव्याख्यातंवेदि
तव्यं॥अथाग्निहोत्रंयवाग्वापयसावास्वयंपर्वणिजुहुयात्।नद्व्यांतरेण।तथास्वयमे
वपर्वणोन्यत्रकालेऋत्विजांमध्येकश्चिदेकोजुहुयात्।शिष्योवाजुहुयात्।अथक्षीरहो
तुःप्रयोगः।यदुक्तंवृष्टिरसिवृश्चमेपाप्मानमृतात्सत्यमुपगामितिहुत्वेति।तदनंतरंउ
दङावृत्यभक्षयेत्।हुतशेषं।यद्यपरयोर्होमः।होमेत्वपरयोरग्न्योर्हुत्वाभक्षयेत्।आयु
षेत्वेतिप्रथमंभक्षयेत्।अन्नाद्यायत्वेतिमंत्रेणोत्तरंभक्षयेत्।यथाप्रथमेभक्षेमंत्रांतेप्रा
श्नामीतिशब्दः।तथोत्तरेपिवेदितव्यः।अथापरयोर्होमः।प्रत्यगुदगुपविश्यजान्वाच्ये
त्यादिभिराहवनीयसमिद्धमैरुपेतांगार्हपत्येसमिधमादध्यात्तूष्णीं।अथतथाभूत २१
एवतस्याःस्रुवेणादायअग्नयेगृहपतयेस्वाहेतिमंत्रेणप्रदीप्तांद्व्यंगुलमात्रेभिजुहुया

त्ता। उत्तराहुतिराहवनीयवद्वेदितव्या। इति गार्हपत्ये। दक्षिणाग्नौ पूर्वाहुतिः। अग्नयेन्नादा
यान्नपतये स्वाहेति समिदाधानं गार्हपत्यवद्वेदितव्यं। अग्नये संवेशपतये स्वाहेति वा। उत्त
रा तु नित्या वेदितव्या। आहवनीयहुतशेषं विहाराद्बहिर्यथोक्तकाले भक्षयित्वा। विहारं
प्रविश्याभ्यात्मम पः स्रुचा निनयते। त्रिः सर्पदेवजनेभ्य इति मंत्रेण त्रिवारं मंत्रा। अथैनां
कुशैः प्रक्षाल्य चतस्र उदकपूर्णाः स्रुचोपराजितायां दिशि निषिंचति। ऋतुभ्यः स्वाहेत्या
दिभिश्चतुर्भिर्मंत्रैः। पंचमीं स्रुचं कुशदेशे पूर्णामेव निनयति। पृथिव्याममृतमिति मंत्रे
हो णा। षष्ठीं स्रुचं उदकपूर्णामेव पश्चाद्गार्हपत्यस्य निनयेत्। प्राणममृतमिति मंत्रेण। अथा
हवनीये स्रुचं प्रतापयेदित्येके। गार्हपत्य इत्यपरे। अथांतर्वेद्यां स्रुक्कूर्चापयति। परिचा
रकाय वा प्रयच्छेत्। अथ समिधो गृहीत्वाग्रेणाहवनीयं गत्वा तस्य तस्याग्नेर्दक्षिणत उदङ्मु

मं०टी० स्वस्ति ष्टन्ने केकाश्मिन् अग्नौ तिस्वस्ति स्वः समिध आदध्यात्। सर्वत्रापि प्रथमां समंत्रां द्वितीयतृ
२२ तीये तु सर्वत्रापि तूष्णीमादध्यात्। केचिदाहवनीये समिध आधायोत्तरेणाहवनीयमपरेण गा
र्हपत्यं गत्वा गार्हपत्यदक्षिणाग्न्योः समिदाधानमिच्छंति। अपरे तु दक्षिणेन दक्षिणाग्निं ग
त्वा गार्हपत्यदक्षिणाग्न्योः समिदाधानमिच्छंति। अत्र यदुचितं तद्ग्राह्यं। आहवनीये प्रथ
22 मसमिदाधाने मंत्रः दीदिहीति। गार्हपत्ये दीदायेति। दक्षिणौ दीदिदायेति। एतेषु मंत्रेषु के ग्नौ
चित्स्वाहाकारमंते कुर्वंति। ऋतसत्याभ्यां त्वेति पर्युक्षणं तत्रादपि कर्तव्यं। ताभ्यां ताभ्यां पर्यु
क्षणाभ्यां परिसमूहने व्याख्याते तु पर्युक्षणयोः पूर्वे भवतः। ततश्चायं पर्युक्षणधर्मः। त्रि
स्त्रिरेकैकं पुनः पुनरुदकमादायेति। तत्र क्रमः। तथा मंत्रः। एते सर्वे परिसमूहनेपि भवंति॥ २२
सर्वेषामतिदेशनात्। तत्र मंत्रलिंगत्वादृतसत्याभ्यां त्वा पर्युसमूहामीत्यूहितव्यमित्येके। अन्ये

तुमंत्रं नेछंति विलिंगात्। ऊहस्याचानभिप्रेतत्वाद्यर्हि सूत्रकारस्य समानप्रकरणे तु भूम्न्वां
तरं मभिप्रेतं भवति। तत्र दर्शयति। यथा॥ न्यायदेन इति तु प्रणयेदिति। तथा च। एवमुत्तरा
अ।कातामेतेति यथार्थमित्यत्र चैवं प्रदर्शितत्वान्न मंत्रविकारोत्राभिप्रेत इति ज्ञायते। तस्मा
न्न मंत्र इति॥ इति सायं होमः। एवमेव प्रातर्होमेपि सर्वं भवति। विशेषतस्तूच्यते। उदयसमी
पे आहूते तमसि। उदिते वा आदित्ये सर्वोयं विधिर्भवति। प्रातः पर्युक्षणे ऋतं त्वा सत्येन भ्यां ला
पर्युक्षामीति मंत्रः कार्यः। न ऋतसत्याभ्यामिति। अतिसर्जनं तु ॐ ऋतुन्नेष्यामीति मंत्रेण
भवति। तथा मुन्नयेति। हरिणीं त्वा सूर्यज्योतिषमहरिष्टकामुपदधे स्वाहेति समिदाधानं।
भूर्भुवस्स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति मंत्रेण होमः कार्यः। न तु सायं होमवत्तथा भूतेन
च पुष्करस्यावमार्जनं कार्यं किं तु नाद्धि परीतमुन्मार्जनं कार्यं॥ इत्यग्निहोत्रहोमः। प्रवत्स्यन्नग्नी

मं०टी०
२३

23

नाहिताग्निः शुचिर्भूत्वा अग्निहोत्रवत्त्रेतां विहृत्य प्रज्वाल्य। विहाराद्बहिः कर्मांगमाचमनं
कृत्वा विहारं तीर्थेन प्रविश्य। तं तमग्निमतिक्रम्य तस्य तस्य पश्चात्प्राङ्मुखस्थित्वा तं तमुपति
ष्ठते। तत्र शंस्य पशून्मे पाहीति मंत्रेणाहवनीयमुपतिष्ठते। अथ दक्षिणावृद्देव गत्वा गार्हप
त्यमुपतिष्ठते। नर्य प्रजां मे पाहीति मंत्रेण। अथ दक्षिणाग्निमुपतिष्ठते। अथर्व पितुं मे पा
हीति मंत्रेण। अथ तत्रस्थ एव गार्हपत्या[illegible]हवनीयोपश्येत्। इमान्मे मित्रावरुणाविति मंत्रेण।
अथ गार्हपत्यदक्षिणाग्न्युपस्थानार्थं यथागतस्तथाहवनीयोपस्थानदेशपर्यंतं प्र
त्यागत्याहवनी[illegible]यस्य प्रदक्षिणं कुर्वंतमेवोपतिष्ठते। मम नामेति मंत्रेण इत्येके। अन्ये तु
यथेतं प्रत्येत्य विहारस्य प्रदक्षिणं कुर्वन् आहवनीयमुपतिष्ठत इति वदंति। अथाग्नीन २३
नपेक्षमाणः प्रव्रजेत्। मा प्रगामेति षट्कं सूक्तं जपन्। अत्र सूत्रे सूक्तग्रहणं अप्रतिरथस

कवद्व्याख्येयं सूक्तं समाप्य ह्रादग्निभ्योवा वं विसृजेत्। अस्मात्प्राक् सर्वत्र वाग्यमः का
र्यः। सदा सूक्तगः पितुमा अस्तक पथाः स्यनया कः चापं स्थान मवरोति। एवमग्नीनुपस्थायैव
वे प्रसितव्यं नान्यथा। यदि बलादनुपस्थिताग्निः प्रवासमापद्येत। ततइहैव सन्निति मंत्रे
णाअग्नीनुपतिष्ठते। प्रतिकल्पयित्वा एतदुक्तं भवति। प्राच्यां दिश्याहवनीयं कल्पयेत्।
प्रतीच्यां गार्हपत्यं। दक्षिणस्यां दक्षिणाग्निं। तेनैव मानेन। अथ पूर्ववत्कर्मगिमाचमनं कृ
तं त्वा तीर्थेन प्रपद्येत मग्निमतिक्रम्य तस्य पश्चात्साङ्गुरवास्थिलानं तमग्निमेकैकमुपतिष्ठते।
इहैव सन्निति मंत्रेण। न युगपत्सर्वान्। न मंत्रस्यैकप्रकाशत्वात्। अथ पूर्वोक्तेन विधिना
प्रव्रजेत्। अथ उभयत्रापि प्रवासितोपि याजमानं कुर्यात्। कामं तत्राप्यात्मसंस्कार कान्य
र्थात्कुर्यात्। यथाव्रतचर्यादीय धर्ममात्राश्च तथानुमंत्रणादीनां तत्रा कार्य परिसमाप्तौ॥

मं०टी०
२४ द्
शुचिर्भूत्वा अपि पंथामगन्महीत्येतयार्चा प्रत्यागच्छंति। अन्ये गृहसमीपं प्राप्यैव एतामृ
चं [illegible] जपंति। आगच्छतो वा सेवा शंसत्यर्थं इयम्भवतीति देवस्वामिनः। अथ गृहसमीपे
शुचिर्भूत्वा समित्पाणिर्वाग्यतः। अग्नीन्ज्वलतः कृत्वा आहवनीयसमीपमतिक्रम्य॥
आहवनीयमीक्षेत। विश्वदानीमिति मंत्रेण। अथ याः समिधो गृहीताः तासामेकैकामे
24
कैकस्याग्नेः समीपे निदधाति। अथ प्रत्यगुदगाहवनीयादवस्थाय तमेवोपतिष्ठते॥
ममनाम तव चेत्यनेन। ततो या उपनिहिताः समिधः ता अग्निष्वभ्यादध्यात्। तत्र अग
न्मविश्ववेदसमिति मंत्रेणाहवनीये समिधमादध्यात्। अयमग्निर्गृहपतिरिति मंत्रेण
गार्हपत्ये। अयमग्निः पुरीष्य इति मंत्रेण दक्षिणाग्नौ। अथ तत्रस्थ एव गार्हपत्याहवनीया २४
वीक्षेत। इमान्मे मित्रावरुणाविति मंत्रेण। अथ यथेतं प्रत्येत्य परिसमूहति प्राग्द्वारा

त्रात्। अथ नैमित्तिकं। यदि तु ऊर्ध्वं दशरात्रात्प्रवासादागच्छति। तदाज्यं संस्कृत्य प्रत्यङ्मु
ख आहवनीयादुपविश्य जान्वाच्य चतुर्गृहीतमाज्यं स्रुचा जुहुयात्। मनो ज्योतिरिति मंत्रे
ण। एकामेव। एके त्वाचार्याः यावंतो होमा अहुतास्स्युस्तावंत्याहुतयः कर्तव्या इति वदंति॥
तामेताहुतिमतीतहोमसंपत्यर्थं केचिन्मन्यंते। तेषां पक्षे होमो न कर्तव्यः। अन्ये तु काला
तिपत्तिदोषनिर्घातार्थामाहुतिं मन्यंते। तेषां पक्षे होमोपि कर्तव्य एव। एवं दर्शपूर्णमासा
त्ययेपि पाथिकृतीं कृत्वा अतीतानि कर्माणि कुर्यादित्येके। नेत्यपरे। अथ प्रयोगः। दशरा
त्राधिकप्रवासे आहुतिं हुत्वा परिसमूहति। आहवनीयगार्हपत्यदक्षिणाग्नीन्। विहारा
दुदङ्ङ्गत्वा भूर्भुवस्स्वस्सुप्रजाः प्रजाभिः स्यामित्यादि उपविश्य भूर्भुवस्स्वरिति वाचं विसृजेत्। अथ गृहानीक्षेत। गृहा मा
बिभीत इति मंत्रेण। अनाहिताग्नेरप्येष विधिः समानो वेदितव्यः। अथ गृहान्प्रविशेत्॥

मं०टी० गृहानहंस्कमनस इति मंत्रेण। अथगृहानीक्षमाणः शिवंशग्ममितित्रिर्जपेत्। अस्मिन्गृह
२५ निगृहगतामनुष्या आहिताग्निनायदृवगतं यच्चानवगतम[illegible]प्रियंतदुभयविधमपिन
ला[illegible]पयेयुः। अनुपस्थिताग्नेरपि अपि पंथामगन्म हीत्यादिसमानं। अथपक्षांतरमु
च्यते। प्रवसन्नत्येत्यक अभयंवोभयंमेमितिमंत्रेणसर्वानग्नीनुपतिष्ठते। नान्यथेति
25 प्रवसन्ब्राह्मणेश्रूयते। अत्रकेचिदस्मिन्नपिपक्षेप्रथमपक्षोक्तंकर्मतत्सर्वमपिभ
वति। उपस्थानमात्रंतुनिवर्तत इति वदंति। अन्येतु एतस्मिन्पक्षेनान्यद्भवतीति। अस्मि
न्पक्षेप्रयोगएवंकर्तव्यः। प्रवत्स्यन्शुचिर्भूत्वा अग्नीन्प्रज्वल्याचम्यतीर्थेनविहारंप्र
विश्यगार्हपत्यस्यपश्चादवस्थायसर्वानग्नीन्युगपत्तिष्ठते। अभयंव इति मंत्रेण। अथप्र २५
व्रजेदनपेक्षमाण इति प्रथमकल्पेनसमानं। अनुपस्थिताग्नेरपि प्रातिदिशमग्नीन्कल्प

यित्वा।अनेनविधिनोपस्थायप्रथमपक्षवत्व्रजेत्।अथकार्यसमाप्तौशुचिर्भूत्वाआपि
पंथामगन्महीतिमंत्रेणागत्वाचप्याग्नीन्ज्वलतःकृत्वाविहारंतीर्थेनप्रविश्यप्रत्यक्
गार्हपत्यादवस्थायसर्वानग्नीनुपतिष्ठतेअभयंवइतिमंत्रेण।अथउदङ्विहारादुपवि
श्येत्यादिप्रथमकल्पेनसमानं।इत्यनुपस्थिताग्नेरपिसमानमेवसर्वं।अहरहर्वाग्निहो
त्रहोमोपस्थानसमयेसायंप्रातःअभयंवइतिमंत्रेणोपस्थानंकुर्यात्।अनाहिताग्नेस्तु
प्रवासविधिर्गृह्येवक्ष्यामः।इतिप्रवासोपस्थानविधिः।अथपिंडपितृयज्ञः।अमावा
स्यायामपराह्णेपिंडैःपितृयज्ञःकार्यः।यदातूभयोरह्नोरमावास्याभवतितदातुयदह
श्चंद्रमानदृश्यतेतदहरपराह्णेपिंडपितृयज्ञोभवति।यदात्वेकस्मिन्नेवाहन्यमावा
स्यातदादृष्टचंद्रत्वेपितस्यामेवापराह्णेपिंडपितृयज्ञःकार्यः।ततश्शुचिर्भूत्वाविहारंप्र

मं०टी० विश्वदक्षिणाग्नेरेकोल्मुकं प्राग्दक्षिणस्यां दिशि प्रणयेत्। ये रूपाणीति मंत्रेण। एवमुक्तं भ
२६ वति क्वचित्काष्ठे अनेकमुल्मुकं भवति क्वचिदेकं। तत्र यदेकं तत्प्रणयेत्। नान्यदिति। ये
षां कर्मणां अत्र दिशो नादिष्टाः तानि सर्वाणि प्राग्दक्षिणां दिशं प्राचीं कृत्वा कर्तव्यानि।
26 यथा मध्यात्प्राग्दक्षिणार्धाच्चावदाने येषां दिगादेशः कृतस्तानि यथादेशमेव भवं
ति। यथा दक्षिणाग्नेः प्रागुदगिति। अथातिप्रणीतस्याग्नेरुपसमाधानं कुर्यादित्येके।
दक्षिणाग्नेरित्यन्ये। उभयोरित्यपरे। अथातिप्रणीतस्याग्नीन्परिस्तीर्य दक्षिणाग्नेः प्रा
गुदक्प्रत्यगुदग्वा एकैकशः पात्राणि सादयेत्। चरुस्थालीशूर्पस्फ्योलूखलस्रुक्स्रुवकृ मुसल
द्वि ष्णाजिनसकृदाम्नइध्मप्रेक्षणकमंडलूनू इत्येतानि। अत्र चरुस्थालीशूर्पग्रहा २६
त्वाद्दक्षिणतोग्निष्टं भ्रकट मुच्यते। तदारुत्सतत्र शूर्पे चरुस्थालीं कृत्वा सक्षिस्वा यथाभ

१ अथ कृष्णाजिने उलूखलं मुसलं च कृत्वा स्थाल्यां येव्रीहयः तान् प्रक्षीअ वह
न्यात्॥१॥२

वति। तथा व्रीहिभिः पूरयेत्। अथ तां शिखां छिंद्यात्। शूर्पोपरि पतितान् व्रीहीन् अ
ग्निष्ठेन दध्यात्। व्रीहितंडुलान् विविच्य विविच्य एवं यावत्सर्वे तंडुला भवंति तावद्
वहत्वा सकृत्सक्षाल्य दक्षिणाग्नौ श्रपयेत्। ततः दक्षिणाग्नेरारभ्य चैअर्वाग्गतिम
णीतात् स्फ्येन लेखामुल्लिखेत्। अपहता असुरा इति मंत्रेण। ततस्तां लेखां अभ्युक्ष्य
सकृदाच्छिन्नैर्दर्भैरवस्तृणाति। अथाज्यं सार्पिर्भवं अनुसूतं भवति। ततस्तदाज्यं
श्रवायां कृत्वा दक्षिणाग्नेर्दक्षिणतः स्थापयेत्। अंजनाभ्यंजनकशिपूपबर्हणानि
च। अथाज्येनाभिघार्य स्थालीपाकं प्राग्दक्षिणतउद्वास्य लेखायामासादयेत्॥
यद्यपि सूत्रे स्थापाकासादनं पूर्वमेव पठितं। तथाप्येतावत्कृत्वा आसादयेदिति
सूत्रं योज्यं। अथ प्राचीनावीती भूत्वा दक्षिणाग्नौ त्र्यणीमिध्मं प्रक्षिपेत्। अथ मेक्षणे

x नवनीतं वा तत्र सर्पिर्भुक्तत्ं५

मं०टी० नादायावद्दानसंपद्दाजुहुयात्।एतदुक्तं भवति।स्रुवेणमेक्षणमभिघार्य मेक्षणेन स्था
२७ लीपाकात्द्विरवदायस्रुवेण [illegible] प्रत्यभिघार्य हविरवत्तं च।अथदक्षिणाग्नेः प्रत्य
गुदगुपविश्यजुहुयात्।सोमायपितृमत इति मंत्रेणाद्वितीयामप्याहुतिमेवंजुहुयात्।
अग्नयेकव्यवाहनायेतिमंत्रेण।अथवाआहुतिद्वयमपिस्वाहाकारेणजुहुयात्।त
27 दाअग्निंपूर्वंसोमंतु पश्चात्जुहुयात्।यज्ञोपवीतीच।स्वाहाकारपक्षेविप्रतिपत्तिः।
केचित्सोमायपितृमतेस्वधानमः स्वाहेत्यधिकं स्वाहाकारमिच्छंति।एवमग्नयेकव्य
वाहनायेत्यत्रापि।अन्येतुस्वधानमइत्यस्यस्थाने स्वाहाकारमिच्छंति।केषांपक्षेसो
मायपितृमतेस्वाहा।अग्नयेकव्यवाहनायेति एवमेव।अथयथाभूतेनहोमः तथा फु०२७ गं:
भूतेनैवमेक्षणमनुप्रहृत्य।प्राचीनावीतीभूत्वाल्केषांत्रिरुदकेनोपासिंचेत्।शुंधंतां

पितरः इति त्रिभिर्मंत्रैः। यत्र लेखायामुपरि उदकं निक्षिप्तं तत्र तत्र लेखायां पिंडं दद्यात्।
पराङ्मुखेन पाणिना पितृतीर्थेन पित्रे पितामहाय प्रपितामहाय च। एतत्त इति मंत्रेण।
अत्र मंत्रे असाविति पदस्थाने प्रथमया आमंत्रणविभक्त्या तस्य नाम गृह्णीयात्। अ
थाचार्यमतान्युच्यंते। गार्ग्यमतं एषां पितृपितामहप्रपितामहानां ये प्रेतास्तु
तस्मै तस्मै पिंडान्निपृणीयात्। ये तु जीवंति तान्प्रत्यक्षमर्चयेत्। अस्याः क्रियायाः पि
त्राद्यर्थत्वात्। तौल्वलिमतं। यद्यपि जीवंता हिंतास्तेतथापि पितृभ्यः प्रेतेभ्य एव दद्यात्।
न जीवतामर्चनं कार्यं। क्रियां प्रति पित्रादीनां गुणत्वात्। गुणत्वं च नानाजातिगतानां
पिंडभोक्तृत्वायोग्यत्वात्। अथ गौतममतं। पितृपितामहप्रपितामहानां मध्ये यो
जीवति तस्यापि पिंडदानं कार्यमेव क्रियायास्तदर्थकारित्वात्। अथास्माभिर्जीवन्मृताना

मं०टी० मुपायविशेषः कथ्यते। यदुक्तमपरेभ्यो दद्यादिति तत्तावन्न कर्तव्यं। अनधिकारात्। यदु
२८ क्तं प्रत्यक्षमर्चयेदिति तदपि न। अनधिकारादेव। यदुक्तं जीवेभ्यो निपृणीयादिति तदपि
न। अनधिकारादेव। यदुक्तं जीवांतर्हितेभ्यो निपृणीयादिति तदपि न। अनधिकारादे
व। एतानि पक्षे दूषणानि यथासंभवं वेदितव्यानि। किं तर्ह्यनुष्ठेयं भवति। ये पित्रादीनां
28 त्रयाणां मध्ये जीवा भवंति। तेषां पिंडांजुहुयात्। न तेभ्यो निपृणीयात्। यस्य तु सर्वे जी
वा भवंति। तस्य सर्वं हुतं भवति। अथ सर्वसंमतप्रयोगः। यदि पितॄणां नामानि न जानी
दा यात्। तथा सति पिंडान्मंत्रे नामस्थाने ततपितामहप्रपितामहेत्येतान्शब्दान्कुर्यात्।
अथ निहतान्पिंडाननुमंत्रयेत न हुतान्। अत्र पितर इति मंत्रेण। सव्यावृद्दङ्मुखो दु २८
नुच्छ्वसन्नास्ते यावच्छक्नोति। अथ पिंडान्प्रतिपर्यावर्तते अमीमदंतेति मंत्रेण। अथ

चरोः प्राणभक्षं भक्षेत्। अथ यदुक्तं निनयनं प्राचीनावीती लेखां त्रिरुदकेनोपनयेदि
स्यादि तत्र कर्तव्यं। अथ पिंडेष्वभ्यंजनं तैलेन करोति। असावभ्यंक्ष्वेति मंत्रेण। अस्या
वित्यस्य स्थाने पिंडदानवन्नामपदं वेदितव्यं अथ पिंडानांजनेनांजयेत्। असावंक्ष्वे
ति मंत्रेण। असाविति मंत्रगतं पदं पूर्ववद्व्याख्येयं। अथ पिंडे क्षुवासार्थे दृशां दद्यात्।
ऊर्णास्तुकां वा। पंचाशद्भ्यो वर्षेभ्यः ऊर्ध्वं यो यजमानः स्यात्स वासोर्थे स्वलोम दद्यात्।
एतद्वः पितर इति मंत्रेण। दशादिष्वपि मंत्रः। अत्र केचिदभ्यंजनांजनवत्। प्रतिपिंडभे
देन वासो वासोदानमिच्छंति मंत्रावृत्तिं च। अन्ये तु पिंडत्रयेपि सकृदेव वासोदानं सकृ
देव मंत्रं मन्यंते। अथोत्थाय सर्वान् पिंडाननुतिष्ठते। नमो वः पितर इति मंत्रेण। मनो न्वा
त हुवामह इति चैस्तृभिर्ऋग्भिः पिंडेष्वेव च पितृभक्तिः कार्या। उपस्थाय पिंडान्प्रगमयेत्।

मं०टी० परेतनेतिमंत्रेण।अथदक्षिणावृत्तिंउदेशात्दक्षिणाग्निंप्रत्यागच्छेत्।अग्नेतमद्याश्वंन
२८ स्तोमैरित्यृचा।ततोगार्हपत्यंप्रत्येयात्।यदंतरिक्षमितिमंत्रेण।अथवीरंमेदत्तपितरइति
मंत्रेणपिंडानांमध्यममादद्वीतेतिसूत्रेकुर्यादमध्याहर्तव्यं।अथपत्नींप्राशयेत्।यथा
29 पत्नीप्राश्नातितथाकुर्यादित्यर्थः।आधत्तपितरइतिमंत्रेणमध्यमपिंडंपत्नीप्राशयेत्।
इतरौपिंडौअप्सुक्षिपेत्।अथवाआतिप्रणीतेऽग्नौ।अथवायस्ययजमानस्यअभिन
वोन्नकाम्याभावःसतौपिंडौप्राश्नीयात्।महारोगेणवाअभितप्तःप्राश्नीयात्।मरण
जीवनयोरन्यतरांगतिंगच्छेत्।अथअनाहिताग्नेःपिंडपितृयज्ञउच्यते।यथाआहि
ताग्निर्दक्षिणाग्नौकरोतिएवमेवसर्वमनाहिताग्निर्गृह्याग्नौकुर्यात्।अयंतुविशेषः। २८
स्थालीपाकंश्रपयित्वाआतिप्रणयनंकुर्यात्।ततोजुहुयादितिवेद्यर्थक्रमेविशेषः।तथा

अग्ने तमद्य यदंतरिक्षमिति मंत्राभ्यां गत्वाग्निं प्रत्यागच्छेत्। यदंतरिक्षमिति मंत्रेया
गार्हपत्यस्य शब्दलोपः कार्य इति विशेषः। अन्यदाहिताग्निवत्। अथाहिताग्न्यनाहिता
ग्न्योः समानं द्वाभ्यां पाणिभ्यां द्वे द्वे पात्रे उत्सृजति अतिरिक्ते कमंडलौ तृयां द्वितीयं गृहे
त्वा उत्सर्गो भवति। इति पिंडपितृयज्ञः। अथान्वारंभणीयेष्टिः। अथ कृताग्न्याधान
स्यानंतरां यां पौर्णमास्यां दर्शपूर्णमासारंभः। तत्र दर्शपौर्णमासारंभेयमिष्टिर्भवति।
तस्याः प्रयोग उच्यते। तस्याग्नाविष्णू सरस्वती सरस्वानग्निर्भगी। इति च तस्रो देवताः।
चा आवाहने आज्यभागौ वास्य। अग्नाविष्णू आ३वह। सरस्वंतं आ३वह। अग्निं भगिनं सरस्वती३ आ३वह।
आ३वह। देवाँ आज्यपाँ इत्यादि। पंचमे प्रयाजे। ये३यजामहे स्वाहाग्निं स्वाहा सोमं स्वा
हा अग्नाविष्णू स्वाहा सरस्वतीं स्वाहा सरस्वंतं स्वाहा अग्निं भगिनं स्वाहा देवा इत्यादि॥

मं०८१० वार्त्रघ्नावाज्यभागौप्रधानस्य।अग्नाविष्णूसजोषसेतिद्वेकल्पजेअग्नाविष्ण्वोः।पावकानः
३० सरस्वतीपावीरवीतिसरस्वत्याः।पीपिवांसंसरस्वतोदिव्यंसुपर्णमितिसरस्वतः।आसवंस
वितुर्यथासनोराधांस्याभरेत्यग्नेर्भगिनः।प्रकृतिवत्संयाज्ये।येयजामहेग्निंस्विष्टकृतम
३० याळग्निरग्नेःप्रियाधामान्ययाट्सोमस्यप्रियाधामान्ययाट्अग्नाविष्ण्वोः०सरस्वत्याः०
सरस्वतः०अग्नेर्भगिनःप्रियाधामान्ययाट्देवानामित्यादि।सूक्तवाके।अग्निरिदंहविः।
सोमइदंहविः।[illegible]ः।अग्नाविष्णूइदंहविरजुषेतांमवीवृधेतांमहोज्यायोक्रातां।स
रस्वतीइदं०सरस्वान्इदंहविरजुषत०अग्निर्भगिनीइदं०देवाआज्यपाइत्यादि।पौर्णमा
सवदन्यत्संस्थाजपांतं।इत्यन्वारंभणीयेष्टिः।आधानानंतरंतस्मिन्नेवसंवत्सरेमहान्व्या ३०
धिःपुत्रादिहानिर्वायदिसंभवेत्तदाउत्सर्गेष्ट्याग्नीनुत्सृज्यपुनराधानंकुर्यात्।अतउत्सर्गे

ष्टि राज्वार्यणानुक्तापि पूर्वकारियानुसारेणोच्यते। तस्याग्निर्वैश्वानरो वरुणो ऽग्निरप्सुमा
न्मित्रः। इति पंचदेवताः। आवाहने आज्यभागावावाह्य। अग्निमावह। वैश्वानरमाव
ह। वरुणमावह। अग्निमप्सुमन्तमावह। मित्रमावह। देवाँ आज्यपाँ आ० स्वादि। पंच
मे प्रयाजे। ये ३ ० स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा वैश्वानरं स्वाहा वरुणं स्वाहाग्निमप्सु
मन्तं स्वाहा मित्रं स्वाहा देवा इत्यादि। वार्त्रघ्नावाज्यभागौ प्रधानस्य। अग्निर्मूर्धा भुवो यज्ञस्ये
त्यग्नेः। वैश्वानरो अजीजनत्पृष्टो दिवीत्यग्नेर्वैश्वानरस्य। अव ते हेड उदुत्तममिति वरु
म णस्य। अप्स्वग्ने सधिष्टव यदग्ने दिविजा असीत्यग्नेरप्सुमतः। मयो दधे धियंधिर इति वा ज्या। मे
अभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वानिति मित्रस्य प्रकृतिवत्संयाज्ये॥
ये ३ यजामहे ऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्यया

मं०२।० अग्नेः प्रिया धामान्ययाडग्नेर्वैश्वानरस्य० वरुणस्य० अग्नेरप्सुमतः० मित्रस्य प्रिया धामान्य
३१ याड् देवानामा० इत्यादि। सूक्तवाके। अग्निरिदं हविः।० अग्निर्वैश्वानर इदं हविः। वरुण इदं०।
अग्निरप्सुमानिदं हविः। मित्र इदं हविः। देवा आज्यपा इत्यादि। पौर्णमासवत्संस्थाजपांतं।
31 उत्सर्गेष्ट्यादेवताद्विलमपि केचित्। अग्निः। अग्निर्वैश्वानरश्चेति। इति उत्सर्गेष्टिः। अथ
पुनराधेयइष्टिः। तस्यां बुद्धिमदिन्दुमद्गुणविशिष्टावग्नी आज्यभागदेवते। गुणयोरावा
हनादौ व्यपदेशः कार्यः। बुद्धिमदिंदुमंतावित्यावक्षते तथानुवृत्तिः स्यादेवेति वचनात्।
अनुब्राह्मणपक्षे अग्निरग्निः पवमान आज्यभागौ। अग्निः प्रधानदेवता आवाहने॥
अग्निं बुद्धिमंतमाऽवह। अग्निमिंदुमंतमाऽवह। अग्निमाऽवह। देवां आज्यपा इत्यादि।
अनुब्राह्मणपक्षे अग्निमग्न आऽवह। अग्निं पवमानमाऽवह। अग्निमाऽवह। देवां आ ३१

ज्यपां आवहेत्यादि। अनुब्राह्मणपक्षे। प्रयाजेषु विभक्तिप्रयोगः। समिधः समिधोग्न आ
ज्यस्य व्यंतु। तनूनपादग्निमग्न आज्यस्य वेतु। नराशंसोग्निमग्न आज्यस्य वेतु। इति वासिष्ठ
दीनां। इडो अग्निनाग्न आज्यस्य व्यंतु। बर्हिरग्निरग्न आज्यस्य वेतु। स्वाहाग्निं बुधिमंतं स्वा
हाग्निं मिंडुमंतं स्वाहाग्निं स्वाहा देवा आज्यपा इत्यादि। अनुब्राह्मणपक्षे। स्वाहाग्निं स्वाहा
ग्निं पवमानं स्वाहाग्निं स्वाहा देवा इत्यादि। समिधाग्निं दुवस्यतेत्यूषु ब्रवाणि त इत्याज्यभाग
योः पुरोनुवाक्ये। ये३ यजामहेग्निं बुधिमंतं जुषाणोग्निर्बुधिमानाज्यस्य वेतू३ वौ३॰। ये३ य
जामहेग्निं मिंडुमंतं जुषाणोग्निरिंडुमानाज्यस्य हविषो वेतू३ वौ३॰। अनुब्राह्मणपक्षे प्रथ
मस्याज्यभागस्य पौर्णमासवद्याज्यानुवाक्ये। द्वितीयस्याग्न आयूंषि पवस इत्यनुवाक्या॥
ये३ यजामहेग्निं जुषाणो अग्निराज्यस्य हविषो वेतू३ वौ३। प्रधानस्य। अथा ह्यग्ने क्रतोर्भद्रस्य

मं०टी० ३२ आभिष्टे अद्य गीर्भिर्गृणंत इत्यृचौ अग्ने याज्यानुवाक्ये। अथ स्विष्टकृतः। एभिर्नो अर्कैरित्य
नुवाक्या। आग्नेयं अग्निं स्विष्टकृत मयाळग्निरग्नेः प्रियाधामान्ययाळग्नेर्बुध्निमतः प्रिया
धामान्ययाळग्नेरिंडुमतः प्रियाधामान्ययाळग्नेः प्रियाधामान्ययाड् देवानामित्यादि। अ
नुब्राह्मणपक्षे। अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाधामान्ययाळग्नेः पवमानस्य०ळ
32 ग्नेः प्रियाधामान्ययाड् देवानामित्यादि। अनुयाजेष्वपि विभक्तिप्रयोगः। देवं बर्हिरग्नेर्वसु
वने वसुधेयस्य वेतु। देवो नराशंसो अग्नेो वसुवने वसुधेयस्य वेतु। तृतीयस्त्वप्राकृतः। सू
क्तवाके। अग्निर्बुध्निमानिदं हविः। अग्निरिंडुमानिदं हविः। अग्निरिदं हविः। देवा आज्य
पा इत्यादि। अनुब्राह्मणपक्षे। अग्निरिदं हविः। अग्निः पवमान इदं हविः। अग्निरिदं हविः। ३२
देवा आज्यपा इत्यादि। [illegible]। अन्यत्सर्वं पौर्णमासवत्संस्थाजपांतं प्रागुत्तमा

दनुयाजान्।सर्वमप्युपांशुस्वरेणमंद्रस्वरेणवाप्रयोक्तव्यं।प्रधानंतूपांश्वेव।सर्वोपांशु
त्वेआवहादीनांमंद्रस्वरः।मंद्राण्युपांशुतंत्राणामितिवचनात्।स्कमंद्रपक्षेतंत्रस्वराण्येव।
द्वि पुनराधानद्वितीये रग्निर्वरुणौअध्वर्युविहिता।तस्यामग्नीवरुणौप्रधानदेवता॥
त्वंनोअग्नेवरुणस्यविद्वानितियाज्यानुवाक्ये।पौर्णमासवदन्यत्संस्थाजपांतं।इतिपु
नराधेयेष्टिः।अथाग्रयणीयेष्टिः।आग्रयणंव्रीहिश्यामाकयवानांप्रत्येकमागतेपृथक्
पृथग्भवंति।एकैवचसमानतंत्रंवा।तस्याःप्रयोगउच्यते।सामिधेनीपृथुपाजाअमर्त्य
वा इतिद्वेधाय्ये।आवाहने।आज्यभागौवात्य।अनंतरंमा३वह।इंद्राग्नी३आ३वह।विश्वांदे मग्नि २
वान्देवान्आ३वह।सोममावह।द्यावापृथिवीआवह।देवांआज्यपा३इत्यादि।स्वपक्षेतु॥
अग्नीन्द्रौइंद्राग्नीवानयोर्विकल्पः।विश्वेदेवाःसोमोद्यावापृथिवीइतिचतस्रोदेवताः।अ

मं०टी० स्वामिष्टावाद्यं हविरुद्वैरितरा इपुपांशु। पंचमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं स्वाहा अग्निं स्वाहा

३३ नूइंद्राग्नी स्वाहा विश्वान्देवान् स्वाहा सोमं स्वाहा द्यावापृथिवी स्वाहा इत्यादि। वार्त्रघ्नावाज्यभागौ। देवा

वृधन्वंतौ वा। प्रधानस्य। अग्निर्मूर्धा भुवो यज्ञस्येत्यग्नेः। इंद्राग्नी अवसागतं गीर्भिर्विप्रः प्रम

तिमिच्छमान इतींद्राग्न्योः। विश्वे देवास आगतये के च ज्मा महिनो अहिमाया इति विश्वेषां देवा

33 नां। सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यामिति सोमस्य। मही द्यौः पृथिवी च नः

प्रपूर्वजे पितरा नव्यसीभिरिति द्यावापृथिव्योः। स्विष्टकृतः विराजौ संयाज्ये। प्रथो अग्न इ

मो अग्न इत्येते। अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामा

न्ययाळग्नेः०ळिंद्राग्न्योः० विश्वेषां देवानां० सोमस्य० द्यावापृथिव्योः प्रिया धामान्ययाडु ३२

देवानामित्यादि। अथ ब्राह्मणः प्राशित्रभक्षे विशेषो भवति। अथ प्राशित्रं गृहीत्वा दक्षिणेन

पाणिना सव्ये पाणौ कृत्वा इतरेणाभिमृशेत्। प्रजापते त्वेति मंत्रेण। ततो निष्क्रम्य उपावि
श्य प्राङ्मुखो भूत्वा नित्यं प्राशित्रजपं जपित्वा। भद्रान्न इत्यनेन जपन्प्राश्नाति। अवांतरेडा
यां यो यो विहितो भक्षजपो मंत्रः। स एव नित्यग्रहणा निर्दिष्टं आचार्येण तस्य जपस्य अवां
तरेडायां प्राप्तत्वात्। प्राशनस्थानस्पर्शनविधानात्प्राप्नोति। न तस्योदनः प्राश्येत वचनं।
होत्रे इतरथा त्येतेन भक्षिणो भक्षानित्यानिर्देशात्। अन्यस्यापि देवस्वामितः सर्वेणावाभि
मृशेत्। प्रजापतये त्वेति मंत्रेणानेष्यति पाठः। नित्यं वचनं किमर्थं मा भूदुपदेश इत्युपदेशः।
इत्यनेन भक्षिणो भक्षानिति प्राश्येति वचनात्। पूर्ववदाचम्य ततो नाभ्यालंभनं समंत्रमुक्त्वा।
अमोसीत्यनेन न च नाभिमालभेत। इति ब्राह्मणो विशेषः। होतुरवांतरेडाप्राशने विशेषः।
इडेभागमिति मंत्रं जपित्वा अवांतरेडां सव्ये पाणौ कृत्वा दक्षिणेन हस्तेनाभिमृशेत्। प्रजा

मं०टी० पतयेत्वाग्रहं गृह्णामीत्यनेन मंत्रेण। ततो भद्रान्नः श्रेयः समनैष्ट देवा इति प्राश्याचम्य। नाभि
३८ देशं दक्षिणेन हस्तेनाभिमृशेत्। अमोऽसि प्राण इति मंत्रेण। सूक्तवाके। अग्निरिदं हविः। सोम इ
दं हविः। अग्निरिदं०। इंद्राग्नी जुषेताम०। क्रातां। विश्वे देवा इदं०। जुषंतावीवृधंत महोज्ज्यायोऽक्र
त। सोम इदं०। द्यावापृथिवी०। जुषेतां०। क्रातां। देवा आज्यपा इत्यादि। पौर्णमासवत्संस्थाजया
34 तं। इत्याग्रयणेष्टिः। नैमित्तिकी यज्ञविभ्रेष्टिरुक्ता आपस्तंबेन। तस्याग्निरिंद्रः सोम इति दे
वताः। आज्यभागावाहनानंतरं अग्निमावह। इंद्रमावह। सोममावह। देवां आज्यपां इत्या
दि। पंचमे प्रयाजे। स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहेंद्रं स्वाहा सोमं स्वाहा देवा इत्यादि। वा
र्त्रघ्नावाज्यभागौ। अग्निर्मूर्धा भुवो यज्ञस्येत्यग्नेः। एंद्र सानसिं प्रससाहिष इतींद्रस्य। सोम ३८
यास्ते मयोभुवो याते धामानीति सोमस्य। प्रकृतिवत्संयाज्ये। अग्निं स्विष्टकृतमयाळग्नि

रग्नेः प्रिया धामा न्यया इ० सोमस्य० अग्नेः ब्धिं इ० स्य सोमस्य प्रिया धामान्ययाड् देवानामित्या
दि। सूक्तवाके। अग्निरिदं० सोम इदं० अग्निरिदं० इंद्र इदं० सोम इदं०। देवा आज्यपा मित्यादि।
पौर्णमासवत्संस्थाजपांतं। इत्यापस्तंबोक्ताविंष्टिः। अथ काम्या इष्टयो वक्ष्यंते। आयुष्का
मेष्टिः। तस्यां आनो अग्ने सुचेतुना त्वं सोम महे भगमिति जीवातुमं तौ तयोः पुरोनुवाक्ये।
नित्ये संयाज्ये। द्वे प्रधान देवते। अग्निरायुष्मान्० इंद्रस्त्राता आयुष्टे विश्वतो दधदिति द्वे
कल्पजे [illegible] याज्यानुवाक्ये। अग्नेरायुष्मतः। त्रातारमिंद्रमवितारमिंद्रं मा ते अस्यां सहसा
वन्परिष्टाविति। इंद्रस्य। पाहि नो अग्ने पायुभिरग्ने त्वं पारया नव्यो अस्मानिति स्विष्टकृतः संया
ज्ये। पौर्णमासवदन्यत्। इति आयुष्कामेष्टिः। अथ स्वस्तिगमनार्थं स्वस्त्ययनेष्टिः। अग्नेर
क्षाणो अंहसस्त्वं नः सोम विश्व[illegible]श्वतो रक्षेति रक्षितवंतावाज्यभागौ तयोः पुरोनुवाक्ये। नित्ये

क

मं० टी० संयाज्ये। अग्निः स्वस्ति मां देवता। स्वस्ति नो दिवो अग्ने पृथिव्या आरे अस्मद् मतिमारे अंहइतिया
३५ ज्यानुवाक्ये। पाहि नो अग्ने पायुभिरजस्रैरग्ने त्वं पारया नव्यो अस्मानिति संयाज्ये। पौर्णमास
वदन्यत्। इति स्वस्त्ययनीयेष्टिः। अथ पुत्रकामेष्टिः। अग्निः पुत्री देवता। वार्त्रघ्नावाज्यभागौ।
यस्मै त्वं सुकृते जातवेदो य स्त्वा हृदा कीरिणा मन्यमान इत्यग्ने पुत्रिणः। अग्निस्तु विश्रवस्त मान
ममिति द्वे संयाज्ये। पौर्णमासवदन्यत्। इति पुत्रकामेष्टिः। अथाग्नेयीष्टिः। तस्यां धाय्ये वि
राजौ। अग्निर्मूर्धन्वान् देवता। वार्त्रघ्नावाज्यभागौ। अग्निर्मूर्धा भुवो यज्ञस्येत्यग्ने मूर्धन्व
तः। समानं संसृष्टौ जपांते। अथापराग्नेयीष्टिः। धाय्ये विराजौ। अग्निः कामो देवता। तुभ्यं
ता अंगिरस्तमा श्याम तं काममग्ने इत्यग्नेः कामस्य। पौर्णमासवदन्यत्। अथ वैमृधेष्टिः॥ ३५
धाय्ये विराजौ। इन्द्रो वैमृधो देवता। वि न इन्द्र मृधो जहि मृगो न भीम इति याज्यानुवाक्ये। पौर्ण

मासवदन्यवत्। अथापरा वैमृधेष्टिः। धाय्ये विराजौ। इंद्रो वैमृधो देवता। स घ्नन्निमिं इति द्वि
कल्पजे संयाज्ये उभयोरपि पौर्णमासवदन्यत्। अथैंद्रीयेष्टिः। धाय्ये विराजौ। इंद्रो दाता दे
इंद्रः पुन वता। यानि नो धानानीति द्विकल्पजे उभयोरपि पौर्णमासवदन्यत्। अथाशेष्टिः। धाय्ये
दीता ३ विराजौ। आशापालावा। आशानामाशापालेभ्य इति द्विकल्पजे याज्यानुवाक्ये उभयोरपि पौ
र्णमासवदन्यत्। अथलोकेष्टिः। धाय्ये विराजौ। पृथिव्यंतरिक्षं द्यौरिति तिस्रो देवताः। पृथि
वीमातरं महीमिति तिस्रः कल्पजास्त्रयाणां याज्यानुवाक्याः। आयंतु पृथिव्याः। द्वितीयतृ
तीये अंतरिक्षस्य। तृतीयप्रथमा दिवः। पौर्णमासवदन्यत्। अथ मित्रविंदेष्टिः। महावैरा
जौ इति। तस्या एव संज्ञा। धाय्ये विराजौ। अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता पूषा
दात्रे १ सरस्वती त्वष्टेत्येकप्रदाना ऐवताः। आवाहनकाले द्वितीयया विभक्त्या पृथगादिश्यंते॥

सकृदेवावहणाद्वं कुर्यात्। सर्वा आदिश्यसकृदेकप्रदाना इतिवचनात्। पंचमेप्रयुंजे। पुरस्तात्स
कृदेवस्वाहाकारमुक्त्वा। सर्वा आदिश्य स्वाहा देवा आज्यपा इत्यादि। अग्निः सोमो वरुण इति
कल्पजा पुरोनुवाक्या। प्रतिलोममादिश्य यजेत्। ये३ यजामहे त्वष्टारं सरस्वतीं पूषणं सविता
रं बृहस्पतिमिंद्रं मित्रं वरुणं सोममग्निमित्यादिश्य। त्वष्टा रूपाणीत्यनया कल्पया यजति। स्वि
ष्टकृति षष्ठ्या विभक्त्या सर्वाः पृथगादिश्य सकृदेव प्रियाधामान्ययाड् इत्यमुक्त्वा। देवा
नामाज्यपानामित्यादि। सूक्तवाके प्रथमया विभक्त्या सर्वाः पृथगादिश्य सकृदेव इदं हवि
रजुषतामित्यादिना एकवचनेन ब्रूयात्। तथा चोक्तं। तथोत्तरेषु निगमेष्वेकामिव संस्तु
यादित्यादि। पौर्णमासवदन्यत्। आग्नेयादीनां मित्रविंदादीनामिष्टीनां अनुक्तकामानां ३६
शास्त्रांतराया अन्वेषणीयाः। अयस्कवाश्वसुरोपेष्टिः। तस्यामभिचरन्यजेत। तस्यामि

36

इन्द्रः सूरो देवता। इन्द्रः सूरो अतरद्रजांसीति द्वे कल्प्ये याज्यानुवाक्ये। जुष्टो दमूना अग्ने शर्ध
महते सौभगायेति संयाज्ये। पौर्णमासवदन्यत्। विरुद्धानां संमतिः कामः संज्ञानेष्ट्या यजे
त। अग्निर्वसुमान्सोमो रुद्रवानिन्द्रो मरुत्वान्वरुण आदित्यवान्। इति चतस्रो देवता एक
प्रदानाः। एकप्रदानप्रयुक्तं प्रयुक्ताः विधास्यामि त्रिविंदायामुक्ताः। अग्निः प्रथमो वसुभिरिति
द्वे कल्प्ये याज्यानुवाक्ये। पौर्णमासवदन्यत्। विरोधकामा ऐन्द्रामारुत्या यजेत। इन्द्रो मरुतश्च
देवता। ऐन्द्र सानसिं प्रशर्धायेति। मरुतो यस्य हि क्षये प्र स साहिषे पुरुहूत शत्रूनिति मरुतां।
ऐन्द्रीमनूच्य मारुत्या यजेत। मारुतीमनूच्यैन्द्र्या यजेत इति सर्वेषु निगमेषु इन्द्रं पूर्वं निग
मयेत्। पश्चान्मारुतः। अथास्विष्टकृति सूक्तवाके च पूर्वं मरुतः पश्चादिन्द्रः। पौर्णमासवद
न्यत्। अथ यामिष्टिः। संपत्तिकामानां प्रकृत्या भवति। ऐन्द्र सानसिं प्र स साहिष इतीन्द्रस्या।
१

मं॰टी॰ ३७ मरुतोयस्याहि। प्रशार्धयेति मरुतां। प्रकृत्यैव निगमनं समानमन्यत्। संपत्तिकामेन संज्ञानी चक्रु
र्वीत। भ्रातृभिरभिभूयमानः प्रहृष्यमाणः ऐंद्राबार्हस्पत्यांयजेत। इंद्राबृहस्पती देवता। आ
नइंद्राबृहस्पती अस्मेइंद्राबृहस्पती इतीयाज्यानुवाक्ये। केवलइंद्रोप्येके। एतमन्यत्समानं।
37
अथ वैश्वानरीयेष्टिः। अग्निर्वैश्वानरो देवता। वैश्वानरो अजीजनत्। पृष्टो दिवीतियाज्या
नुवाक्ये। समानमन्यत्। अथव्रातपत्येष्टिः। अग्निर्व्रतपतिर्देवता। त्वमग्ने व्रतपा असि॥
यद्वो वयं प्रमिनामव्रतानीतियाज्यानुवाक्ये। समानमन्यत्। अथपवित्रेष्टिः। नस्यामपामि
दंन्ययनंनमस्तेहरसे शोचिष इति द्वेकल्पजे धाय्ये। पृथुपाजा अमर्त्य इत्येतयोः स्थाने॥
पावकवंतावाज्यभागौ। आज्यभागावावाह्य। प्रधानदेवता आवाहयति। अग्निंपवमानं। ३७
सरस्वतीं प्रियां। अग्निंपावकं। सवितारं सत्यप्रसवं। अग्निंशुचिं। वायुंनियुत्वंतं। दधिक्रा
अग्निंव्रतपा॥

वापं। अग्निं वैश्वानरं। विष्णुं शिपिविष्टं। इति दश। अग्नी रक्षांसि सेधति योधारया पावक
येसाज्यभागयोः पुरोनुवाक्ये। यत्ते पवित्रमर्चिषीति पूर्वस्य याज्यभागस्य याज्या। आक
लशेषु धावतील्युत्तरस्य। अथ प्रधानानां। अग्न आयूंषि पवसेग्ने पवस्व स्वपा इत्यग्नेः
पवमानस्य। उत नः प्रिया प्रियास्विमा जुष्का ना सुष्मदा नमो भिरिति सरस्वत्याः प्रियायाः
स नः पावक दीदिवो ग्ने पावक रोचिषेत्यग्नेः पावकस्य। आ विश्वदेवं सत्पतिं न प्रमियेस
वितुर्दैव्यस्य तदिति। सवितुः सत्यप्रसवस्य। अग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यग्नेः
शुचेः। वायुरग्रे गाय त्र प्रीर्वयो शुक्रो अयामि त इति वायोर्नियुत्वतः। त्वमग्ने व्रतपा असि।
यद्वो वयं प्रमिना मे व्रतानीत्यग्ने व्रतपतेः। दधिक्राव्णो अकारिषमा दधिक्राः शवसा पं
च कृष्टीरिति दधिक्राव्णः। वैश्वानरो अजीजनत्स प्रत्नो दिवीत्यग्ने वैश्वानरस्य। वषट्के विष्णा

मं०टी० वासआक्रूणोमिगतत्तेअथशिपिविष्टनामेतिविष्णोः शिपिविष्टस्य। जुष्टोदमूनाअग्नेशर्ध
३८ महतेसौभगायेतिसंयाज्ये। पौर्णमासवदन्यत्। एषाइष्टिराचार्येणानोक्ताइतिकेचित्। ते
38 षामतेअध्वर्युवशादाग्नेयव्यतिरिक्तानांपंचानामेवोपांशुत्वं। आग्नेयानांतु। वैश्वानरी
व्रातपतीष्टिपवित्रेष्टिः। तिस्रइष्टयःपापक्षयार्थाः। एतदुक्तं। वैश्वानरीव्रातपतीपवित्रे
ष्टिंतथैवच। ऋताहुतौप्रयुंजानःपुनातिदशपूरुषमिति। तथाच। दशपूर्वांदशपरानि
त्मनेनसहैकविंशतिपंक्तिंपुनातीतिबौधायनेनोक्तं। अथवर्षाकामेष्टिःकारीरी। त
स्यासामिधेनीषुप्रतित्यंचारुमध्वरमीळेअग्निंस्ववसंनमोभिरितिधाय्ये। पृथुपाजा
अमर्त्यइत्येतयोःस्थाने। अस्वग्नेसधिष्टवासुमेसोअब्रवीदित्यष्टमंतावाज्यभागयोः ३८
पुरोनुवाक्ये। अग्निर्धामच्छन्। केवलोग्निर्वा। मरुतःसूर्यइतितिस्रोदेवताः। त्वंत्वाचिद

स्तुता धामं तेविश्वं भुवनामिति। अग्नेर्धामछदः। केवलाग्निपक्षे। हिरण्यकेशोरजसो
विसारइति द्वे। वाश्रेव विद्युन्मिमाति पर्वतश्चिन्महीतिमरुतां। स्वजांतिरश्मिमोजसावाहि
ष्ठेभिर्विहरन्तीति सूर्यस्य। अग्नेबाधस्वयंत्वादेवापिरिति संयाज्ये। पौर्णमासवदन्य
त्। प्रायश्चित्तहोमानंतरं। अच्छावदेति चतसृभिः प्रत्यृचं चतस्रोदिशउपतिष्ठेत। स्
क्तेनसूक्तेनवैकादिशमुपतिष्ठेत। उपस्थायसंस्थाजपं कुर्यात्। तिस्रःपिंड्यउत्तराःपिं
ड्यउत्तराःपिंडीद्रव्याः। मरुद्देवत्याइष्ट्यासंगोदर्विहोमात्मकावावर्षस्थभवंति। दर्वि
होमपक्षेनहोतुःप्रयोगः। इष्टिपक्षेतु। उदीरयथाप्रवोमरुतः। आयंनरोविद्युन्महसः।
कृष्णांनियानंनिस्तुत्वंतोग्रामाजितइतित्रयाणांयाज्यानुवाक्याः। अन्यत्सर्वंकारीरीष्टि
वत्। अथसांवत्सरिकाणीष्टयनान्युच्यंते। तेषांफाल्गुन्यांपौर्णमास्यां चैत्र्यांवोपक्रमः।

मं०दी०
३६
39

काम प्रयोगविशेषाश्चाध्वर्युतो ज्ञातव्याः। तुरायणं नामेष्ट्ययनं। अथ सांवत्सरिका अहर
हरनुसवनं तिस्र इष्टयो भवंति। आग्नेयी प्रातःसवने। ऐंद्री माध्यंदिने। अपराह्णे वैश्वदेवी।
अथवा एकैवेष्टिः। एतास्त्रिहविः प्रातःसवन एव कर्तव्याः। अग्निर्मूर्धा भुवो यज्ञस्येत्यग्नेः।
ऐंद्र सानसिं प्रससाहिष इतींद्रस्य। विश्वे देवास आगत येके च ज्मेति विश्वेषां देवानां।
पौर्णमासवदन्यत्। दाक्षायणयज्ञो नामेष्ट्ययनं। तस्मिन्द्वे पौर्णमास्यो द्वे अमावास्ये
यजेत। अग्निमग्नीषोमौ पौर्णमास्यां अग्निमिंद्रं श्वोत्तरस्यां। याज्यानुवाक्याः प्राकृता
उक्ताः। अग्निमिंद्राग्नी च पौर्णमास्यां अमावास्यायां। अथ प्रातर्दितायामिष्टिस्तस्यां
प्रधानदेवता। अग्निर्मित्रावरुणौ। आ नो मित्रावरुणा यज्ञं हविष्मंतावितिवि धेसु दानूइति ३९
मित्रावरुणयोः। इतरा सांप्रकृता उक्ता। इक्वादधो नामेष्ट्ययनं। तत्र प्रजापतिर्देवता॥

प्रजापते न त्वदेतान्यन्यस्त्ववेमे लोकाः प्रदिशो दिशश्चेति याज्यानुवाक्ये। पौर्णमासवद
न्यत्। द्यावापृथिव्योरयनं नाम षष्ठ्ययनं। फाल्गुन्यां पौर्णमास्यामुपक्रम्य पौर्णमासपर्यं
तमहरहरमावास्येन यजति। एवं व्यत्ययस्य संवत्सरं यजति। तयोरुक्तः प्रयोगः। अस्मिन्
सूत्रे असमाम्नातानामिष्टीनां शास्त्रांतरे विहितानां। अनुक्तयाज्यानुवाक्यानां देवतल त
क्षणा याज्यानुवाक्ये स्यादि। लक्षणाविशिष्टा याज्यानुवाक्या ग्राह्या। तादृग्लक्षणप्रयु
क्तानामनधिगमे याज्यानुवाक्याभ्यां काभ्यांचिदाग्नेयीभ्यां यजेत। व्याहृतिभिर्वा यजे
त। व्याहृतिपक्षे देवतामादिश्य प्रणुयाद्यजेच्च। अयमाग्निर्भूर्भुवस्वरोम् इत्यनुवाक्या॥
ये यजामहेऽग्निं भूर्भुवस्वरोम् अग्निं वौषडिति याज्या। नमन्त्राभ्यां वा यजेत। इमाश्शृणु धीमहि म
हवमिति द्वे कल्पजे। एते द्वे नमन्त्रे प्रयुज्येते। याः पुनः शास्त्रांतरविहितास्तत्रैवोक्तयाज्या

देवते। वैश्वानरो अजीजनत् स्पृष्टो दिवीत्यग्नेर्वैश्वानरस्य। पर्जन्याय प्रगायत प्रवाता वांतीति पर्जन्यस्य। ४

मं० टि० नुवाक्याम्नगारोहेत्प्रभृतयस्तासां तथैव प्रयोगः। अग्निमंथनसंयुक्तानां वैराजतंत्रं भवति।

४० अग्निमंथनेपि धाय्ये एव केवलो नाविराजाविति केचित्। अथ चातुर्मास्यान्युच्यंते। तेषां फा

ल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रारंभः। प्रारंभमाणः पूर्वेद्युरन्वारंभणीयां वैश्वानरपार्जन्या

40 मिष्टिं कुर्यात्। अग्निर्वैश्वानरः पर्जन्य इति। पौर्णमासवदन्यत्। अग्न्याधेयप्रभृत्येत

द्देतानामनुक्रांतानामिष्टीनां प्रधानहवींःषु पांसुरेण। तत्रोत्सर्गेष्टिविमोष्टि वैश्वानरीव्रा २उ५

तपतीष्टिरस्येताश्च तत्र सूत्रकारोक्तानभवंति। ततस्तासामध्वर्युवशात्तंत्र स्वर एव।

चातुर्मास्येष्वपि वैश्वदेववरुणप्रघाससाकमेधशुनासीराणां प्रधानहवींःषु सावित्रमुपां ४०

शु। अथ प्रातर्वैश्वदेवीष्टिर्भवति। प्रेषितो होता स्थानाचमनेकृत्वा पश्चात्सामिधेनी

स्थानस्य पदमात्रे व वस्थाय प्रेषितो भिहिंकृत्य अग्निमंथनीया अन्वाह। अभित्वादेव

सवितारित्येका। मही द्यौः पृथिवी च न इत्येका। त्वामग्ने पुष्करादधीति तिसृणामर्धर्चे धिष्ठि
ष्ठारमेत्। आप्रैषात्। यद्यग्निः शीघ्रं न जायेत तदा एतस्मिन्नेवावसाने अग्ने हंसि न्यत्रिणं
इति नवर्चं सूक्तमावपेत्। पुनः पुनराजन्मनः। जातायेति संप्रेषितः। अनंतरेण प्रधावेन
धनंजयं रणे रणे मुतमश्रुवं तु जं तव इत्येतामुपसंतनोति। आयं हस्तेन खादिनमि
त्येका। अस्यार्धर्चे विरमेत्। प्रह्रियमाणायेति संप्रेषितः। विशामग्निं स्वध्वरं प्रदेवं
देववीतये इति द्वे। अग्निनाग्निरित्येका। त्वं ह्यग्ने अग्निनेत्येका। तं मर्जयंत सुक्रतुमित्ये
का। यज्ञेन यज्ञमित्येता परिधानीया। आद्योत्तमे त्रिः। अथ सामिधेनीस्थाने स्थित्वा सा
मिधेनीरन्वाह। पृथुपाजा अमर्त्य इति द्वे धाय्ये। आज्यभागौ वा वार्त्रघ्नौ। अष्टौ प्रधानदेवता।
आवाहयति। अग्निः। सोमः। सविता। सरस्वती। पूषा। मरुतः। स्वतवसः। केवलमरुतो वा। विश्वेदेवाः।

मं०दी०
८१

द्यावापृथिवीइति।अग्निमग्नआ३वह।सोममा३वह।अग्निमा३वह।सोममा३वह।सविता
रंआ३वह।सरस्वतीमा३वह।पूषणमा३वह।मरुतःस्वतवसआ३वह।मरुतपक्षेमरुत
आ३वह।विश्वांदेवाना३वह।द्यावापृथिवीउ०आ३वह।देवांआज्यपांइत्यादि।नवप्रया
जाः।प्राकृताश्चत्वारः।उरोअग्नआज्यस्यव्यंत्वित्यादिकाश्चत्वारः।येयजामहेस्वाहाग्निं
स्वाहासोमंस्वाहाग्निंस्वाहासोमंस्वाहाउ०सवितारंस्वाहासरस्वतींस्वाहापूषणंस्वाहा
मरुतःस्वतवसःमरुतपक्षेस्वाहामरुतःस्वाहाविश्वांदेवान्स्वाहाउ०द्यावापृथिवीस्वा
हादेवाइत्यादि।वार्त्रघ्नावाज्यभागौ।प्रधानस्य।अग्निर्मूर्धाभुवोयस्त्वस्येत्यग्नेः।सोम
यास्तेमयोभुवोयातेधामानिदिवीतिसोमस्य।आविश्वदेवंसत्पतिंवाममद्येतिसवि ८१
तुः।पावकानःसरस्वतीपावीरवीकन्येतिसरस्वत्याः।पूषंतवव्रतेवयंशुक्रंतेअन्यदितिपू

भ्याः। इहेह वः स्वतवसः अत्र मर्कं गणाते तुराय इति मरुतां स्वतवसां केवलं मरुतां मरु
तो यस्य हि क्षये राइ वेद वरमाजहे देवेति। विश्वे देवास आगत ये के च ज्मा महिन इति विश्वे
षां देवानां। मही द्यौः पृथिवी च नः। प्र पूर्वजे पितरा नव्यसीभिरिति द्यावापृथिव्योः। विरा
जौ सं याज्ये प्रेद्धो अग्न इमो अग्न इति। ये ३ यजामहे ● ग्निं स्विष्टकृतम याळग्निरग्नेः प्रि
या धामान्ययाट् सोमस्य प्रिया धामान्ययाट् सवितुः प्रि॰ सरस्वत्याः प्रि॰ पूष्णः प्रि॰ मरु
तां स्वतवसां मरुत पक्षे मरुतां प्रिया धामान्ययाट् विश्वेषां देवानां प्रिया धामान्ययाट् द्या
वापृथिव्योः ३ प्रिया धामान्ययाट् देवानामाज्यपानामित्यादि। नवानुयाजाः। देवं बर्हिरि
ति प्रथमः। अनंतरं देवीर्द्वार इत्यादि सूत्रोक्ताः षट्। देवो नराशंसः। देवो अग्निः ● स्विष्टकृ
दिति। सूक्तवाके। अग्निरिदं॰। सोम इ॰। अग्निरिदं॰। सोम इदं॰। सरस्वतीदं॰। पूषेदं हवि॰॥

जुषंतां हविरिमो अग्ने वीततमानीत्यादि। ३

मरुतः स्वतवस इदं हविरजुषंतावीवृधंत महोज्यायो क्रत। मरुत् पक्षे मरुत इदं० षं० धं० क्रत॥
विश्वेदेवा इदं० षं० धं० क्रत। द्यावापृथिवी इदं० जुषेतामवी० क्रातां। देवा आज्यपा इत्यादि॥
प्रस्तरांते वाजिनयागः। अनुयाजानां सूक्तवाकस्य शंयुवाकस्योपरिष्टात्। वाजिनयागः।
शंनो भवंतु वाजिन इत्यनुवाक्या। आदिश्य वाजेवाजेवत वाजिनो न इति ऊर्ध्वजानुरनुवा
नं यजति। प्रकृत्यैवोपरिष्टादनुवषट्करोति। अग्ने वीहि वौषट्। वाजिनस्याग्ने वीहि
तिवा। वाजिनभक्षमिडामिव प्रतिगृह्य। अध्वर्यु उपह्वयस्व। ब्रह्मन्नुपह्वयस्व। अग्नीद
पह्वयस्व। यजमानोपह्वयस्व। यन्मे रेत इति मंत्रेण प्राणभक्षं भक्षयेत्। ब्रह्मा च यजमान
एव प्रत्यक्षं भक्षयति। उपहूय यथाचमनक्रमेण संस्कारा इति विशेषः। पौर्णमासवदन्यत्॥ ८२
अथ पौर्णमासं कृत्वा चातुर्मास्यव्रतानि कुर्यात्। केशान्न वर्तयीत एवमादीनि कृतो भार्या

मुपेयात्। अथ पंचम्यां पौर्णमास्यां वरुणप्रघासा भवंति। तीर्थेन प्रविश्य पश्चाद्दर्शपौर्ण
मासिकाया वेदेर्निरसनोपवेशने कृत्वा प्रेषितोऽग्निप्रणयनीया अन्वाह। अभिहिंकृत्य
। प्र देवं देव्या धियेति तिस्रः। आद्यास प्रणवामुपांशु त्रिरन्वाह तृतीये वचने प्रणवेनाव
साय। अनुष्टुभस्य। अग्निमनु प्रजंनयमुष्य प्रदे वयुरित्याद्याः प्रतिपद्यंते। इळायास्त्वा पदे
वयमित्येका। अग्ने विश्वेभिरित्येका। अस्यार्धर्चारमेत्। निहितेऽग्नौ प्रेषितः कुलायिनमि
त्यर्धर्चेनसीद होतरित्येतामुपसंतनुयात्। नि होता होतृषदने विदान इति द्वे। उत्तमा परि
धानीया। परिधाय क्रमस्थाने निरसनोपविशो[illegible]ने कृत्वा भूर्भुवस्स्वरिति वाचं विसृजेत्।
अथ ब्रह्माग्निप्रणायनास्राकृष्णुचिर्भूत्वा तीर्थेन प्रपद्य। वृतोऽग्रेणाहवनीयं गत्वा निरस
नोपवेशने कृत्वोपविशति। अथाग्निभ्यां प्रणयने क्रियमाणे तदा वाग्यमनं दक्षिणतश्च

मं०टी०
८२
43

ब्रजंजपति। आश्रुःश्रीशानइतिसूक्तंसमाप्य। दक्षिणतोग्नेर्दक्षिणातोनिरसनोपवेशनेकृ
त्वाब्रह्मजपंजपति। इतिब्रह्मणोविशेषः। अथहविःष्वासन्नेषुहोतामंत्रितः। स्थानाचम
नेकृत्वातीर्थेनप्रविश्यअग्निमंथनादिपूर्वकंवैश्वदेववत्कुर्यात्। विशेषस्तूच्यतेआ
वाहने। पूषांतंवैश्वदेववत्आवाहनंकृत्वा। इंद्राग्नीआवह। मरुतआवह। वरुणमा
वह। उकंआवह। देवांआज्यपांइत्यादि। स्रुगादापनविशेषः। घृतवतीमध्वर्येःस्रुच
मास्य[illegible]थांदेवयुवंविश्ववाराइति। घृतवतीमित्यस्यपदस्य। स्रुचमित्यस्यनऊहः असम
र्थत्वात्। अत्रप्रधानदेवताः। अग्निःसोमःसवितासरस्वतीपूषाइंद्राग्नीमरुतोवरुणः
कइत्याद्यानांपंचानांयाज्यानुवाक्या। उक्तावैश्वदेवे। इंद्राग्नीअवसागतंश्नथद्वत्रमुत ८२
सनोतीतिइंद्राग्न्योः। मरुतोयस्याहिक्षयेराइवेदचरमाइतिमरुतां। इमंमेवरुणतत्वायामी

नवप्रयाजाः नव३

त्रिवरुणस्य। कयानश्चित्र आभुवद्धिरण्यगर्भ इति कस्य। वाजिनभक्षस उपकाले प्रातिप्रस्था
तातृतीयो भवति। वेदोऽस्यवेदो विदेयेति। द्वयस्य ग्रहणं। वेदद्वयं पत्न्यै प्रदाय वाचयेत्। वे
दौ स्थो वित्ती स्थो विदेय कर्मणी स्थः कर[illegible]णे स्थः क्रियासं सननी स्थः सनितारौ स्थः सनेयं
घृतवंतं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं। यं बहव इत्यादि। तौ विदेय प्र
जां विदेय काममायवां इति। सर्वमन्यद्वैश्वदेव्याः समानं। आहवनीयद्वित्वेऽपि यदेकवच
नः संप्रैषस्तदाहवनीयाभिधायिनां पदानां न ऊहः। यदा पुनरग्निभ्यां प्रणीयमानाभ्यां
अग्निभ्यां समिध्यमानाभ्यां। इति द्विवचनयुक्तः संप्रैषः क्रियते तदा कश्चिन्नोहः। तस्मादन्
नौ हे इत्येकत्वात्। निगदे त्वाहवनीयाभिधायिनां पदानामूहः कर्तव्यः। स उच्यते। अग्नी
महांतौ स्थो ब्राह्मणौ भारतौ। प्रवरोऽपि द्विवचनेनैव। अभिधायकत्वात्। वासिष्ठो मैत्रावरु

मं०२१०
४८
योकेडिन्याविति। देवेभ्यो मान्विधा हविष्कुतोविप्रानुमादितोकविशस्तोब्रह्मशंसितोघृताहव
नोप्रण्योयज्ञानांरथ्यावध्वराणांरथिनाविति केचित्। अत्र तौहोतारौ तृणः हव्यवाहो। आ
स्यात्रेजुहूको देवानांचमसोदेवपानावराश्वाग्नीनेमौदेवान्युवांपरिभुवोरुभआवहतंदे
वान्यजमानाय। अग्निमग्नीआश्वहतं। सोममाश्वहतं। अग्निमावहतमित्यादि। देवाआ
ज्यपांआवहतं। अग्निंहोत्रायावहतं स्वंमहिमानमावहतं। आवहतंजातवेदसौसुय
जसौयजतं। स्रुगादापने। अग्नीहोतारौवीतामग्नेर्हात्रं वेत्तुप्राविंत्रंसाधुतेयजमान
देवतायावग्नी। होतारमवृथाः। घृतवतीशब्दे विश्ववाराइतिपूर्ववत्। अस्मिन्पक्षेअव
शिष्टानामूहउक्तो घृतवतीमंत्रस्याअग्निंस्विष्टकृतमयाष्टामग्नावग्न्योःप्रियाधामा ४८
न्ययाष्टंसोमस्यप्रियाधामान्ययाष्टमग्नेरितिविशेषः। यक्षतामग्नेर्होतुःप्रियाधामा

नियस्तांस्त्वं महिमान [illegible] मायजेता मेज्याइषः कृणुतां ताव ध्वरो जातवेदसो जुषे

तां एतान्यत्राभिधानानि। यासां देवतानामेकस्मिंनेवाग्नौ यागः क्रियते तासामयाङ्ङ्श

द्वेनोहः। वेदोरुह इत्यस्य पूर्वस्मिन्नध्याय उक्तः। एवं रूपमूहनीयं। संस्थितायामवभृथं व्रजंति।

तत्रावभृथेष्टिः। कृताकृता तां सोमांते व्याख्यास्यामः। समाप्तावरुणप्रघासाः। द्वयोर्मा

सयोरैंद्राग्नः पशुः। तस्य प्रयोगस्तृतीयाध्याये वक्ष्यते। अथ द्वयोर्मासयोः साकमेधाः।

पूर्वेद्युस्तिस्र इष्टयः। अनुसवनं। पूर्वाह्णे अग्नयेनीकवतेष्टिः। तत्र आवाहने। आज्यभा

गावावात्य। अग्निमनीकवंतमावह। देवां आज्यपां इत्यादि। वार्त्रघ्नावाज्यभागौ। पंचमे प्र

याजे स्वाहाग्निमनीकवंतं स्वाहा देवा इत्यादि। अनीकवंतमूतय इति कल्पजानुवाक्या॥

सेनानीकेन सुविदत्र इति याज्या। प्रिया धामान्ययाळग्ने रनीकवतः। अग्निरनीकवानिदं

मं०द्वि० हविः। पौर्णमासवदन्यत्। माध्यंदिने मरुद्भ्यः सांतपनेभ्य इष्टिः। आवाहने। आज्यभागावा
८५ वाह्य। मरुतः सांतपनानावह। पंचमे प्रयाजे। स्वाहा मरुतः सांतपना[न्] स्वाहा। वृधन्वंतावा
भा ज्यभागौ। सांतपना इदं हवि यो नो मरुतो अभिदुर्हृणायुरिति प्रधानस्य याज्यानुवाक्ये। प्रि
याधामान्यया ष्म मरुतां सांतपनानां। मरुतः सांतपना इदं० पंता० धंत० कृत। पौर्णमा
45 सवदन्यत्। अपराह्णे मरुद्भ्यो गृहमेधिभ्य इति। आज्यभागप्रभृतीष्ठांता। स्थाना चमने
कृत्वा आज्यभागौ यजति। नात्र स्रुक्गादापनं। केचित्कुर्वीं पुष्टिमंतावाज्यभागयोः पुरोनु ति
वाक्ये नित्ये याज्ये। प्रधानस्य गृहमेधास आगत प्रबुध्या व ईरते महांसीति याज्यानुवा
क्ये। विराजौ संयाज्ये निगदोत्र भवति। अनिगदे इति वचनात्। ये३ यजामहेग्निं स्विष्टकृत ८५
मिमो अग्ने वीततमानि हव्येति। मरुतांन्यो गृहमेधिन इदं हवि० पं० धंत० कृत। पौर्णमा

सवदन्यत्। अथयस्यांरात्र्यांगृहमेधीयासंस्थितातस्यांरात्र्युषः कालेपौर्णदर्वंभवति॥
तत्रयदिपूर्वकारिणोवषट्कारमप्रदानंकुर्वंतोहोतारंचोदयेयुः। तदाहोताश्रुचिर्भूत्वाती
र्थेनप्रविश्यनिरसनोपवेशनेकृत्वापूर्णादर्विपरापतेतिद्वेकल्पजेयाज्यानुवाक्येब्रूयात्।
याज्यायामिंद्रंशतक्रतुमादिशेत्। अथक्रीडनेष्टिः। मरुतःक्रीडनोदेवता। आवाहने।
आज्यभागावावाह्य मरुतःक्रीडनआवह। स्वाहामरुतःक्रीडनः। उतस्रुवंतुजंतवो
यंक्रतुरगृभीतइतिपरोक्षवार्त्रघ्नौआज्यभागयोःपुरोनुवाक्ये। क्रीडंवःशर्धोमारुतम
न्यासोनयेमरुतस्वंचरतिप्रधानस्ययाज्यानुवाक्ये। जुष्टोदमूनाअग्नेशर्धमहतेसौभगा
येतिसंयाज्ये। प्रियाधामान्ययाण्मरुतांक्रीडिनांजुषतांहविरग्नेशर्धमहतेसौभगायेति।
मरुतःक्रीडिनइदंपौर्णमासवदन्यत्। अथमाहेंद्रीयेष्टिः। सावरुणप्रघासेनव्याख्याता॥

मं०१० ९६ विशेषस्तूच्यते। अष्टौप्रधानदेवताः। अग्निः सोमः सविता सरस्वती पूषा इंद्राग्नी इंद्रो वृत्रहे
द्रो वाति सृणां विकल्पः। विश्वकर्मेति। तत्र इंद्राग्नीपर्यंतानां वरुणप्रघासे आवाहनमुक्तं॥
इंद्रमावह। वृत्रहेंद्रमावह। महेंद्रमावह। त्रयाणां मध्ये अन्यतमः। विश्वकर्माणं आवह।
देवां आज्यपां इत्यादि। नवप्रयाजा उत्तमे प्रयाजे। ऐंद्राग्नपर्यंतं वरुणप्रघासवत्। स्वाहें
वा द्रं स्वाहा। वृत्रहेंद्रं स्वाहा। महेंद्रं स्वाहा। विश्वकर्माणं स्वाहा। देवा इत्यादि। वार्त्रघ्नावाज्यभागौ।
प्रधानस्य ऐंद्राग्नपर्यंतानां षण्णां वरुणप्रघासे उक्ता याज्यानुवाक्याः। इंद्रस्य याज्यानुवा
क्ये तु दर्शे उक्ते। महेंद्रस्य च। आ तू न इंद्र वृत्रहन्ननु देहापि मरुदिंद्रियायेति वृत्रहेंद्रस्य। वि
श्वकर्मन्हविषा वावृधानो या ते धामानि परमाणीति विश्वकर्मणः। स्विष्टकृतः। ये३ यजा ९६
महे ऐंद्राग्नांतं वरुणप्रघासवत्। लिंद्रस्य वृत्रहेंद्रस्य वा महेंद्रस्य वा० न्यया विश्वकर्मणः।

सूक्तवाके। ऐन्द्राग्नांतं वरुणप्रघासवत्। इंद्र इदं। वृत्रहेंद्र इदमिति वा। महेंद्र इदं। ह
विरिति वा। विश्वकर्मा इदं। वाजिनावभृथवर्जं वरुणप्रघासवत्। स्रुगादापनवेदग्रहण हन्य२
पत्नीवाचनानि प्रकृतिवत्। दक्षिणाग्नेरग्निमतिप्रणीय पित्र्या। तस्मिन्नग्नौ वा पित्र्या
नामेष्टिः कर्तव्या। यथा एवं तासां तंत्राउपांशु प्रयोज्या। आग्नेराद्ययउच्चैरेव। आवाहनादिमं
त्रस्वराणि। जपलोपो भवति। होतारमद्य यथा वषट्कारानुमंत्रणाभिहिंकारवर्जं। अत्र
जपशब्द मुपांशुत्वधर्मादिकं मंत्रोपलक्षणार्थः। वषट्कारानुमंत्रणस्य जपत्वाभावेपि
लोपप्रतिषेधत्वात् ततस्तूपांशु प्रयोज्याः सर्वे मंत्रास्तु यंते। यानि प्राङ्मुखानि तानि दक्षि
णामेव। प्राचीकृत्वा कर्तव्यानि। अथ होता मंत्रितः। स्थानाचमने कृत्वा। अतिप्रणीतविह
रं दक्षिणाग्निविहारं वा तीर्थेन वेदिश्रोण्यांतरयेत्येवमादि कृत्वा प्रविशेतो मिहिं कृत्वा उक्तं

मं०ध्रा० ८७

तस्त्वा निधीमहीत्येतामृचं त्रिरनवानमन्वाह ताः सामिधेन्यः। तासामुत्तमेन प्रयावेनावह दे
वान्पितृन्यजमानायेत्येवमंतं निगदमुपसंतनोति। अर्थादग्ने महाँ असीत्येवमादिनिगद
स्यार्षेयस्य लोपः। अस्मानिष्टो देवाः। पितरश्चेज्यत इति देवशब्दवत्सु मंत्रेषु देवशब्दान
तरं पितृशब्दं कुर्यात्। देवशब्दं केवलं न प्रयुंजीत। ईळामहै देवान्पितृनीळेन्यान्नमस्या
इति। इदं मे देवाः पितरो हविर्जुषंतामितीत्येवमादिषु। अर्थात्प्राप्तस्य प्रतिपत्तिवाक्यप
रो निगमार्थः। अतः प्रतिपत्तिवाक्यादन्यत्र पितृशब्दो न प्रयोक्तव्य इत्येके मन्यंते। आवह
देवान्पितृन्यजमानायेत्यवसाय। आज्यभागावावाद्य। पितॄन्सोमवतः आवह। अथ
वा सोमं पितृमंतं आवह। अनयोर्विकल्पः। पितॄन्बर्हिषदः आवह। पितॄनग्निष्वात्तान् ८७
आवह। यमपक्षे यमं आवह। वैवस्वतपक्षे वैवस्वतं आवह। देवां आज्यपां आवह। अग्निं

47

होत्रायेस्यस्यस्थाने अग्निं कव्यवाहनमावह। आवह जातवेदः स्वयजा यजेत्यावाहनं। अ
तऊर्ध्वं प्रादेशेणाभिमंत्रणादि नुप्यते। सीद होतरित्यध्वर्युणोक्तः। तूष्णीं होतृषदनमवे
क्ष्य तूष्णीं निरसनोपवेशने करोति। मंत्राणां क्रियाशेषत्वात् मंत्रलोपेपि क्रियाया न लो
पः। तूष्णीं जानु शिरसा बर्हिः उपस्पृश्य। स्रुगादापनमाह। बर्हिर्वर्जं चतुरः प्रयाजान्य
जति। उत्तमे प्रयाजे। ये३ यजामहे [illegible] स्वाहाग्निं स्वाहा सोमं स्वाहा पितॄन्सोमवतः स्वाहा
सोमं पितृमंतं वा स्वाहा पितॄन्बर्हिषदः स्वाहा पितॄनग्निष्वात्तान् यमंश्चेत्तदा स्वाहा यमं वै
वस्वतं चेत्स्वाहा वैवस्वतं [illegible] स्वाहा अग्निं कव्यवाहनं स्वाहा देवा इत्या
दि। आ नो अग्ने सुचेतुना त्वं सोम महे भगमिति जीवानुमंतावाज्यभागयोः पुरोनुवाक्ये। नित्ये याज्ये।
अथ होता ब्रह्मा च सव्योत्तर्युपरुषाः प्राचीनावीतिनो हविर्भिश्चरंति। उदीरतामवर उत्य

मं०टि० रासस्त्वयाहिनःपितरःसोमपूर्वइतिद्वे[illegible]नुवाक्येपितॄणांसोमवतांअर्धर्चमनवानंउक्त्वा
४८ शिष्टेनार्धर्चेनप्रणुयात्।यदाध्वर्युणाॐस्वधेतिप्रेषितः।तदाहोताये३स्वधामहइत्यागू
र्य।येस्वधेतिवाआगूर्यदेवतामादिश्यउपहूताःपितरःसोम्यासइतियाज्यामुक्त्वास्वाधान
मइतिवषट्करोति।नित्यःप्लुतःयः।एवमेवोत्तरेषामपिद्वेद्वेअनुवाक्येतृतीयायाज्या॥
त्वंसोमप्रचिकितोमनीषासोमाधेनुंसोममित्यनुवाक्या।त्वंसोमपितृभिःसंविदानइति
याज्यासोमस्यपितृमतः।बर्हिषदःपितरआहंपितॄनित्यनुवाक्ये।इदंपितृभ्यइतिया
ज्यापितॄणांबर्हिषदां।अग्निष्वात्ताःपितरोयेचेहपितरइत्यनुवाक्या।येअग्निदग्धाइति ४८
याज्यापितॄणामग्निष्वात्तानां।यमपक्षेइमंयमप्रस्तरमितिद्वेअनुवाक्ये।परेयिवांसमि
तियाज्यायमस्य।वैवस्वतस्याप्येताएव।अयंतुविशेषः।आद्योत्तमेअनुवाक्येमध्यमाया

ज्या। येतात्स्युर्देवत्रात्वदग्ने काव्येत्यनुवाक्या। समन्तश्येति याज्या। अग्नेः कव्यवाहनस्य। निगदो
न्नभवति। आवाहनेपि पित्र्यायामिति वचनात्। आग्नेयाग्निं कव्यवाहनमादिश्ययजेत्। प्रा
कृतंउपस्थंसव्यंचोभयोः। तूष्णीं पर्वाजनंइडाप्रकृत्याभवति। प्रकृत्यातऊर्ध्वमितिवचना
त्। इडानिगदेउपांशुप्रयोज्यं। अस्यलोपंकेचिदिच्छन्ति। यदाध्वर्यवोवषट्कारंक्रियाकु
र्वन्तितदाआज्यभागाभ्यामूर्ध्वंप्रकृत्याभवति। वषट्कारक्रियायांचोर्ध्वमाज्यभागाभ्यामि
तिवचनात्। उभयथापिजपादिलोपस्तुल्यएव। अन्यन्मंत्रलोपादिवचनात्। वषट्कार
क्रियापक्षेएकैकानुवाक्या। मध्यमाउद्धरेत्। योअग्निः कव्यवाहनस्त्वमग्नईडितोजात
वेदइतिसंयाज्ये। अनिगदएवइडामुपहूयावांतरेडांप्राप्यभक्षंभक्षयित्वाबार्हिष्यनुप्रह
रेयुः। इडाभक्षणंचात्रनास्ति। नमार्जनं। बर्हिर्वर्जयित्वानुयाजोयजति। सूक्तवाके। अग्नि

मं०दी० रिदं०सोमइदं०पितरः सोमवंतइदं०जुषं० वृधं०कृत।सोमः पितृमानिदं०जुष०य०कृत इतिवा।
४९ पितरोबर्हिषदइदं०जुषं०वृधं०कृत।पितरोग्निष्वात्ताइदं०जुषं० वृधं०कृत।यमपक्षे।यम
इदं।षत० वृध०कृत।वैवस्वतपक्षे।वैवस्वतइदं०जुष० वीवृधत०कृत।देवाआज्य०आ०।
49 अग्निःकव्यवाहनइदंहविरजुषता०अस्यामृधेत्यादिानचात्रनामादेशः।शंयुवाकःप्र
कृत्या।एतदंतापित्र्येष्टिः।संस्थितायांप्राग्वानुयाजाभ्यांदक्षिणावृत्त्वादक्षिणाग्निमुप
तिष्ठंते।अयाविष्ठेत्यनेनमंत्रेण।अनतिप्रणीतचर्यापक्षेअनावृत्त्यैवउपस्थानंकुर्यात्।
तथास्थितस्यैवाभिमुखत्वसंभवात्।उभयोरपिपक्षयोःआवृत्त्यैवगार्हपत्याहवनीयावु
पतिष्ठेत।सुसंदृशंत्वेत्यनयचाहवनीयं।अग्निंतंमन्यइत्यनयचागार्हपत्यं।अथमाप्रगा ४०
मअग्नेत्वंनइतिअष्टचतुष्केजपेत्।गार्हपत्यंगच्छति।पूर्वेयागार्हपत्यंसूक्तेसमापयति॥

यदि प्रागनुयाजादेव उपस्थानं तथा सत्यनाहूतो नुयाजादि कुर्यात्। यदि संस्थितायां सभ्या
हूतः संचरार्थं ब्रजति। तदाध्वर्यवो यदुपदिशन्ति तत्कर्तव्यं। अथ पित्र्यायां ब्रह्मत्वमुच्यते।
ब्रह्माशुचिर्भूत्वा दक्षिणाग्निविहारं तीर्थेन प्रविश्य। हूतो दक्षिणेनातिप्रणीतं गत्वा तूष्णीं
निरसनोपवेशने करोति। ब्रह्मजपश्चात्र न भवति। हुतजपत्वात्। प्रणीतातिसर्जनादिषु ज
व पान भवंति सर्वत्र। एतादेव भवति। प्रणायेत्यतिसृजेत्। सर्वत्रातिसर्जनेषु अतिसर्जनना
ममेव भवति। अथ प्राशित्रावेक्षणं तूष्णीमेव गृह्णाति। प्राशित्रं तूष्णीमेव प्राग्दंडं निदधा
ति। अथांगुष्ठोपकनिष्ठिकाभ्यां तूष्णीमेव गृहीत्वावघ्राय बर्हिष्यनुप्रहरेत्। तूष्णीमन्वा
चामेत्। अथ नाभ्यालंभनं तूष्णीमेव। अथ प्रविश्य प्रक्षाल्य प्राशित्रहरणं त्रिरपोनिनये
त्। न इळायां भक्षणं मार्जनं च ॐ प्रतिष्ठेत्येतावतेव मंत्रेण। समिधमनुजानीत। न च पूर्वो

मं०टी० जपः। ततः संस्थितायां सर्वप्रायश्चित्तानि समंत्रकाणि जुहुयात्। संस्थितायां प्रागेवानुयाजाभ्याम
५० ग्न्युपस्थानादि कुर्यात्। ततः संस्थाजपं करोतीति विशेषः। समाप्ता पित्र्या। त्र्यंबकेभ्यः प्रत्येत्य आदि
त्येष्ट्याचरंति। तस्यां धाय्ये विराजौ। आज्यभागावावाह्य। अदितिमावह। स्वाहादितिं। पुष्टिमंता
50 वाज्यभागयोः पुरोनुवाक्ये। अग्निना रयिमश्नवद्र्यपस्या नो अमीवहेति। नित्ये याज्ये। उत त्वा
मदिते महीमृत्सुमातरं सुव्रतानामिति प्रधानस्य। प्रैषो। प्रिया धामान्यया ळदित्याः। जुषतां
हविरिमो अग्न इत्यादि। अदितिरिदं हविः। पौर्णमासवदन्यत्। अनीकवतेष्टिमारभ्य एता इष्टयः।
साकमेधा उच्यंते। समाप्ताः साकमेधाः। अथ पंचम्यां पौर्णमास्यां शुनासीरीयेष्टिः कार्या। तस्यां
वैश्वदेववत्कल्पः। विशेषस्तूच्यते। दशप्रधानदेवता आपस्तंबोक्ताः। अग्न्यादिपूषांताः पंच। ५०
इंद्राग्नी विश्वेदेवा। इंद्रः शुनासीरः। वायुः सूर्य इत्येताः। पूषांता वैश्वदेव्यामुक्ता याज्यानुवाक्याः।

इंद्राग्न्योर्वरुणप्रघासेनोक्ते। विश्वेदेवासआगतयेकेचज्मा इति विश्वेषांदेवानां। इंद्रंवयं
शुनासीरमितिकल्पजानुवाक्या। अश्वायंतोगव्यंतइंतींद्रस्यशुनासीरस्य। सत्वंनोदेवम
नसेधानायप्रहुतिमितिवायोः। तरणिर्विश्वदर्शतश्चित्रंदेवानामितिसूर्यस्य। अत्रसूर्यः
उत्तमः। स्वपक्षेअष्टौदेवताः। वायुर्निर्युत्वान्वाशुर्वा। षष्ठः शुनासीरौ। इंद्रोवाशुनासीरः।
इंद्रोवाशुनः। एतेषांत्रयाणांअन्यतमः। सूर्योष्टमः। एषांतानामुक्ता याज्यानुवाक्याः। आवा
योभूषशुचिपाउपनः प्रयाभिर्यासिदाश्वांसमछेतिवायोर्नियुत्वतः। केवलवायोरुक्ते। शु
नासीराविमांवाचंजुषेथांशुनंनः फालाविकृषंतुभूमिमितिशुनासीरयोः। इंद्रस्यशुनासी
रस्योक्ते। शुनं [illegible]हुवेममघवानमिंद्रमश्वायंतोगव्यंतोवाजयंतइंतींद्रस्यशुनासीरस्य। त
रणिर्विश्वदर्शतश्चित्रंदेवानामुदगादनीकमितियाज्यानुवाक्ये। वाजिनवर्जं। अन्यदैश्वदेव

मं०२१० वत् कुर्यात्। समाप्य चातुर्मास्यानि सोमेन यजेत। अशक्तो वैंद्राग्नेन पशुना। अथवा पुनश्चा
५१ तुर्मास्यानि प्रयोक्तव्यानि। पुनः प्रयोगपक्षे। नवैश्वानरपार्जन्यावभ्यसेत्। चातुर्मास्यांगपशु
करणात्। अशक्तस्य सवनीयेष्टिर्बौधायनेन विहिता। तत्राग्निरिंद्रो विश्वेदेवा इति देवता।
51
अग्निर्मूर्धा भुवो यज्ञस्य रजसश्चेत्यग्नेः। एंद्र सानसिं प्रससाहिषे पुरुहूत शत्रून् नितींद्रस्य।
विश्वेदेवास आगत ये के च ज्मा महिनो अहिमाया इति विश्वेषां देवानां तत्र श्लोकः। चातु
सर्वेषु मास्येषु पशुयद्यत्र प्रयोजयेत्। ऐंद्राग्नमरुत्पक्षे मरुतो यस्य हि क्षये। इति मंचनाचार्यवि
रचितायां आश्वलायनसूत्रप्रयोगदीपिकायां द्वितीयोध्यायः। अथ सपशुचातुर्मास्येषु
कपिष्ठलपक्षे यो विशेषः स उच्यते। पूर्ववद्वैश्वानरपार्जन्यौ। प्रातर्वैश्वदेवपर्वणि अग्नि ५१
प्रणयनं भवति। परिधौ पशुं नियुंजंति। तत्र परिव्ययणीयामाह। अवस्नाना चमनेकृत्वा।

अग्निमंथनं भवति। नमः प्रवक्त्र इत्यादि जपः सामिधेनीषु। द्वयोरावाहने विशेषः। अग्नि
मग्न आवह। सोममा३वह। अग्निमा३वह। सोममा३वह। सवितारंआ३उपांशु। सरस्वती
मा३वह। पूषणमा३वह। मरुतः स्वतवस आ३वह। विश्वांदेवाना३वह। वनस्पतिमा३वह।
द्यावापृथिवी उं आवह। देवांआज्यपानित्यादि। संमार्गैः संमृज्य प्रवृताहुतीर्जुहोति। जु
ष्टो वाच इत्यादि कृत्वा प्रशास्तस्तीर्थेन प्रपद्यस्वेति प्रशास्तारं प्रपाद्य मित्रावरुणयोरिति मे
त्रेण दंडप्रदानं। मैत्रावरुणोपि दंडं मंत्रेण प्रगृह्य भूयास्मित्यंतेन। उत्तरेण होतारमतिव्र
ज्य दक्षिणेन दंडं हरेन्नचानेन संस्पृशेदात्मानं वान्यं वा प्रैषवचनात्तद्दक्षिणो होतृषदनात्स्व
ह्नो वस्थाय वेद्यां दंडमवष्टभ्य ब्रूयात् प्रैषान्। अग्निर्होता होतृषदनाभिमंत्रणादि स्रुगा। दा
पनांतं कृत्वा एकादश प्रयाजान्यजति। मैत्रावरुणेन होता यक्षदग्निं समिधेत्यादि प्रेषितः प्र

मं॰टि॰ षितो होता यथाप्रैषमाग्नीध्रो यजति प्रैषसूक्तिं गामिन्द्रैम्भिःसमिद्धो अग्न इति। अथ वायव्यपक्षि
५२ वापक्षेणाग्नीध्रान् व्याःदृशप्रयाजानिष्ट्वा। परि अग्नये इति प्रेषितो मैत्रावरुणो नमिहिंकृत्य अ
ग्निर्होतानः इति त्रचमन्वाह। आघोतमेत्रि ब्रूयात्। पुनःप्रेषितो अग्ने दग्निरिक्षुप प्रैषं ब्रूयात्। प्रैषमु
क्त्वा अंसतवेदि दंडं निदध्यात्। अथ होता अध्रिगुप्रैषं ब्रूयात्। दैव्याः शमितारः मेधपतिभ्यो मेधं।
प्रास्मा अग्निमित्यादि दक्षिणावृदावर्तते मैत्रावरुणस्य संज्ञपे पशावावर्तते। मैत्रावरुणोके प्रोतु मे ५
52 षितः जुषस्वसप्रथस्तममिति वेक इमंनो यज्ञमिति पंचर्चं सूक्तं। आघोतमे त्रिः। अथ होतातं
स्मिन्नेवासने पुनर्निरसनोपवशने कृत्वोपविशति। ततःपुनःस्रुगासादनमाह। होतायक्षदग्निं
स्वाहेति प्रैषः उक्तमाप्रीयाज्याः। सप्रैषपक्षे अग्निर्वृत्राणि त्वं सोमासि सत्पतिः आज्यभागयोः पुरोनुवा
क्ये मैत्रावरुणो ब्रूयात्। होता यक्षदग्निमाज्यस्य जुषतामित्यग्नेः प्रैषः। होता यक्षत्सोममाज्या
स्येति सोमस्य। ये ३॰ जुषाणो अग्निराज्यस्य वेत्विति याज्याग्नेः। ये ३॰ हे जुषाणः सोम आज्यस्य हविष ए म॰
इति सोमस्य याज्या। प्रैषपक्षे होतैव पौर्णमासवदाज्यभागौ यजति। अथ प्रधानानां। अग्निर्मूर्द्धेति ५२

वो यज्ञस्येत्यग्नेः सोमयास्ते या ते धामानीति सोमस्य। आ विश्वदेवं सत्पतिं वाममद्येति सवितुः। पूषं
तव व्रते वयं शुक्रं ते अन्यद्यजतं ते [illegible] अन्यदिति पूष्णः। इहेह वः स्वतवसः प्रचित्रम
र्कं गृणाते तुरायेति मरुतां स्वतवसां। अथ वैश्वदेवः पशुः तदनु वपाया आमिक्षायाश्व सहस्र
दानं। विश्वे अद्य मरुत इति पुरोनुवाक्या मे:स्य। होता यक्षद्विश्वान्देवानामिक्षाया अच्छागस्य वपा
या मेदसो जुषंतां हविर्होतर्यज। विश्वे देवाः शृणुतेमं हवं म इति होता यजति। चात्वाले मार्जयित्वा द्या
वापृथिवीभ्यां यजति। मही द्यौः पृथिवी च नः प्र पूर्वजे पितरा नव्यसीभिरिति याज्यानुवाक्ये। ततः
स्विष्टकृदादीडांतं कुर्यात्। अथ वैश्वदेवेन पशुपुरोडाशेन यजति। आ नो देवानामुप वेतु शं
स इति पुरोनुवाक्या मैत्रावरुणः। होता यक्षद्विश्वान्देवान्पुरोडाशस्य जुषतां हविर्होतर्यजेति प्रे
षः। ये के च ज्मा महिनो अहिमायेति याज्या। तत इडामप्सर्पणं। अथ हविर्यागः। अथ मनोतायै संप्रे

मं॰ टि॰ षितो मैत्रावरुणाः। अग्ने मिहिं हृत्स्य त्वं ह्यग्ने प्रथमो म[नो]तेति त्रयोदशर्चं सूक्तमन्वाह। आघो
५३ तमे त्रिः। आज्जो विश्व आस्कागमं नु देवा इति पुरोनुवाक्या। होता प सद्धि श्वान्द्वां छागस्य हविष आ
दत्तं घमध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः। घसं नूनं घासे अज्राणां यवस प्रथमा
53 नां सुमत् क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्साद
तोंगादंगादवत्तानां करं ने व विश्वे देवा जुषन्तां हविर्होतर्यज। इति प्रैषः। अग्ने याहि दूत्यं मारिषण्य इति या
ज्या। अस्या अर्द्धर्च आरमेत। ततो वनस्पतियागः। तत्रानुवाक्या प्रैषयाज्ये। देवेभ्यो वनस्पते हवींषी
त्यनुवाक्या। होता यक्षद्वनस्पतिं॰ धिता यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रि
या धामानि यत्र विश्वेषां देवानां छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र दे ए म०
वानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतं॰ वनस्पतिर्जुषतां हविर्होतर्य ५३

ज्ञेति प्रैषः। वनस्पते रशनया नियूयेति याज्या। अथ स्विष्टकृतः। अनुवाक्या प्रैषयाज्या। पिप्रीहि देवां
उशत इत्यनुवाक्या। होता यक्षदग्निं स्विष्टकृतमयाडग्निरग्नेराज्यस्य हविषः प्रिया धामान्ययाट् सो
मस्याज्यस्य हविषः प्रिया धामान्ययाड् विश्वेषां देवानां छागस्य हविषः प्रिया धामान्ययाड् वनस्पतेः
प्रिया पाथांस्ययाड् देवानामाज्यपानामित्यादि। अग्ने यदद्य विशो अध्वरस्येति याज्या। ततः इडावांत
रेळाप्राशनं च। ततः एकादशानूयाजाः। सूक्तवाकप्रैषः। अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः
पचन्पुरोळाशं गृह्णन्नग्नय आज्यं गृह्णन्त्सोमायाज्यं बध्नन्विश्वेभ्यो देवेभ्यश्छागं सूपस्था अद्य देवो वन
स्पतिरभवदग्नय आज्येन सोमायाज्येन विश्वेभ्यो देवेभ्यश्छागेन घस्तां तं मेदस्तः प्रतिपचताग्रभीषुरवी
वृधन्त पुरोळाशेन त्वामद्य ऋष आर्षेय। समाप्ते सूक्तवाके। आज्यभागावनु इत्यत्र अग्निः सोमः सविता स
रस्वती पूषा मरुतः स्वतवसो विश्वेदेवा द्यावापृथिवी इत्येतदनुद्रुत्य ततो देवा आज्यप इत्येवमादिशं

म॰रि॰३ सूक्तवाकांतं समापयति। अनूयाजानां सूक्तवाकशंयुवाकस्य वा परिष्टाद्वाजिनयागो भवति। ततः पात्नी
५४ संयाजादि प्रायश्चित्तांतं कृत्वा। हृदयशूलावभृथसंस्थाजपं करोति॥ ॥एवं सपशुषु चातुर्मास्येषु
वैश्वदेवपर्वसमाप्तं। अपशुसपशुषु चातुर्मास्येषु वरुणप्रघासे विशेषः स वक्ष्यते॥ ॥तत्राग्निप्रण
यनं तत्र केचिदध्वर्यवः एकवचनेन प्रैषं प्रयुंजंति। केचिद्द्विवचनेन। उभयत्राप्यग्निप्रणयनेन कश्चिद्वि
शेषः। द्विवचनपक्षे तु। अग्नेमहां असीत्यादिवाहनीयाभिधानेषु ऊहः कर्तव्यः। ततो यूपांजनं। अग्निमं
थनं॥ ततो नमः प्रक्र इत्यादि जपः सामिधेनीषु धाय्ये भवतः। आवाहने विशेषः। आज्यभागावावाह्य।
अग्न्याद्याः पञ्च देवता आवाह्य। इन्द्राग्नी आवह। मरुत आवह। वरुणमावह। वनस्पतिमावह। कं आ
वहेत्युपांशु। देवां आज्यपान्नित्येवमादि समापयति। संमार्गैः संमृज्य। प्रवृत्ताहुतीर्जुहोति। स्रुगादा एम॰
पने तु ऊहः। घृतवतीमध्वर्यो स्रुचमास्यस्वेत्यां देवयुवं विश्ववारा इति। प्रयाजादि वैश्वदेववत् आध्रिगोत् ५४

विशेषः॥ दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यो
मेधं॥ प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनो माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयू
थ्यः। उदीचीनां अनयोः पदो निधत्तात् सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादंतरिक्षमसुं दिशः
श्रोत्रं पृथिवीं शरीरे॥ एकधैकधानयोस्त्वचमाछ्यतात् पुरा नाभ्या अपिशसो वपामुत्खिदतादंतरे
वोष्माणं वारयध्वात् श्येनमनयोर्वक्षः कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसाच्छि
द्रे श्रोणीः कवषोरू स्रेकपर्णाष्ठीवंतः षड्विंशतिः षड्विंशतिरनयोर्वंक्रयस्ता अनुष्ठ्योच्याव
यताद्गात्रंगात्रमनयोरनूनं कृणुतादूवध्यगोहं पार्थिवं खनतात्॥ अस्ना रक्षः संसृजतात्॥ वनिष्ठु
मनयोर्मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः॥ अध्रिगो शमीध्वं सुशमिश
मिशमीध्वं शमीध्वमध्रिगा३उ। अपापा शमितारो यदत्र सुकृतं कृणवपास्मास्तत् यद्दुष्कृतमन्य

म॰टी॰२ अत तू। द्वयोः वपयोः अप्यमाणयोः। स्तोकस्नेसहूदेवा(सुगण)दापने। स्वाहाहृत्यैषः। उनमा
५५ सीयाज्या। आज्यभागादिपूषापर्यंतं वैश्वदेववत्कर्म भवति। इन्द्राग्नी अवसागतं। अयद्वृत्रमु
55 तसनोजितिवाजमिति इन्द्राग्न्योर्याज्यानुवाक्ये। अथ रक्षणाविहारे प्रतिप्रस्थाता नुःमारुतीमेषी
भवति। तदनुवपायाः आमिक्षायाश्च सह प्रदानं। शुचीवोहव्यामरुतः शुचीनामिति अनुवाक्या
। होतायक्षन्मरुतः आमिक्षायामेध्याः वपायामेदसोजुषंतांहविर्होतर्यजेति प्रैषः। प्रचित्रमर्कंग
णतेतुरायेति याज्या। एतदनुवाक्याप्रैषयाज्यामरुतोवपायाः॥ अथोत्तरविहारे अध्वर्योर्वारु
णीमेषीभवति। अवसिंधुंवरुणोद्यौरिवस्थादित्यनुवाक्या। होतायक्षद्वरुणः आमिक्षायामेवस्य
वपायामेदसोजुषंतांहविर्होतर्यज। इति प्रैषः। तत्त्वायामिब्रह्मणावंदमान इति याज्या। अनुवा एम॰
क्य॥ प्रैषयाज्यावरुणस्यवपायाः॥ माऽर्जयित्वा। कायेनैककपालेनचरति। कयानश्चित्रआभु॥ ५५

वद्धिरण्यगर्भः समवर्त्तताग्र इति याज्यानुवाक्ये कस्यास्विष्टकृदादीडान्तं कर्म भवति। अथानंत
रं पशुपुरोडाशेन चरंति। नू ष्ठिरं मरुतो वीरवंतमित्यनुवाक्या। होता यक्षन्मरुतः पुरोडाशस्य जु
षतां हविर्होतर्यजेति प्रैषः। अरा इवेदचरमा अहेवेति याज्या। मरुतां पुरोडाशस्यानुवाक्याप्रै
षयाज्याः। अथ वारुणेन पशुपुरोडाशेन चरंति। अयं सु तुभ्यं वरुण स्वधाव इत्यनुवाक्या। होता
यक्षद्वरुणं पुरोडाशस्य जुषतां हविर्होतर्यजेति प्रैषः। तदिन्नक्तं तद्दिवा मह्यमाहुरिति याज्या। ए
तद्वरुणस्य पशुपुरोडाशस्यानुवाक्याप्रैषयाज्याः। स्विष्टकृदादि मनोतापर्यंतं वैश्वदेववत्। तत्र
स्विष्टकृत्प्रैषविशेष उच्यते। होता यक्षदग्निं पुरोडाशयोर्जुषतां हविर्होतर्यजेति प्रैषः। अथानंत
रं हविर्यागः। आ वो होता जोहवीति सत्त इत्यनुवाक्या। होता यक्षन्मरुतो मेध्या हविष आदन्नद्य मध्यतो
मेद उद्धृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः। घसं नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां श

मं०टी०३ नरुद्रियाणामग्निघात्तानांपीवोपवसनानांपार्श्वतः श्रोणितःशितामतउत्सादतोंगादंगादव
५६ त्तानांकरदेवमरुतोजुषंतांहविर्होतर्यजेति प्रैषः।यावःशर्मंशशमानाय संतीतियाज्या।अ
नुवाक्याप्रैषयाज्यामारुत्स्याहविषः।एवावंदस्वरुणंबृहंतमित्यनुवाक्या।होता[illegible]यक्षद्व
56 रुणस्यमेषस्यहविषआदद्यमध्यतोमेदउद्धृतंपुराद्वेषोभ्यःपुरापोरुषेय्यागभः।घसंनूनंघा
सेअज्राणांयवसप्रथमानांसुमत्क्षराणांशतरुद्रियाणामग्निघात्तानांपीवोपवसनानांपार्श्वतः
श्रोणितःशितामतउत्सादतोंगादंगादवत्तानांकरदेवंवरुणोजुषतांहविर्होतर्यजेतिप्रैषः।अ
स्तभ्नाद्द्यामसुरोविश्ववेदाइतियाज्या।अनुवाक्याप्रैषयाज्यावरुणस्यमेषस्यहविषः।वनस्प
तियागादिसर्वप्रायश्चित्तांतंवैश्वदेवेनव्याख्यातं।तत्रप्रैषेयोविशेषःसउच्यते।होतायक्षद्वन एम०
स्पतिमभिहिपिष्टतमयारभिष्ठयारशनयाधितायत्राग्नेराज्यस्यहविषःप्रियाधामानियत्रसोम ५६

स्याज्यस्य हविषः प्रिया धामानि यत्र मरुतां मेष्या हविषः प्रिया धामानि यत्र वरुणस्य मेषस्य हविषः प्रि
या धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धा
मानि तत्रैतौ प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षत् रभीयसा इव कृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्हो
तर्यजेति प्रैषः। ये३ स्विष्टकृते प्रैषः। होता यक्षदग्निं स्विष्टकृतमयाडग्निरग्नेराज्यस्य हविषः प्रिया
धामान्ययाट् सोमस्याज्यस्य हविषः प्रिया धामान्ययाट् मरुतां मेष्या हविषः प्रिया धामान्ययाट् वरु
णस्य मेषस्य हविषः प्रिया धामान्ययाट् वनस्पतेः प्रिया पाथांस्ययाट् देवाना॰ यक्षदग्नेर्होतुरिले वंस
मापयति। अपस्रुत्क वाक प्रैषः। अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान्
गृह्णन्नग्नये आज्यं गृह्णन् सोमायाज्यं बध्नन् मरुद्भ्यो मेषीं बध्नन् वरुणाय मेषं सूपस्था अद्य देवो वनस्पति
रभवदग्नये आज्येन सोमायाज्येन मरुद्भ्यो मेष्या वरुणाय मेषेणाघस्तां तं मेदस्तः प्रति पचताग्रभीषु

मं·टी०३ रवीष्टघंतपुरोडाशाभ्यांतामघस्वपथ आर्षेयेति समानं। अथानंतरमवभृथेष्टिहृदयशूलादिसंस्था
५२ जपांतं समानं॥ तत्रायं विशेषः। स्वपस्थो यो सां द्वेष्टियं च वयं द्विष्मस्तमभिशोचतं॥ ॥एवं वरुणप्रघा
सिकं कर्मसमाप्तं॥ ॥अथ पश्चाद्दैघं प्रियवर्ज्जं साकमेधा उच्यंते। आमाहेन्द्राः प्रकृतिवद्दृष्टव्याः। अथ
57 माहेन्द्री तस्यां वरुणप्रघासवत्कर्म भवति। तत्रायं विशेषः। अग्निमग्न आवह। सोमोमें वहेत्याज्यभागौ।
अग्निमावह। सोममावह॥ सवितारं आवह। सरस्वतीमावह। [illegible]। पूषणमावह। इन्द्राग्नी आवह। इन्द्रं
वृत्रहणमावह। वनस्पतिमावह। विश्वकर्माणं आवह। उपांशु देवं आज्यपां आवहेत्यादि समानं। अ
ध्रिगो विशेषः। मेधपतये मेधमिति। अपवरुणप्रघासवत् देवता यजंति। ततः इन्द्रस्य वृत्रहस्य चरो
र्वपाया अश्वसहावदानं। तत्रानुवाक्याप्रैषयाज्यंपास्तुकं भवति। अभिक्रत्वेन्द्र भूरधज्मन्निलनुवाक्या गम०
। होतायक्षदिन्द्रं वृत्रहणं चरोः छागस्य वपाया मेदसो जुषतां हविर्होतर्यजेति प्रैषः। सह दानुं पुरुहूत क्षियं ५२

नमितियाज्या। मार्जयित्वा वैश्वकर्मणो नैककपालेन चरंति। विश्वकर्मन्हविषा वावृधान याते धामा

णि यावमेति विश्वकर्मणो याज्यानुवाक्ये। स्विष्टकृतादीच्छांतं पूर्ववत्। अथ पशुपुरोडाशस्यानुवाक्या

। त्वं महाँ इन्द्र तुभ्यं ह क्षा इत्यनुवाक्या। होता यक्षदिंद्रं वृत्रहणं पुरोडाशस्य जुषतां हविर्होतर्यजेति प्रे

षः। स्तुत इन्द्रो मघवा यद्ध वृत्रेति याज्या। अथ स्विष्टकृतादि समानं कर्म भवति। अथ हविर्यागः। तत्रानु

वाक्या प्रैषयाज्याः। सत्राहणं दाधृषिं तुम्रमिन्द्रमित्यनुवाक्या। होता यक्षदिंद्रं वृत्रहणं छागस्य हविष आ

द्दद्य मध्यतो मेद उद्भृतं पुरा० घसं नूनं गादंगादवत्तानां करदेवमिन्द्रो वृत्रहा जुषतां हविर्होतर्यजे

ति प्रैषः। एवा वस्व इन्द्रः सत्यः सम्राडिति याज्या। अथ वनस्पति प्रैषे विशेषः। यत्रेन्द्रस्य वृत्रघ्न छाग

स्य हविषः प्रिया धामानि यत्र वनस्पते रित्येवमादि समानं। अथ स्विष्टकृत्प्रैषे विशेषः। प्रिया धामान्यया

डिन्द्रस्य वृत्रघ्नः छागस्य हविषः प्रिया धामान्ययाड् वनस्पतेरित्येवं समानं। सूक्तवाकप्रैषे विशेषः। गृहं

मं०टी०३ नग्नय आज्यंग ह्लन्सोमायाज्यंग ह्लानिन्द्राय वृत्र घ्ने छागं स्वप्स्था अद्य देवो वनस्पतिरभवदग्नय
५८ आज्येन सोमायाज्येनेन्द्राय वृत्र घ्ने छागेनाघस्तां तं मेदस्तः प्रति पचताग्रभीदवीवृधत पुरोळाशेन
त्वामद्य ऋषे वमादिसमानं। हृदयस्पूलादि संस्था जपांतं समानं॥ ॥एवं साकमेधिकं कर्म समाप्तं॥ ॥
58 अथ शुनासीरीयाइष्टिः॥ ॥सा वाजिनं वर्जं समाना वैश्वदेव्या। पञ्च देवताः पूर्ववदावाह्या। ततः पशु
देवता। वायुं नियुत्वंतं आवह। उपांशु। वनस्पतिमा। इन्द्रं शुनासीरमावह। सूर्यं आवह। उपांशु। अ
ग्निगो विशेषः। मेधपत येमेधमिति। वैश्वदेववत्संचर देवता इष्ट्वा। ततः पाशुकं तंत्रं। पयसश्चवपाया
श्च सहप्रदानं। आवायो भूष शुचिपा उप न इत्यनुवाक्या। उपांशु। हेनाय स्मत् वायुं नियुत्वंतं उपांशु
। पयसश्छागस्य वपाया मेदसो जुषतां हविर्होतर्यजेति प्रैषः। पीवो अन्नां रयिवृधः सुमेधा इति या रा०म०
ज्या। उपांशु मार्जयिता। इन्द्रः शुनासीरादिकांतं करोति। ततः पशुपुरोळाशेन चरंति। प्रयाभिर्या ५९

सिसृप्स्वां समच्छेत्यनुवाक्या। उपांशु। होता यक्षत् वायुं नियुत्वंतं उपांशु· पुरोडाशस्य जुषतां उपांशु हवि
र्होतर्यजेति प्रैषः। राये नु यं जज्ञतू रोदसीमे इति याज्या। उपांशु। स्विष्टकृतादि समानं करोति। अथ पशुहवि
र्यागः। आ नो नियुद्भिः शतिनीभिरध्वरमित्यनुवाक्या। उपांशु। होता यक्षत् वायुं नियुत्वंतं उपांशु· छाग
स्य हविषः आ[illegible]दत् उपांशु· अद्य मध्यतो मेदउद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः। घसत् उपांशु·
नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्व
तः श्रोणितः शितामत उत्सादतोंगादङ्गादवत्तानां· करत् उपांशु· एव वायुर्नियुत्वान् जुषताम् उपांशु· हवि
र्होतर्यजेति प्रैषः। प्र वायुमच्छा बृहती मनीषेति याज्या उपांशु। ततो वनस्पतिप्रैषे विशेषः। यत्र वायोर्नि
र्नियुत्वतः उपांशु छागस्य हविष इत्येवमादि समानं। अथ स्विष्टकृत्प्रैषे विशेषः। प्रिया धामान्ययाट् वायो
र्नियुत्वतः उपांशु प्रिया धामान्ययाडित्येवमादि समानं। अथ सूक्तवाकप्रैषे विशेषः। वधन् वायवे नियुत्व

मं॰टी॰२ ते उपांशु छागं सूपस्था अघदेवो वनस्पतिरभवदग्नये आज्येन सोमायाज्येन वायवे नियुत्वते । उ
५९ पांशु छागेनाघस्तां उपांशु तस्मै दत्तः प्रतिपचताग्रभीद्वीवृधत उपांशु पुरोडाशेन त्वामद्येऽस
वृमादृिसमानं । अवभृथादि संस्थाजपां ते समानं । एवं शुनासीरीया इष्टिः समाप्ता ॥ ॥ इति कृषिष्ठल
59 सूत्रस्थानि सपशुचातुर्मास्यानि समाप्तानि ॥ ॥ अथ पशुबंधप्रयोगो वक्ष्यते । पशवश्च द्विविधाः ।
सोमिका निरूढाश्चेति । तत्राग्नीषोमीयप्रकृतिकाः सौमिकाः । निरूढाश्चैन्द्राग्नप्रकृतिकाः । इदानीं निरू
ढानां प्रकृतिभूतस्यैन्द्राग्नस्य निरूढस्य पशोः प्रयोग उच्यते । स च षट्सु मासेषु संवत्सरे वा कर्त्तव्यः ।
निर्मितैन्द्राग्नः षाण्मास्यः सांवत्सरिको वेत्युक्तत्वात् । तस्य पुरस्तादुपरिष्टाच्चेष्टिर्भवति । अथवा
पुरस्ताद्देवतोपरिष्टात् । उपरिष्टाद्वा न पुरस्तात् । सा चेष्टिराग्नेयी भवति । आग्नावैष्णवी ए म॰
वा । अथ पुरस्तादाग्नेयी उपरिष्टादाग्नावैष्णवी । आग्नेय्यामुक्तौ याज्यानुवाक्ये । अग्नाविष्णू सजोष ५९

साऽग्नाविष्णू सहिधामेत्यग्नाविष्णवोः। पौर्णमासवदन्यत् संस्थाजपवर्जं। येयमिष्टिः पशोरुभयतो
रन्यतरतो वा विहितास्मा निरूढे पशौ वा वेदिर्न व्यानसौमिके पु। अग्निप्रणयनं वरुणप्रघासवत्। स्थाना
चमने कृत्वा चात्वालोत्कर एवं तरेण विहारं प्रविश्य पश्चात्स्थानुबंधिकाया वेदेर्निरसनोपवेशने कृत्वा।
प्रेषितो मिहिं कृत्वा यूपांजनीयाऽन्वाह अंजंति त्वामध्वरे देवयंत इत्युत्तमेन वचनेनार्द्धर्चोरमेत्।
आउच्छ्रीयमाणसंप्रेषात्। अपसंप्रेषितो य ऊर्ध्वस्तिष्ठा इत्यर्द्धर्चेन उच्छ्रयस्व वनस्पत इत्युपसंतनो
ऊर्ध्व तिा समिद्धस्य श्रयमाण इत्येकॉ ऊर्ध्व ऊ षु ण ऊतय इति द्वे। जातो जायते सुदिनत्वे अह्नामित्यर्द्धर्चोरमेत्। आ
परिवीयमाणानु। परिवीयेति संप्रेषितः। युवेति धीरा इत्यर्द्धर्चेन युवा सुवासा इत्येतयोपसंतनस्तयाप
रिदध्यात्। अथाग्निमंथनीयायामामंत्रितः। स्थानाचमने कृत्वा तीर्थेन प्रविश्य। वैश्वदेव्यामुक्तन्यायेन
अग्निमंथनीया अन्वाह। अथाग्नये समिध्यमानायेति प्रेषितः। वेदिश्रोण्योत्तरयेत्येवमादिना धर्मेण

मं॰टी॰२ स्थित्वा। नमः प्रवक्ष्य इत्यादि सप्तदश सामिधेन्यः। आवाहनं। पश्चादाज्यभागौ वैकल्पिकौ। करण
६० पक्षे आज्यभागावावाह्यौ। इन्द्राग्नी आवह। वनस्पतिमावह। देवां आज्यपानित्यादि। आज्यभा
60 गयोरकरणपक्षे। इन्द्राग्नी अग्न आवह। अग्न आवहेति तु प्रथमदेवतां इति वचनात्। वनस्प
तिमावहेत्यादि समानमत ऊर्ध्वं। संमार्गादि। अपस्पर्शान्तं पौर्णमासवत् कृत्वा प्रहृताहुतीर्जुहोति।
प्रत्यग्दगाहवनीयादवस्थायेत्येवमादिना धर्मे प्राञ्जुष्टो वाचे भूयासं इति एकामाहुतिं कृत्वा। ततः
पुनरादाय सहद्रुही तेन पञ्चाहुतीर्जुहोति। स्वाहा वाचे। स्वाहा वाचस्पतये। स्वाहा सरस्वत्यै। स्वाहा
सरस्वते। महोभ्यः संमहोभ्यः स्वाहा। इति पञ्चभिर्मन्त्रैः। अत्र स्वाहा वाच इत्यादीनां चतुर्णां मंते स्वाह
कारेण कर्त्तव्यः। मंत्रादावेव पठितत्वात्। तथा चोक्तं। स्वाहाकारं तेर्मन्त्रे न चेन्मंत्रे पठितः इति। सवनी एम०
यपशावेवायं होमो नान्यत्रेति केचित्। एषां मंत्राणां लिङ्गोक्ता देवताः। उत्तमस्य तु ब्रह्मा। अथ प्रशस्त ६०

स्तीर्थेन प्रपद्यस्वेति प्रशास्तारं तीर्थेन प्रपादयति। एवमुक्तो मैत्रावरुणश्चात्वालोत्करावंतरेणाभिहुतोत्त
रेण पादेन विहारं प्रपद्यते। होतारमसौ प्रत्यङ्मुखायावस्थिताय प्राङ्मुखो दंडं प्रयच्छति दक्षिणोत्तराभ्यां
पाणिभ्यां। मित्रावरुणयोस्त्वेत्यनेन प्रयच्छामीति मंत्रेण। ततः प्रशास्ता तथाभूताभ्यामेव पाणिभ्यां होतृपा
र्श्वयोरधस्ताद्गृह्णाति। मित्रावरुणयोस्त्वा प्रतिगृह्णाम्यवक्रो विधुरो भूयासमित्यनेन प्रतिगृह्य। उत्तरेण हो
तारमतिव्रजेद्दक्षिणेन दंडं हरेत्। न च दंडेनात्मानमन्यं वा कंचिदुपस्पृशेत्। आप्रैषवचनात्। होतृषदनं
वेदिश्रोण्योत्तरेण गत्वा दक्षिणतो होतृषदनाद्दक्षिणं प्रह्वो वस्याय प्रेषितो वेद्यां दण्डमवष्टभ्य ब्रूयात्। होता
होतृषदनाभिमंत्रणादि स्रुगादापनं प्रकृतिवत्करोति। अथैकादश प्रयाजा भवंति। तेषां प्रैषाः होता य
क्षदग्निं समिधा सुषमिधेत्येतत्प्रथमं प्रैषसूक्तं। अध्वर्युणा प्रेषितः प्रेषितः मैत्रावरुणः प्रैषैर्होतारं प्रेष
येत्। होता यजत्याप्रीभिः। तत्रापि तनूनपान्नराशंसयोर्व्यवस्था प्रकृतिवद्द्रष्टव्या। अथाप्रीव्यवस्थोच्यते। स

मं०टी०२ मिद्धो अद्य मनुषो दुरोण इत्येतत्सूक्तं। तत्र आप्रीणां नाराशंसं स्येव द्वितीयाभवति। अस्य सूक्तस्य द्वि
६१ तीयामुत्स्य सनराशंसस्य महिमानमेषामित्येतां वसिष्ठादीनामावपेत् इति वृत्तिकारेणोक्तं। यथ ऋ
षिवा आप्रियो भवंति। तत्र यथ ऋषि आप्रीविभागार्थं भगवता शौनकेन श्लोक उक्तः। कएवोंग्निरेगस्त्यः
61 शुनको विश्वामित्रोऽत्रिरेव च। वसिष्ठः कश्यपो वध्र्यश्वो जमदग्निरथोत्तम इति। सुसमिद्धो न आवहेत्येतत्सू
क्तं प्रथमं कण्वानां। समिद्धो अग्न आवहेति द्वितीयं तद्व्यतिरिक्तानामांगिरसां। समिद्धो अद्य राजसीत्यगस्त्या
नां। समिद्धो अग्निर्निहित इति शुनकानां। समित्समित्सुमना इति विश्वामित्राणां। सुसमिद्धाय शोचिष इति
अत्रीणां। जुषस्व नः समिधमिति वसिष्ठानां। समिद्धो विश्वतस्पतिरिति कश्यपानां। इमां मे अग्ने समिधं
जुषस्वेति वध्र्यश्वानां। समिद्धे अघेति शुनकवध्र्यश्वव्यतिरिक्तानां भृगूणामिति यथर्ष्याप्रीविवेकः। प्रा एम०
ज्यापत्ये तु पशौ शुनकवध्र्यश्ववसिष्ठसहितानां सर्वेषामपि जामदग्न्या एव। समिद्धो अद्य मनुषो दु ६१

रोण इत्येता भवंति। अत्रापि नाराशंसोऽस्येव वा स्विष्टौ द्वितीया भवति। इत्याप्री व्यवस्था। अथ प्रयोगानुसारेण र
शासु प्रयाजेषु समाप्तेषु। पर्यग्नये प्रेषितः प्रशास्ताऽनभिहिंकृत्य अग्निर्होतान इति त्रचमन्वाह॥ शस्ते
ष्वेव होत्रकाणामभिहिंकार इति वचनात्। आ धोन मेत्रिर्ब्रूयात्। पुनः प्रेषितः अजेदग्निरित्युपप्रैषं अन
वान मुक्त्वा अंतर्वेदि दण्डं निधाय आसीत इतः प्राग्दण्डस्य निधानं न कर्तव्यं। अत्र प्रसंगादध्रिगोरूहा
नि पदानि वक्ष्यंते। मेधपतये। मेधपतिभ्यां मेधपतिभ्यः। मेधं॥ मेधौ। मेधान्। मेधां। मेधे। मेधाः। एवं वा। अ
स्मै। आभ्यां। एभ्यः। अस्यै। आभ्यां। एभ्यः। एनं। एनौ। एनान्। एनां। एने। एनाः। अस्य। अनयोः। एषां। अस्याः।
अनयोः। आसां। शारीरं। शारीरे। शारीराणि। त्वचं। त्वचौ॥ त्वचः। वपां। वपे। वपाः। वक्षः। वक्षसी। वक्षांसि। बा
हू। बाहून्। दोषणी। दोषाणि। अंसौ। अंसान्। अच्छिद्रं। अच्छिद्राः। श्रोणी। श्रोणीः। ऊरू। ऊरून्। अष्टीवंतौ।
अष्टीवंतः। वनिष्ठुं। वनिष्ठू। वनिष्ठून्। इत्येवमूहः। मेधं। सप्तभ्यः। शारीरं। वाक्यध्यानात्। अनूनं कृणुतात्। स

मे॰ ६।०३ नेतात्। संस्रजनात्। एव शमितारः। अध्रिगाउ। अपापाः। इत्येतान्यवसानानि। अपप्रयोगः। होताध्रि
६२ गुं यथापठितमेवाह। दैव्याः शमितारः आरभध्वमित्यादि। अपापेत्येव मंत्रः सूत्रपठितो मंत्रोऽध्रिगु
62 रुच्यते। तत्रास्तारस्तः संस्रजनात्। शमितारः। अपापाः। एतानि यथास्थानं उपांशु। अध्रिगो शमीध्वमित्या
दिभिः उक्त्वा। शमितारो यदत्र सुकृतमिति जपित्वा। दक्षिणावृदावर्त्तते होता मैत्रावरुणश्च। स व्यावृ
त्तौ अलयजमानौ। केचित् पत्नीमावर्त्तनमिति वदंति। संज्ञप्ते पशावावर्त्तेरन्। अथ मैत्रावरुणः प्रेषितः
स्तोकेभ्योन्वाह। पूर्ववद् एउ मासायानभिहिं कृत्वा जुषस्व सप्रथस्तममिति लोका। इमन्नो यज्ञमिति पंचर्चं सू
क्तं। आघोतमेति। अथ होतानस्मिन्नेवासने पुनर्निरसनोपवेशने कृत्वोपविशति। होता स्रुगादापने
पश्चाक्रिनिवचनात्। ततः स्रुगादापनमाह। अथ प्रेषितः प्रशास्ता। होता यक्षदग्निं स्वाहाज्यस्येति प्रेषं ब्रूया राम॰
त्। होता आप्रैकैः जमयपचायजति। कात्र आवाज्यभागौ। प्रेषे वैकल्पिकौ। अप्रेषपक्षे याज्यानुवाक्ये हे ६२

=६ लोकानुवचनार्थमात्तस्य दंडस्यात्रैव नियातंनमागितिवृत्तिः ६=

ताब्रूयात्। पौर्णमासवदन्यत्। संप्रेषपसे अनुवाक्या प्रेषं मैत्रावरुणो ब्रूयात्। होतायक्षदग्निमा
ज्यस्य जुषतां हविर्होतर्यजेति पूर्वस्याज्यभागस्य प्रेषः। होतायक्षत्सोममाज्यस्य जुषतां हविर्होतर्यजेत्यु
त्तरस्य। सर्वत्र होतायक्षदिति प्रेषादिर्होतर्यजेति प्रेषांतः। ये३यजामहे जुषाणो अग्निराज्यस्य वेतु वौ३
षट्। ये३यजामहे जुषाणः सोम आज्यस्य हविषो वेतु वौषट्। देवतादेशो न कर्त्तव्यः। प्रेषत्वात्। अपवपा
यागः। आ वृत्रहणा वृत्रहभिरित्यनुवाक्या। होतायक्षदिन्द्राग्नी छागस्य वपाया मेदसो जुषेतामिति प्रे
षः। प्रुचिन्नु स्तोममिति याज्या। चात्वाले मार्जयंते। प्रशास्ता दण्डं निधाय मार्जनं करोतीति ब्रह्मा च। इ
दमापः प्रवहतेत्येतयर्चा। सुमित्रिया न द्विषम इत्यनेन मंत्रेण द्वाभ्यां। तीर्थेन निष्क्रम्य होतृमैत्रावरुणो
आसीनौ। आ पुरोळाशश्रपणात्। अथ ते पुरोडाशे अनामंत्रिता एव तीर्थेन प्रविश्य पुरोडाशेन चरंति।
आ भरतं शिक्षतमित्यनुवाक्या। होतायक्षदिन्द्राग्नी पुरोडाशस्य जुषेतां हविर्होतर्यजेति प्रेषः। गीर्भिर्विप्रः

मं॰ दी॰ ३ तियाज्या। अथ पुरोडाशस्य स्विष्टकृत्। इडामग्न इत्यनुवाक्या। होता यक्षदग्निं पुरोडाशस्य जुषतां ह
६३ विर्होतर्यजेति प्रैषः। स्वदस्व हव्येति याज्या। निगदोऽत्र न भवति। पशौ चेति वचनात्। प्रकृतिवदिडोपाह्वा
नं। कर्मितान्मैत्रावरुणोपीडां भक्षयति। अत्र न मार्जनं। एतावन्मार्जनं पशाविति वचनात्। ततो दक्षिणा
63 ग्रहणं। अथ मनोतायै संप्रेषितः प्रशास्ताग्नभिर्हृत्या। त्वं ह्यग्ने प्रथमो मनोतेति त्रयोदशर्चं सूक्त
मन्वाह। आघोत्तमे त्रिः। अथ हविर्यागः। उभा वामिन्द्राग्नी इत्यनुवाक्या। होता यक्षदिन्द्राग्नी छागस्य
हविष आत्तामघेत्यादि घस्तां नूनं करत एवेन्द्राग्नी जुषेतां हविर्होतर्यजेति प्रैषः। प्रचर्षणिभ्यः पृतनाह
वेष्विति याज्या। अर्द्धर्चे मेदसाहोमार्थं। वसाहोमे कृते उत्तरमर्द्धर्चं ब्रूयात्। अथ वनस्पतियागः। देवे
भ्यो वनस्पते हवींषीत्यनुवाक्या। होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित। यत्रा एम०
ग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्रेन्द्राग्न्योश्छागस्य हवि ६३

षः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया
धामानि तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयांसमिव कृत्वी करद्देवं देवो वनस्पतिर्जुषतां ह
विर्होतर्यजेति प्रैषः। एवं सर्वत्र देवतावाहनक्रमेण देवतानिगमः येतत्। आज्यभागयोरकरणप
क्षे यत्राग्नेराज्यस्य यत्र सोमस्याज्यस्येत्युद्धरेत्। वनस्पतिः स्विष्टकृत्स्रुक्त्वाके च। वनस्पते रशनया
नियूयेति याज्या। अथ स्विष्टकृतः। पिप्रीहि देवानित्यनुवाक्या। होता यक्षदग्निं स्विष्टकृतमयाडग्निर
ग्नेराज्यस्य हविषः प्रिया धामान्ययाट् सोमस्याज्यस्य हविषः प्रिया धामान्ययाडिन्द्राग्न्योश्छागस्य
हविषः प्रिया धामान्ययाड्वनस्पतेः प्रिया पाथांस्ययाड् देवानां यक्षदग्नेः हविर्होतर्यज। अग्नेयदद्येति
याज्यानिगदोऽत्र न भवति। आदेशाश्च न कर्तव्यः। पशौ चेत्युक्तत्वात्। प्रेषत्वात्। प्रेषत्वाच्च। पूर्ववदिडो
पाह्वानं। इडां मैत्रावरुणोऽपि भक्षयति। न मार्जनं। एतावन्मार्जने पशौ चेति यच्च नान्। अथ पेकादशा

मं·टी·३ अनुयाजाः। देवं बर्हिरित्येतत्तृतीयं प्रैषसूक्तं। अध्वर्युणा प्रेषितः प्रशास्ता प्रैषैर्होतारं प्रेष्यति। प्रशास्त्रा
६४ प्रेषितो होता देवं बर्हिरित्यादिभिर्यजति। याज्या उच्यन्ते। देवं बर्हिरित्येका। देवीर्द्वार इत्यादिकाः षट्।
देवो नराशंस इत्यष्टमी। देवो वनस्पतिरिति नवमी। देवं बर्हिर्वारितीनामिति दशमी। देवो अग्निः स्विष्टकृ
64 दित्युत्तमा। अनवानं प्रेष्यत्यनवानं यजति। उत्तमा तु प्रकृत्या वा। अथ सूक्तवाकार्थमाश्रावणे कृते। अप्रे
षित एव मैत्रावरुणोऽग्निमद्येति सूक्तवाकप्रैषं मैत्रावरुणो ब्रूयात्। अत्र वनस्पतिवर्जमावाहनक्रमेणै
व देवता निगमयेत्। अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं गृह्णन्नग्नय आज्यं गृ
ह्णन् सोमायाज्यं बध्नन्निन्द्राग्निभ्यां छागं सूपस्था इत्यादि पूर्वस्मिन्निगमे। द्वितीये तु निगमे। अग्नय आज्येन सो
मायाज्येनेन्द्राग्निभ्यां छागेनाघस्तां तमेद्यस्तः प्रतिपचताग्रभीष्टाम वीवृधेतां पुरोडाशेन त्वामद्येत्यादि। एम०
अथाज्यभागयोरक्करणापक्षे गृह्णन्नग्नय आज्यं गृह्णन् सोमायाज्यं अग्नय आज्येन सोमायाज्येनेत्येतामु ६४

हूरेत्। प्रैषान्ते दण्डमाहवनीये प्रक्षिपेत्। सावभृथेन कर्मणि अप्सु प्रक्षिपेत्। अथ होता सूक्तवाकादिप्राय
श्चित्तान्तं प्रकृतिवत्करोति। सूक्तवाके। अग्निरिदं हविः सोम इदं हविः इन्द्राग्नी इदं हविरजुषेतां। वन
स्पतिरिदं हविः। देवा आज्यपा इत्यादि। वेदस्तरणं तु हुत्वा हुतं। प्रायश्चित्तानन्तरं। उभावपि अग्निप स्रुके
तनान्यव्ययं ततः। तीर्थेन निष्क्रामतः। हृदयशूलं भूमौ प्रक्षिप्यमाणं सर्वे अनुमन्त्रयेयुः। बहुवचनतात्।
शुगसि यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तमभिशोचेत्यनेन मन्त्रेण। तस्योपरि स्थाद्य उपस्थानं ति। द्वीपे ए हृद
स्यादियं च वयं द्विष्म इत्येवमन्तैः। अपः हृदयशूलमनवेक्षमाणाः। तस्मात्स्थानाद्यन्तः प्रत्येकं तिस्रः समिधः
कुर्वते। अग्नेः समिदसि तेजोसि [illegible] तेजो मे देहीति प्रथमां। एधोस्येधिषीमहीति द्वितीयां। समिदसि
समेधिषीमहीति तृतीयां। ततस्तीर्थेन प्रविश्य प्रसृग्यदा आहवनीयाद्वस्थाया आहवनीयमुपतिष्ठन्ते। आपो
अद्यान्वचारिषमित्यनयर्चा। तत्रस्थित एव समिधो भ्याद्धाति। यथागृहीतं। अग्नेः समिदसि तेजोसि तेजो

मं॰टी॰२ मेद्राः स्वाहा। सोमस्य समिदसि दुरिष्टेर्मा पाहि स्वाहा॥ पितॄणां समिदसि मृत्योर्मा पाहि स्वाहा। एतैस्त्रिभिः।
६५ सर्वे आहवनीयमुपतिष्ठंते। ओं च मे स्वरश्च मे इत्यनेन॥ ॥इति पशुतंत्रं॥ ॥मन्त्रादिस्तु रविन्द्रोपाध्यु
65 प्रकृतिवद्द्रष्टव्याः। सर्वेषां पशूनामेतद्देवतंत्रं। प्रदानानामुक्ताः प्रैषा इत्येतस्मिन्नुवएडे एकादश पशवः स
माम्नाताः। ते चैकादशिन्यामुच्यंते। तेषां देवताः। अग्निस्सरस्वती सोमः पूषा बृहस्पतिर्विश्वेदेवा इन्द्रो मरुत
इन्द्राग्नी सविता वरुण इति। अग्नीषोमाविमं सु म इत्यस्मिन्नुवएडे अष्टादश पशव उक्ताः। तेषां देवताः। अ
ग्नीषोमौ मित्रावरुणौ प्रजापतिः सूर्यो वायुर्नियुत्वान्वायुरदितिर्विष्णुर्विश्वकर्मा त्वष्टा सोमापूषणौ आ
दित्या द्यावापृथिवी इन्द्रोऽश्विनाविन्द्रो वृत्रहा वाक् सरस्वतीति। एवमेकोनत्रिंशति पशवः सूत्रकारेण समा
म्नाताः। एषां पशूनां वपापुरोडाशहविर्लक्षणप्रदानत्रयस्य याज्यानुवाक्याः। अग्ने नय सुपथा राये अ राम॰
स्मान्नित्या रभ्य यस्य व्रतं पश्वो यंति सर्व इत्येवमंताः। ते यथाक्रमेणैकैकस्या देवतायाः षड् ऋचो ग्राह्याः। ६५

अत्राद्यास्तिस्रोनुवाक्याः। उत्तरास्तिस्रो याज्याः। अस्मिन्सूत्रे असमाम्नातानां पशूनां देवतालक्षणाया
ज्यानुवाक्या इत्युक्तालक्षणविशिष्टा याज्यानुवाक्या यथासंभवं ग्राह्याः। प्रैषास्तु वपापुरोडाशहविर्लिं
गाः प्रैषसमाम्नायपठिता एव सर्वत्र ग्राह्याः। अयं तु विशेषः। प्रैषसमाम्नाये अग्नीषोमदेवत्याः पठिताः।
तत्र देवतांतरयुक्तेषु पशुषु। वपापुरोडाशपशुदेवतानामग्नीषोमस्थाने निगमयेत्। छागस्थाने पशुतं
त्रे गोपशौ गोशब्दउस्राशब्दयोरन्यतरेणैव निगमनं कुर्यात्। नान्येन तद्वाचकेन मेषस्य मेषशब्दाविव
शब्दयोरन्यतरेणैव। अश्वस्य अश्वशब्दहयशब्दयोरन्यतरेणैव नान्येन। अन्यजातीयानां यथार्थनि
गमनं भवति। पशुदेवतायाः एकत्वे। आदत्। घसत्। करत्। जुषतां। अघत्। अगृभीत्। अवीवृधतेति देव
ताभिधायिनां पदानां प्रैषेषु यथार्थमूहः कर्तव्यः। नाभिरूपमामेदोहविरित्यनूह्यानि। एषां पशूनां प्राजापत्य
उपांशु। सावित्रसौर्यवैष्णववैश्वकर्मणश्चोपांश्विति केचित्। तेषां प्रैषेषु देवतायाः प्रत्यक्षवाचकपदानांउ

पांसुत्वं। आदद्दादीनां वैकल्पिकंउपांसुत्वं। येन्येतद्वचनाः परे क्षास्तात्रुपांशूच्चैर्वा प्रत्यस्समुपां
श्वितिवचनात्। आदत्तघसत्करत् इति परत्र पस्यनित्यमेवोपांसुत्वं। पुनर्विधानात्। उक्तादन्य
त्र प्रैषेषु उच्चैरेव प्रयोक्तव्यं। याज्यानुवाक्येतूपांश्वेव। अयं सर्वेषां पशूनां साधारणाविधिः॥ ॥अथसौ
त्रामण्याः प्रयोग उच्यते॥ ॥तस्यैंद्राग्नवत्कल्पः। विशेषस्तूच्यते। आश्विनसारस्वतऐन्द्राः पशवः।
बार्हस्पत्यस्तु विकल्पेन चतुर्थः। आश्विनश्छागः। सारस्वतीमेषी। ऐन्द्रोमेषः। ऐन्द्रसावित्रवारुणाः प
शुपुरोडाशाः। आवाहनकाले। अग्निमग्न आवह। सोममावह। अश्विनावावह। सरस्वतीमावह। इन्द्र
मावह। वनस्पतिमावह। तनोग्न इह देवताः सर्वाः पृथगादिश्य सकृदेवावाहयेत्। एकप्रदानत्वात्। अ
श्विनौ सरस्वतीमिन्द्रं सुत्रामाणमावह। देवाँ आज्यपानित्यादि। पुरोडाशदेवतानामावाहनं न भवति।
आवाहनादूर्ध्वं प्रसन्नेः। अध्रिगौ विशेषः। दैव्याः शमितार इत्यादि। मेधपतिभ्यो मेधान्। प्रेभ्यो अग्निं

भरत। अन्वेनान्माता। उदीचीनां एषां पदो निधत्तात्। पृथिवीं शरीराणि। एकधैकधैषां त्वचमाच्छ्यतात्। पु
रा पुरा नाभ्या अपिशसो वपामुत्खिदतात्। अन्तरेवोष्माणं वारयध्वात्। श्येनमेषां वक्षांसि कृणुतात्। प्र
शसा बाहू। शला दोषाणि। कश्यपेवांसानि। अच्छिद्राः श्रोणीः। कवषोरून्। स्रेकपर्णाः ष्ठीवन्तः। षड्विंशतिः। षड्विंश
तिरेषां वङ्क्रयस्ता अनुष्ठ्योच्यावयतात्। गात्रंगात्रमेषामनूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्। अ
स्ना रक्षः संसृजतात्। वनिष्ठुमेषां मा राविष्ट उरूकं मन्यमाना इत्यूह्यानि पदानि। अथ वपायागे विशेषः।
प्रथममश्विनोः। आ पश्चातान्नासत्या पुरस्तादित्यनुवाक्या। होता॰ दश्विनौ छागस्य वपाया मेदसो जुषेतां
हविर्होतर्यज। इति प्रेषः। उदु स्तोमासो अश्विनोरबुध्रंनिति याज्या। अथ सरस्वत्याः। एकाचेतत्सरस्वती
नदीनामित्यनुवाक्या। हो॰ सरस्वतीं मेष्या वपाया मेदसो जुषतां हविर्होतर्यज। इति प्रेषः। प्रक्षोदसा धाय
सेति याज्या। अथैन्द्रस्य। इन्द्रन्नरो नेमधिते त्यनुवाक्या। हो॰ दिन्द्रं मेषस्य वपाया मेदसो जुषतां हवि

मं॰टी॰२ हे नर्यज इति प्रैषः। उरुं नो लोकमिति याज्या। एकवचनोक्तानां देवतानां प्रैषेषु विशेषः। आदत्तां घस
६७ त्तां करतां जुषतां। अघत्। अग्रभीत्। अवीवृधतेति॥ बहुवचनोक्तानां प्रैषेषु विशेषः। आदतां घसन्।
करतां। जुषंतां। अघसन्। अग्रभीषुः। अवीवृधंतेति विशेषः। मार्जनांतेऽप हयागः। एवं सुराममश्विनेति ग्र
हाणां पुरोनुवाक्या। होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणं सोमानां सुराम्णां जुषंतां व्यंतु पिबंतु म
दंतु सोमां सुरामाणो होतर्यज इति प्रैषः। पुत्रमिव पितरावश्विनोभेति याज्या। अग्ने वीहीत्यनुवषट्कारः।
सुरासुतस्याग्ने वीहीति वा। नानाहि वामिति ब्राह्मणोक्तेन मंत्रेण स्थालीस्थां ग्रहस्थां वा सुराम वेक्षेत। अ
थो वा हं हुत्वा। सोम एष इति मंत्रेण सोममवेक्षेत। अध्वर्युमुपहूय। यदत्र रिप्तमिति मंत्रेण प्राणभ
क्षान्भक्षयति प्रतिभक्षं मंत्रावृत्तिर्भवति। अथ हविर्यागः। तत्र प्रतिपशुं मनोतावृत्तिः। सकृदेवेत्येके। एम॰
प्रथममश्विनोः। आ नो देवेभिरुपयातमर्वागित्यनुवाक्या॥ हो॰ दश्विनोश्छागस्य हविष आत्तामद्य मध्य ६७

स्तां नूनं करत एवाश्विनौ जुषेतां हविर्होतर्यजेति प्रैषः। हिरण्यत्वङ्मधुवर्णो घृतस्नुरिति याज्या।
अथ सरस्वत्याः। सरस्वत्यभिन इत्यनुवाक्या। होतः सरस्वतीम्मेष्या हविष आदद्य॰ घसन्नूनं॰
करद्देवं सरस्वती जुषतामिति प्रैषः। यस्ते स्तनः शशय इति याज्या। अथेन्द्रस्य। इन्द्रोस आजगत इत्य
नुवाक्या। होतः दिन्द्रम्मेषस्य हविष आदद्य॰ घसन्नूनं करद्देवेन्द्रो जुषतामिति प्रैषः। स्वस्तये वाजि
भिश्चेति याज्या। अथ वनस्पतियागः पूर्ववत्। प्रैषे विशेषः। यत्राग्नेराज्यस्य हविषः प्रिया धामानि य
त्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मे
ष्या हविषः प्रिया धामानि यत्रेन्द्रस्य मेषस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि त्या
९८ ह्वितत्रैतान्यग्न भीयस इव। इति विशेषः। अथ पुरोडाशयागः। ऐन्द्रसावित्रवारुणाः पशुपुरो
पु-५।०८ डाशाः। प्रथममिन्द्रस्याय इन्द्रसुत्राम इत्यनुवाक्या। होतः दिन्द्रं पुरोडाशस्य जुषतामिति प्रैषः। प्रस

मं॰टी॰३ साह्विष इति याज्या। अथ सवितुः। स घा नो देवः सवितेत्यनुवाक्या। हो॰ सवितारं पुरोडाशस्याजुषता
६८ मिति प्रैषः। भगं धियं वाजयन्न इति याज्या। अथ वरुणस्य। अयं सु तुभ्यं वरुण स्वधाव इत्यनुवाक्या।
हो॰ वरुणं पुरोडाशस्याजुषतामिति प्रैषः। तदिन्न्वकंतद्दिवेति याज्या। अथ हविषां पुरोडाशानां स्विष्ट
कृन्नेत्तं त्रेणाभवति। पिप्रीहि देवानित्यनुवाक्या। हो॰ अग्निं स्विष्टकृतमित्यादि। अयाडग्नेरित्यादि वन
स्पति प्रैषवत्। प्रिया धामान्ययालिति विशेषः। तत्र पुरोडाशदेवतानां निगमनं नास्ति। आवाहना
दूर्ध्वं सुत्यन्तेः। तदुक्तं। आन्येषां मूर्धमावाहनादुत्सन्नानां इति। अग्ने यद् द्येति याज्या। सूक्तवाकप्रैषे
विशेषः। अग्निमद्येत्यादि। आज्यभागौ न मुक्त्वा वै कल्पिका वाज्यभागा यजुर्ग्नावणानंतरं। बध्नन्नश्वि
भ्यां छागं बध्नन् सरस्वत्या इन्द्राय मेषोऽस्पस्या इत्याज्यभागौ न मुक्त्वा यदिस्यातां। ततोऽश्विभ्यां छागेन स्म॰
सरस्वत्या इन्द्राय मेषाभ्यामघसं सान्मेदस्तः प्रतिपचतागृभीषुरवीवृधंत पुरोडाशैः स्त्वामघेत्यादि। ६८

68

सूक्तवाके आज्यभागावनुद्रावयेत्। यदिमवतः। अश्विनाविदं हविरजुषेतां। सरस्वतीदं हविः। इन्द्र इद

दं हविः। वनस्पतिरिदं हविः। अश्विनौ सरस्वतीन्द्रः सुत्रामेदं हविः देवा आज्यपा इत्यादि। हृदयशूला

भिमंत्रणे। शुचस्योपोस्मानिति विशेषः। अन्यत्सर्वमैन्द्राग्नवत्। संस्थिते वभृथेष्टिः। तामुत्तरत्र वक्ष्या

मः। केषांचिन्मते सौत्रामण्यां बार्हस्पत्यपशुरनुबन्ध्यो भवति। तस्य बृहस्पते या परमा परावदिति षड्ऋ

चः सूक्तपठिता अवदानत्रयस्य याज्यानुवाक्याः। सौत्रामण्यामेव इन्द्रवृषभं केचिदिच्छन्ति तैः सह प्र

योगे मेषशब्दस्य स्थाने उस्रागोशब्दयोरन्यतरः प्रयोक्तव्यः॥ समाप्तः सौत्रामणिः॥ अथ प्रायश्चि

त्तानि॥ ॥तत्र ब्रह्मकर्तृकाणि प्रायश्चित्तान्युच्यन्ते॥ यदा मंत्रकर्मणो विपर्यासो भवति। अथवांतरायो

भवति। स च विपर्यासोन्तरायः स्वयं दृष्टो भवति अन्येन वाख्यातो भवति। यस्य चांतरायस्य विपर्यासस्य

समकालीनान्यनेके भवंति। तदा ज्ञात्वा व्याहृतिमेकां जुहुयात्। स चेद्दोष ऋग्वेदात्। तदा गार्हपत्ये भूः

मं॰टी॰२ स्वाहा। इति जुहुयात्। यजुर्वेदश्चेत्। भुवस्वाहा। इति दक्षिणाग्नौ जुहुयात्। आग्नीध्रीयप्रणयनादू-
६९ र्ध्वं सोमेषु यजुर्भ्रेषे। भुवस्वाहाग्नीध्रीये जुहुयात्। न दक्षिणाग्नौ। सामवेदभ्रेषे। स्वस्वाहा। इत्याह-
69 वनीये जुहुयात्। यदि त्रिभ्यो वेदेभ्यो भ्रेषो भवति। यद्वा अमुकवेद इत्यज्ञातो भवति। तथा सति यदा स-
र्वव्यस्तदा। भूर्भुवस्वस्वाहा। इति त्रिभिर्मंत्रैरेकामाहुतिमाहवनीय एव जुहुयात्। प्राक् प्रयाजेभ्योंगारं ब-
हिष्परिधि निर्वर्तितं स्रुवदंडेनाभिनिदध्यात्। स्रुवदंडेन पीडयेदित्यर्थः। मा तप इति मंत्रेण। अत्र सूत्रे बहिः
परिधिशब्दे विप्रतिपन्नाः केचित्। नात्र परिधिशब्देन परिधिदेशो गृह्यत इत्याहुः। अंतःपरिधिदेशे
निवपेत्परिधिवद्देशशब्दाभावात्। अन्ये तु प्राच्यां दिशि परिध्यभावेपि प्रायश्चित्ताभिधानादितरत्रापि
दिक्षु परिधिदेश एव गृह्यत इत्याहुः। एतस्मिन्मते परिधिस्थापनात्प्रागप्यंगारनिर्गमे प्रायश्चित्त- ए॰म॰
मेतद्भवति। तमंगारं बहिःपरिधि निर्गतं प्रतिदिशं अमुं माहिंसीरिति मंत्रेण स्रुवदंडेनाभिनिदध्या- ६९

तात यथा। पुरस्ताच्चेदंगारो निर्गतस्ततः अध्वर्युं मा हिंसीर्यजमानं मा हिंसीः। दक्षिणतश्चेन्निर्गतस्त
तो ब्रह्माणं मा हिंसीर्यजमानं मा हिंसीरिति। पश्चाच्चेन्निर्गतस्ततो होतारं मा हिंसीः पत्नीं मा हिंसी
र्यजमानं मा हिंसीरिति। उत्तरतश्चेन्निर्गतस्ततः आग्नीध्रं मा हिंसीरिति। अथैनमंगारमाहवनीये
नि[क्षि]पेत्। आ हं यज्ञमिति मंत्रेण। अथ तमंगारमभिजुहुयात्सहस्रशृंग इति मंत्रेण। इति बहि
ष्परिध्यंगारपतनप्रायश्चित्तं॥ ॥अथ प्रायश्चित्तप्रकरणे अनेककर्तृयुक्ते कर्मणि कर्तृवि
शेषमननादिश्यय यत्र जुहोति जपतीति वा कर्मचोदना भवति तत्र ब्रह्माणं कर्तारं प्रतीयात्। यत्र तु
कर्मणि ब्रह्मा नास्ति तत्र कर्तैव जुहुयाज्जपेद्वा। विपर्यासेन तरिते मंत्रे कर्मणि वा ख्याते वोपलक्ष्य
वा ज्ञात्वा व्याहृतीं जुहुयादित्यादि चानुसंधातव्यमस्मिन्प्रकरणे। तथा प्रायश्चित्तेष्टीनां प्रधानहविर्या
गगतमुपांशुत्वमनुसंधातव्यं। अन्यदपि परिभाषासिद्धं यथास्थानेनुसंधेयं॥ विध्यपराधे प्रा

मं॰ टी॰ ३ यश्चित्तिर्वेदितव्या। अयमर्थः। यत्र विहितस्याकरणं भवति। अविहितस्य करणे। विहितस्याप्यंग
७० हीनस्य करणं॥ तत्रैवंविध्यपराधे प्रायश्चित्तार्थं कर्म कर्तव्यं। तच्चविध्यपराधज्ञानानंतरं कार्यमि
70 त्युत्सर्गः। अपवादमग्रेवक्ष्यामः। शिष्टाभावे प्रतिनिधिर्भवति। अयमर्थः। यत्र विहितं द्रव्यं कर्मका
ले नास्ति जातमपि वा यदि स्तोकत्वात् प्रधानमपि संपादयितुं न शक्नोति। तत्राविहितद्रव्यसदृशं द्र
व्यांतरमुपादाय कर्मकर्तव्यं। यथा आज्यपयसोः परस्परं प्रतिनिधित्वं यथाह कौंडिन्यः। आज्या
भावे पयः पयसोभावे आज्यं च तावत्॥ यथोक्तस्त्वलाभे न्वगात्संतदनुकारियत्॥१॥ यवाभावे तु गो
धूमा व्रीह्यभावे तु शालयः इति मनुः॥ प्रतिनिधौ न प्रायश्चित्तं॥ अन्वाहिताग्नेः प्रयाणोपपत्तौ पथ
गत्नीन्नयेयुः। स्पष्टोर्थः। यदा विहृताग्नेस्तस्यां रात्र्यां प्रयापासं न रे पास्यातुं नायाति। तदाग्नीनुप ए म॰
पकृष्य कृपात्रे कृत्वा तानग्नीन्वहवः पुरुषा नयेयुः॥ अथ यपक्षांतरमाह। तु स्यंता अंगिरसमेनि ७०

वाज्याहुतिं हुत्वा समारोपयेत्। तुभ्यंता अं॰ येमिरे स्वाहा। अग्नये कामायेदं॰ इत्याज्याहुतिमाहवनीये हु
त्वा समारोपयेद्वा। अयं ते योनिर्ऋत्विय इत्यरणी गार्हपत्ये प्रतितपेत्। अयं ते योनिर्ऋत्वियो॰ हाथानो
वर्द्धया गिरः। इत्यनेन मंत्रेण अरणी गार्हपत्ये प्रतितपेत्। नाग्न्यंतरे। पाणी वा। अथवा पाण्योः समारो
पः। या ते अग्ने यज्ञिया तनूः॰ जातवेदो भुव आजायमानः। इत्यनेन मंत्रेण गार्हपत्ये पाणी प्रतितपेत्।
यस्तु दक्षिणाग्निः पृथगरणिर्भवति तदा तयोरेव अरण्योः समारोपणं कार्यं तूष्णीं। मंत्रेणैके।
यदुक्तं पाणिप्रतपनं अरणिप्रतपनं च तदग्नीनामेकयोनित्वे गार्हपत्ये एव कर्तव्यं नेतरयोरित्याहुः।
अरणीसमारोपणं पाणिसमारोपणं च आहिताग्निना कर्तव्यं। नाध्वर्युणेति भवनागाचार्यो मन्यते।
मंत्रे वर्णस्वरादिसम्यगुच्चार्य समारोपणं कर्तव्यं। अन्यथाग्नीनां लौकिकत्वं स्यात्॥ एवमनन्वाहिता
ग्निरहुत्वा अनन्वाहिताग्नेः प्रस्यसनयनं नास्ति। विहारदेशे यत्र क्वापि संचारयितव्ये अत्र घ्नसतासं

मं॰टी॰३ चारयितव्यं। समारोपयो पूर्ववत्कर्त्तव्यौ चायानुविरहितानेरकृतिरुक्तानुभ्यंताअंगिरस्तमेतिसाअविह
७१ तानेर्नभवति॥ ॥इतियथोक्तं आहिताग्निः प्रयाणं कुर्यात्। यदिपाण्योररणीसंस्पृश्यमंथयेत्।
71 यदिपाण्योः समारोपणं कृतं तदानीमग्निहोत्रकालेपाणिभ्यां तूष्णीमरणीसंस्पृश्यमंथयेत्। प्रत्य
वरोहजातवेद॰ स्वधाभवयजमानायशंयोः। इतिस्वंमंत्रमुक्त्वामंथेत्। अन्योवामंथयेत्। यजमानो
मंथनकालेयावदग्नेर्जन्मतावदरणीसंस्पृशंनासीत। यदिउत्पादनप्रयत्नोनिःफलःस्यात्तदापुनर
रंभावसरेमंत्रमावर्त्तयितव्यः। यदितुअरण्योःसमारोपणंकृतंतदाअग्निहोत्रकालेयजमानोमं
त्रमुक्त्वामंथयेदेव। ततोऽग्निहोत्रं॥ ॥इतिसमारोपप्रकरणं॥ ॥अथाहवनीयबहिर्गमनप्रायश्चि
त्तं। ॥आहवनीयमवदीप्यमानमर्वाक्शम्यापरासात्। आहवनीयस्यैकदेशस्तामसोवायघाय एम॰
तनाद्बहिर्गच्छेत् शम्यापरासादर्वाक्तदा इदंतएकंपरजूतएकं॰ प्रियोदेवानांपरमेजनित्रे। इत्यनेनमं ७१

त्रेणायतनेऽग्निं प्रक्षिप्य। तत्रैव व्याहृतिहोमः सर्वप्रायश्चित्तं च। नागम्यंतरे इदं प्रायश्चित्तं। तत्र तूष्णीमा
ग्नेयो व्याहृतिहोमश्च। यावत्प्रायश्चित्तकालमग्निः ज्जीवति तत्र प्रायश्चित्तं। नस्मृतिंगमात्रस्य।। ।।इत्या
हवनीयवह्निरिंगमन प्रायश्चित्तं।। अथाग्निः शम्यापरासातिक्रमे।। स्वकाले दर्शपूर्णमासानुष्ठानाभावे अ
न्यस्याग्निषु यजने। अस्याग्निषु अन्येन यजने। अस्याग्निषु अन्येनाग्निनाध्यवाये प्रायश्चित्तं। यदि त
तीयाद्य घमावास्यां पौर्णमासीं वातीयाद्यदि वान्यस्याग्निषु यजेत यदि वास्या योऽग्निरन्तीन्यवेयात्। एते
षु पञ्चसु निमित्तेषु पथिकृतेष्टिर्भवति। अग्नये पथिकृते ष्टाकपालं पुरोडाशं निर्वपेत्। तत्स्थाने आज्यभागौ वा
न्ये वेत्याहुः। वेधो अध्वन आदेवानामपि पंथामगन्मेति। एककदैवतन्त्रमः। अनडुं दक्षिणा भवति। अथ
वा पूर्णाहुतिं वा जुहुयात्। पूर्णाहुतिपक्षे तु तत्त्वादशगृहीतं चतुर्गृहीतं वा गृहीत्वा। अग्नये पथिकृते
स्वाहा इत्याहवनीये जुहुयात्। अग्नये पथिकृत इदं न मम।। ।।इत्यग्निः शम्यापरासातिक्रमे। स्वकाले

मं·टी०३ दर्शपूर्णमासाभावे। अन्यस्याग्निषु यजने। अस्याग्निषु अन्येन यजने। अस्याग्नि अन्येनाग्निनाव्य
७२ वाये प्रायश्चित्तं॥ ॥अपव्यवायप्रायश्चित्तं॥ ॥यदि वास्याग्निहोत्रउपसंने हवींषि वा निरुप्ते च
त्रौ वध्वा पुरुषो वा विहारं पंतरियात्। अग्निहोत्रद्रव्ये कुशेषु सादिते। दर्शपूर्णमादिषु हविर्निरुप्ते।
72 स्यन्त्राकयादिः श्वामनुष्यजातिपशुपक्षिसर्पमार्जारमूषकनकुलादिभिर्विहारं तिक्रमे यज
मानस्य प्रवासमरणे। इत्यादिनिमित्तेषु सत्सु पाथिकृती इष्टिः पूर्णाहुतिर्वा। इष्टिमध्ये यद्येतानि
मित्तानि तु संजातानि तर्हि प्रक्रांते ष्वासमानं तत्रापाथिकृती कार्या। दार्विहोममध्ये चेत् प्रक्रांतं समा
प्यानंतरं कर्तव्या॥ अग्निभिन्नव्यवाये इष्टेः प्राक् गामंतरेणानयेत्। तत्र शुनोगमने विशेषः। इदं
विष्णुर्विचक्रम इत्येतयर्चा भस्मना शुनः पदानि पूरयेत्। प्रतिपदं मंत्रावृत्तिः। अनंतरं तंतुं तन्व एम०
न्रजसो भानुमन्विहीसनयर्चा गार्हपत्याहवनीययोरंतरं भस्मचोदकधारांश्वांच संतनुयात्। प्र ७२

त्रिधारं मंत्रावृत्तिः। ततआहवनीयमनुगमैय्य पुनः प्रणीय। यदग्ने पूर्वं प्रहितं॰ मनुसंभवैतां संनः
सृजसुमत्या वाजवत्या। त्वमग्ने सप्रथा असि॰ त्वया यज्ञं वितन्वते। इति द्वाभ्यामुपतिष्ठेत। असांपत्नि
कृदिष्टा बलिवर्दी दक्षिणा॥ ॥इति रथाघ्नतरागमन प्रायश्चित्तं॥ ॥य ।याहिताग्निर्ग्रामान्तरे मृतस्त
द्दा मरणश्रवणानंतरं पार्थिवहुतिं कृत्वा अन्यवत्सेनान्यां दुग्ध्वा तस्मिन्नेव विहारे तूष्णीं धर्मकं सायं
प्रातरग्निहोत्रसंज्ञकं कर्मोतरं यजमानस्य शारीरसंस्कारपर्यंतं जुहुयात् सर्वं हुते। प्रजापतिध्यानं। प्र
जापतयइदं॰ न मम। अध्वर्युः प्राचीनावीती परिसमूहनादि कृत्वा गार्हपत्य दक्षिणार्द्धे तूष्णीमधिश्रय
णादि कृत्वा दक्षिणत उद्वासनं तूष्णीं स्रुचि क्षीरं पूरयित्वा पालाशीं समिधमधस्ताद्धारयमाणो दक्षिणेन
विहारं गत्वा आहवनीयस्य पश्चात् कुशोपूपसाद्य समिधमाधाय सकृदेव तूष्णीं सर्वं जुहुयात्। अ
न्यत्सर्वं लुप्यते। अत्रैव व्रात्यलक्षणे विशेषः। यस्याः कस्याश्चिद्गोः पयसा पुत्रादयो जुहुयुः। नाभिवान्यवत्सा

मं॰टी॰३ नियमः इत्येकः पक्षः। पुनः पक्षांतरमाह। प्रवासमतस्य अंगानामानयनपर्यंतं आहवनीयादीनां
७३ प्रत्यक्षधारणं नाग्रपूर्वीकहोमः यथा सर्वदा प्रज्वलेयुः स्यात्तत्र प्रायश्चित्तिः॥ ॥इत्याहिताग्नेर्ग्रामां
तरमरणप्रायश्चित्तं॥ ॥यद्याहिताग्नेरपरपक्षे मरणाशंका स्यात्तदानीमारभ्य तस्य शिष्टा आकु
73 तयः पक्षहोमन्यायेन कृत्वा दर्शं च कृत्वा पूर्वपक्षं नयेत्। इदं तु जीवत एव। केचित् दक्षिणायने मरणाशं
कायामपि उदगयनाद्येतत्कुर्वंति। शाखांतरे वचनं दृश्यते॥ ॥इत्याहिताग्नेरपरपक्षमरणशंका
विधिः॥ ॥अथ हविर्दोषप्रायश्चित्तानि॥ यद्या वारुना हूर्ध्वं प्रधानयागाद्दर्वीकूर्केणादिभिर्हविर्दु
ष्टं तदा आज्येनादुष्टैः सह प्रकृतान्निहिं समाप्य परेद्येवसं हविर्व्यापन्नं तस्यैवाग्न्यन्वाधानादि पुन
र्यागः कर्तव्यः। एवं द्वयोर्बहूनां व्यापत्तौ द्रष्टव्यं॥ एवं प्रधानयागोत्तरं नाशे शेषकार्यमाज्येनैव ए म॰
कर्तव्यं न पुनरुत्पत्तिः। दुष्टानि हवींषि भिन्नासिक्तानि वल्मूकीमप्सु प्रक्षिपेत्। दुष्टे सान्नाय्ये प्र ७३

जापते न त्वदेतान्यन्य० वयं स्याम पतयो रयीणां। इत्यनयर्चा वल्मीकद्वारि मध्यमेन पलाशप
र्णेन जुहुयात्। अप्सु वा तूष्णीं प्रक्षिपेत्॥ ॥इति हविषि केशादिभिर्दोषप्रायश्चित्तमुक्तं॥ ॥यदि सा
न्नाय्यं विष्यन्दमानं कुम्भीमतीत्याग्निं भूमिं वा प्राप्नुयात् तस्मिन्कृते दुष्टं च तदेवास्याशीगतेनादुष्टेन या
गः। यत्कुम्भ्यां वहिर्गमनमात्रेण विष्यन्द इति तस्मिन्कृते दुष्टं चायतन् दुष्टं तत्। मही द्यौः पृथिवी च नः० भरीम
भिः। इत्यनेनान्तः परिधिदेशे निनयेत्। परिध्यभावेपि। सायंदोहनाशे प्रातर्दोहं द्विधा कृत्वा एकं भागं दधि
भावायातञ्च्यात्। ताभ्यां दधिपयोभ्यां यागः कार्यः। प्रातर्दोहनाशे तत्स्थाने पुरोडाशेन यजेत्। उभयदोषे ऐन्द्रा
ग्नं पञ्चशरावपरिमितान्व्रीहीन्निरुप्य गार्हपत्ये श्रपयित्वा द्वयोः पात्रयोः पृथक्कृत्य तस्मादेव हविषः प्र
चरणकाले अग्निमिष्ट्वा इन्द्रं यजेत। अग्निर्देवतानां प्रथमं यजेदिति श्रुतेः। ऐन्द्रमेव त्येके। अस्मिन्नपि प
क्षे प्रचरणकाले ऐन्द्रं पञ्चशरावमोदनं द्वेधा विभज्य अग्निमिष्ट्वा इन्द्रं यजेदित्येके। अथवा इन्द्रमेव यष्टव्य

मं॰ १०२ इति केचित्। आज्यान्नाहार्यादीनामन्योपहतौ प्रोक्षणं सर्वं प्रायश्चित्तं च। अग्निहोत्रशेषणनाशे
७४ तंदुलैः शतं चरुं सर्वप्रायश्चित्तं च॥ ॥इति हविर्दोषसान्नाय्यप्रायश्चित्तं॥ ॥सान्नाय्यार्थमपाकृता
वत्सा यदि निःशेषं पिबेयुः तदा वायुर्देवस्य पवाग्वा सहस्रक्रां तामिष्टिं समाप्य पुनर्यागः। असर्वपाने
74 यागपर्यासे सर्वप्रायश्चित्तेन पुनर्यागः॥ ॥इदमपि हविर्दोषप्रायश्चित्तं॥ ॥अथाग्निहोत्रार्थमधि
श्रितद्रव्यस्खरणप्रायश्चित्तं॥ अधिश्रितमग्निहोत्रद्रव्यं स्थालीमूलेन यदि स्रवति तदा। गर्भं स्रवंतमग
दमकर्माग्निहोतापच व्यंतरिक्षं यतश्च्युत द्यावेव तेनाभिप्राप्नोति निर्ऋतिं परस्तात्। इत्यनेनाभिमं
त्र्यादुष्टमप्सु प्रक्षिप्य सर्वप्रायश्चित्तं हुत्वा शेषेण जुहुयात्। अशेषे पुनर्दुग्ध्वा अग्निहोत्रं जुहुयात्॥
॥इत्यग्निहोत्रद्रव्यस्खरणप्रायश्चित्तं॥ ॥अथ दोहनकाले गोरूपवेशनप्रायश्चित्तं॥ ॥दोहनकाले व एम॰
त्ससंसर्गादि दोहनसमाप्त्यं तं यदि ता गोरूपविशेत् तदा। यस्माद्भीषा निषीदसि ०न मो रुद्राय मीढुषे। ७४

इत्यनेन तामभिमंत्र्य । अनंतरं उदस्थादेव्यदितिः अमित्राय वरुणाय च । इत्यनेन मंत्रेण तामुत्थाप
येत् । उभयमप्येककर्तृकं । अथास्या ऊधसि मुखे चोदपात्रमुपोह्य । ततस्तां दुग्ध्वा तस्य योग्याल
णं पाययेत् । तद्दन्वेष्या वज्जीवं संवत्सरं वा नाश्नीयात् । अथ वा तां ब्राह्मणाय दद्यात् ॥ ॥ इति दोह
नकालीनगोरूपवेचानप्रायश्चित्तं ॥ अथ दोहनकालीनगवाक्रंदनप्रायश्चित्तं ॥ दोहनकाले गौर्यदि
शब्दं कुर्यात् तदा । सूयवसाद्भगवती हि भूयाः । पिब शुद्धमुदकमाचरंती । इत्यनेन तस्याः अभिसंप्रकल्पये
त् । इति दोहनकालीनगोक्रंदनप्रायश्चित्तं ॥ ॥ अथ दोहनकाले रुधिरस्रावप्रायश्चित्तं ॥ ॥ शोणि
तं दुग्धं गार्हपत्ये संस्थाप्य पुनस्तां वा अन्यां दुग्ध्वा तेन जुहुयात् ॥ ॥ इति रुधिरस्रावे प्रा० ॥ ॥ अथ भि
न्नस्थालिकप्रायश्चित्तं ॥ ॥ स्थालीभेदे पुनर्विशिष्टं द्रव्यं भिन्नेतस्म समंदुष्टं सिक्तं स्कन्नं ॥ स्कंदने च यावत्स्क
न्नं तावत् दुष्टं भवति । न पात्रगतं । तदुभयं दुष्टं । समुद्रं वः प्रहिणोमि० मयि गावः संतु गोपतौ । इत्यनेन

मं०टी०३ मंत्रेणाभिमंत्र्यापोऽभ्यवहरेत्॥ दो ३ हनाद्यहेमास्य पयसि अन्येषु द्रव्येषु च भेदने पूर्वोक्तेनाभिमं
७५ त्रणं स्कंदने पुनः पयसि वक्ष्यमाणत्वात्। इदमभिमंत्रणं स्कंदने द्रव्यांतरेष्वेव भवति॥ इति भिन्न
सिक्तप्रायश्चित्तं॥ ॥अथ दोहनाद्यवस्थायां स्कंदने प्रा०॥ ॥दोहनाद्यवस्थायां पयसि स्कन्ने यद्दध
75 दुग्धं पृथिव्यां० पयो वत्सेषु पयो अस्तु तन्मयि। अनेन स्कन्नमभिमृशेत्। अभिमंत्रयेत्। पयोलिंग
त्वात्पयस्येवेदं भवति। दोहनाद्या प्राचीनहरणात्। तत्र यत्परिशिष्टं स्यात्तेन जुहुयात्। शेषकार्याप
र्याप्तावपि। शेषकार्यस्य भस्मादेर्लोप एव स्यात्। तद्यदि प्रधानापर्याप्तं तदा अन्यत्पय आनीय जुहुया
त्। अधिश्रितेऽपि पयसि स्कन्ने यद्दधदुग्धमित्येतेनैवाभिमंत्रणं। न ब्राह्मणोक्तं। तद्द्रव्यांतरे भवति। विष्यं
दने पयसि ब्राह्मणोक्तं। तद्यथा अधिश्रयणमारभ्य विष्यंदने स्कंदने वा जलेन प्रतिषिंच्य तत्स्कन्नं वि एम०
ष्यंदितं च दक्षिणेन पाणिना अभिमृश्य जपति। दिवं तृतीयं देवान् यज्ञो गात्ततो मा द्रविणमाष्ट॥ तदरि ७५

स्पंत्तीयं पित्तृन्यज्ञो गच्छतो मा द्रविणमाहृ पृथिवीं त्तीयं मनुष्यान्यज्ञो गच्छतो मा द्रविणमाहृ । य
यो मे ऽज सास्कभितारजोसि वीर्येभिवीर् तमाछाविष्ठा ॥ यापस्येते अप्रतीतास होभिर्विश्रू ॥ अगन्नरूणा
पूर्वं हूतौ । इति चाज्यशेषं दुग्धवत् । प्राचीनहरणाद्धोमात्स्यपस्येव स्कंदने । प्रजापतेर्विश्वभृतितन्वं हुतम
स्मि । इत्यनेनाभिमन्त्र्य होमापर्यासावपि शेषेण जुहुयात् । इव्यां नरे समुद्रं व इत्यनेनाभिमंत्रणं विशे
षः । अशेषस्कान्नेयावत्सध्वनिमतेतत्रैवोपविश्य अन्येन स्रुवोस्थालीमानीय चतुरुन्नीय जुहुया
त् । स्थाल्यामपि यदा नास्ति तदा आज्यं यावत्संस्कृत्योन्नीय जुहुयात् । आहवनीये आहुतिद्वयापर्याप्ते
प्रायश्चित्तं । शेषेण जुहुयादित्यादित्रिषु पक्षेषु यां कांचिद्वारुणीं जपित्वा यया कयाचिद्वारुण्या होमः विशे
षाभावात् । अग्निः सूर्यो ज्योतिरित्येतयोरपवादे वारुणी । अनश्नानमान्यस्माद्धोमकालाद्यजमानस्य । पु
नर्होमं च गाणगारिः । पुनर्होमे च पूर्वं समाप्य पुनर्विहरणादि कुर्यात् । पुनर्होमे आचार्याणामनभिम

मं०टी०३ नः॥ ॥इति दोहनादिषु स्कन्नप्रायश्चित्तं॥ यद्यधिश्रितमग्निहोत्रद्रव्यं ज्वलेत्तदा॥ समो घपाप्मा
७६ नं॥ इत्यनेन द्रव्यमभिमर्शयेत्॥ ॥इत्यग्निहोत्रद्रव्यशब्दायमानप्रायश्चित्तं॥ अथाधिश्रयणोत्तरं विष्यंद
नप्रायश्चित्तं॥ ॥अथ उद्वासिते विष्यंदिते मही द्यौः पृथिवी च न इत्याहवनीयस्य भस्मांते निनयेत्। ततः स
76 र्वप्रायश्चित्तं॥ दोहनाद्यवस्थायामपि पयसि विष्यंदिते इदमेव॥ केशादिना बीभत्सितमग्निहोत्रद्रव्यं
प्रजापते न त्वदेतानित्यनयर्चा मध्यमेन पलाशपर्णेन जुहुयात् वल्मीकद्वारे। अप्सु वा तूष्णीं प्रक्षिपेत्। द्रव्यां
तरमुत्पाद्य होमः॥ अधिश्रयणाभावेप्यन्ये षामिदं॥ ॥इति बीभत्सप्रायश्चित्तं॥ ॥अथाग्निहोत्रद्रव्याभि
वर्षणप्रायश्चित्तं॥ अग्निहोत्रद्रव्येभिवृष्टे मित्रो जनान्यातयति ब्रुवाणो मित्राय हव्यं घृतवज्जुहोत स्वाहा।
इत्यनया समिधं तरमाधाय प्रकृतवद्धोमः॥ उत्तरं कृत्यभिवर्षणे इदमेवेति भगवता वृत्तिकारेणोक्तं॥ अन्ये राम०
अग्निहोत्रार्थमग्न्युद्धरणप्रभृति आ उत्तरपरिषेकात् अग्निषु वर्षति दैतस्या प्रायश्चित्तं वदंति॥ अग्निहोत्र ७६

द्रव्यप्रायेपठितत्वात्तदसत्॥ ॥इत्यभिवर्षणप्रा०॥अथोत्तराहुतिकाले द्रव्यस्कन्नप्रायश्चित्तं॥ ॥
यदि पूर्वाहुतौ हुतायां उत्तराहुतिः स्कन्नस्यानाहुतिः स्कंदेत्तदा। यत्र वेत्थ वनस्पते देवानां गुह्या
नामानि। तत्र हव्यानि गामय स्वाहा। इति समिधमाधाय शेषेण जुहुयात्। सर्वस्कंदने तत्रैव स्था
लीमानीय पुनस्त्रीन्नुन्नीय यत्र वेत्थेति समिधमाधाय उत्तराहुतिप्रभृति कर्त्तव्यं॥ ॥इत्यग्निहो
त्रस्कन्नप्रायश्चित्तं॥ ॥अथाग्निहोत्रकालात्ययप्रायश्चित्तं॥ ॥उत्स्यते ह्यग्निषु सायं पूर्वप्रहर
त्यागे गार्हपत्ये तूष्णीमाज्यं संस्कृत्य जुह्वां चतुर्गृहीतं गृहीत्वा दोषावस्तर्नमस्स्वाहा। इत्याह व
वनीये जुहुयात्। ततोऽग्निहोत्रमुपसाद्य। भूर्भुवस्वः। इति जपित्वा गां दत्वा शेषं समाप्यते घे वाग्निषु
वारुणीमिष्टिं कुर्यात्। तत्र वरुणो देवता। इमं मे वरुण। तत्त्वायामीति याज्यानुवाक्ये। उत्स्यते ह्य^
ग्निषु प्रातर्दशनाडिकात्यये पूर्ववदाज्यं संस्कृत्य जुह्वां चतुर्गृहीत्वा। प्रातर्वस्तर्नमस्वाहा। इत्याह

मं॰टी॰०३ वनीये जुहुयात्। ततोऽग्निहोत्रमुपसाद्य। भूर्भुवस्वः। इति जपित्वा। अग्निहोत्रं हुत्वा। इष्टं तेव
७७ र्दानं कर्त्तव्यं। समाप्ते अग्निहोत्रहोमे आहवनीयमनुगमयित्वा पुनः। इहैव क्षेम्य एधि मा
प्रहासीर्ईवं दत्तं जामदग्न्यं। इति मंत्रमुक्त्वा पुनः आहवनीयमुद्धरेत्। पित्रा सो जीवति जामदग्न्या
77 यनं। इति वदेत्। दक्षिणाग्निस्त्वाग्निहोत्रिकं एव। ततो मित्रसूर्याभ्यामिष्टिं कुर्यात्। नत्र अभियोम
हिनादिवं प्रसमित्र मर्त्यो अस्तु प्रयस्वानिति मित्रस्य याज्यानुवाक्ये। तरणिर्विश्वदर्शतः। चित्रं देवा
ति नामुदगादनीकमिति सूर्यस्य। समाप्तायामिष्टौ पत्नीयजमानौ यतवाचौ भूत्वा तानेवाग्नीञ्ज्वलयन्तौ
अनश्नन्तावहः शेषमुपासीयातां। ततस्तेष्वग्निषु हुतयोर्गवोर्दुग्धं पृथग्गानीय एकमधिश्रित्य तस्मि
न्ने वह्निताय समवनीय अपयेत्। तेन पयसा अग्निहोत्रहोमं समाप्य अग्न्योरपवर्गः। ततः प्रातरग्नि रम॰
होत्रं हुत्वा पुनर्विहरणादि ज्ञातमष्टिं कुर्यात्। त्वमग्ने व्रतभृच्छुचिः। व्रतानि बिभ्रद्व्रतपा अदब्ध ७७

इतियाज्यानुवाक्ये।पर्वणि दुःखे माश्रुपातेएषैवेष्टिः॥ इतिस्वकाले विहृतेष्वग्निषु कालात्य
यप्रायश्चित्तं॥ ॥अथाविहृतेषूक्तकालातिपत्तौ अस्तंतापादि अनुध्धतप्रायश्चित्तं कृत्वा होमं
कुर्यात्।अनापदिगार्हपत्ये आज्यं संस्कृत्य चतुर्गृहीतमाहवनीये मनस्वत्या कृत्वा अनुध्धतप्राय
श्चित्तसहितो होमः कार्यः॥ ॥इति अविहृतेषु कालात्ययप्रा०॥ ॥विहृतेषु हुतेषु होमांतरका
लप्राप्तौ उपक्रांतहोमो होमकालातिपत्तिप्रायश्चित्तसहितं होमं कृत्वा।वर्त्तमानकालीनमनुध्धत
प्रायश्चित्तसहितं होमं कुर्यात्।अविहृतेषु कालांतरप्राप्तौ मनस्वतीहोमं कृत्वा अतिपन्नहोमं च
कृत्वा अनुध्धतप्रायश्चित्तसहितो मुख्यकालीनहोमः।एवमनेककालातिपत्तावपि द्रष्टव्यं।वि
प हृतेष्वविहृतेषु वा अनेककालातिपत्तौ मनस्वतीहोमं प्रतिहोमं चावश्यं कुर्यात्।विहृतेषु तेषु ते
षे वाग्निषु अविहृतेषु चाग्नीन्विहृत्य मनस्वत्यादि कृत्वा प्राप्तकालस्य विहरणादि क्रियेत॥ ॥

मं० टी० १ इतिविहृतेष्वविहृतेषु च कालात्ययप्रायश्चित्तं॥ ॥अथानुद्धरणप्राय०॥ ॥यद्याहवनीय
७८ मप्रणीतमभ्यस्तमियात् तदा बहुविद्वालणमानीयतेनाहवनीयार्थमुद्धृत्य तच्चान्येन दर्भैर्हि
रण्यं बध्वाऽग्रतो ह्रियमाणे निधानान्तं कुर्यात्। अनुद्धृतमभ्युदिते सति बहुविदग्निमुद्धृत्य
सज्जुत्वाञ्चतुर्गृहीतमाज्यं रजते चाग्रतः कृत्वानयेत्। निहितस्याहवनीयस्य पुरस्तात्सन्मुख
78 उपविश्य। उषाः केतुना जुषतां स्वाहा। इत्यध्वर्युस्तत्राज्यं जुहुयात्। सायमनुद्धरणेऽग्निहोत्रहो
ममारभ्य वारुणीष्ट्यन्तं सायंकालात्ययवत्। तथा प्रातरनुद्धरणे तु आहवनीयानुगमवर्जम
ग्निहोत्रहोममारभ्य व्रातपतीष्ट्यन्तः कालात्ययवत् कुर्यात्॥ ॥इत्यनुद्धरणप्रायश्चित्तं॥ ॥अ
थाहवनीये विद्यमाने गार्हपत्यानुगमनप्राय०॥ ॥यद्याहवनीये विद्यमाने गार्हपत्योऽनुगतस्त एम०
दा तत्काष्ठानि तूष्णीं मन्थयेयुः। विद्यमानं चाहवनीयमनुगमयित्वा। क्षामामावे भस्मनाऽरणी ७८

संस्पर्श्य। इतो जज्ञे प्रथममेभ्यो० देवेभ्यो हव्यं वहतु नः प्रजानन्। इत्यनेनेनमपि त्वाहवनीयं पुन

स्तूष्णीं प्रणीय। अग्ने सम्राळिषे रायै० अन्नादं त्वान्नपत्यायादधे। इत्यनेनेनमुपतिष्ठेत। सर्वा

वस्थस्य गार्हपत्यस्य मंथनेनैवोत्पत्तिः। अथ कल्पांतरमुच्यते। विद्यमानमाहवनीयं गार्हपत्यं

हृत्वा ततः प्रांचमाहवनीयमुद्धरेत्। दक्षिणाग्निरपि मंथनेनोत्पन्नस्य दक्षिणतो निदध्यादित्येके।

आहवनीयात् गार्हपत्यार्थं प्रत्यंचमुद्धरेदित्यपरः। गार्हपत्यार्थं मंथनमेव दक्षिणाग्न्याहवनीयो

यथास्थितावितितृतीयः। अथ गार्हपत्यार्थं मथित्वा विद्यमानमाहवनीयं दक्षिणाग्निं चानुगम

य्य त्वा पुनः प्रणयेदिति चतुर्थः। अथवा आहवनीयं भस्मना सहोद्धृत्य दक्षिणतो विहारं पश्चा

न्नीत्वा गार्हपत्यायतनाद्भस्मापोह्य गोमयेनोपलिप्याग्निं तत्रैव निधायाहवनीया[illegible]यतनमुप

लिप्य गार्हपत्यादाहवनीयमुद्धरेन्मंत्रेण। दक्षिणाग्निरपि मंथनेनोत्पन्नस्य दक्षिणतो निदध्यादित्येके

मं·री·३ चित्। नेष्वेवाग्निषु इष्टिं कुर्यात्। तत्र तपस्वांजनद्वान्पावकवान्गुणकोग्निर्देवता। आया
७९ हितपस्साजनेषु। आनोयाहितपसाजनेष्विति याज्यानुवाक्ये॥ ॥इति विद्यमानाहवनीयेगा
र्हपत्यानुगमनप्रा०॥ ॥अथ गार्हपत्यानुगमनप्रायश्चित्तं सर्वावस्थस्य॥ ॥गार्हपत्येनुग
तेभस्मना अरणीसंस्पर्श्य। इतो जज्ञे प्रथमं इति मंत्रेण मथित्वा प्रकृतिवत्प्रणीय अग्नयेतप
79 स्वतेजनद्वते पावकवते ष्टाकपालं पूर्ववं निर्वपेत्। तत्स्थाने पूर्णाहुतिं विधाय। अग्नयेतपस्व
तेजनद्वते पावकवते स्वाहा। अग्नयेतपस्वते जनद्वते पावकवत इदं० इति पूर्णाहुतिं वा विधा
य ततो होमः॥ ॥इत्युद्धरणात्प्राग्गार्हपत्यानुगमनप्रा०॥ ॥अथ दक्षिणाग्न्यनुगतप्राय०॥
॥अनुगतं दक्षिणाग्निं स्वयोनितउद्धाद्य प्रणीय। ततआहवनीयेतपस्वतीष्टिः पूर्णाहुतिर्वा पूर्वव एम०
त्। अस्य प्रधानहोमोत्तरं जोत्पत्तिः॥ ॥इति दक्षिणाग्न्यनुगतप्रायश्चित्तं॥ अथाहवनीयानुग ७९

तप्रायश्चित्तं॥ ॥प्रणीतमाहवनीये पूर्वीकृतेःप्राक् अनुगते इष्टिः कर्तव्या। अग्निर्ज्योतिष्मान्वरुण
श्चदेवते। उदग्नेशुचयस्तवाग्नेहृहंतुपसामूर्ध्वोअस्थादितियाज्यानुवाक्ये। अग्नयेज्योतिष्मतेः। इमंमे
वरुणतत्वायामिब्रह्मणावंदमानइतिवरुणस्य। पूर्णाहुतिर्वा। अग्नयेज्योतिष्मतेस्वाहा। अग्नयेज्योति
ष्मतइदं॰। वरुणायस्वाहा। वरुणायेदं॰॥ उत्सन्निसुतदाहुर्यस्याग्निमनुद्धृत्यमादित्योभ्युदियाद्व्यपस्तमि
याद्वाप्रणीतोवाप्राग्घोमादुपशाम्येदित्याद्विहिरण्यंपुरस्कृत्यसायमुद्धरेत्मंत्रेण। रजतमंतर्धायप्रा
तरुद्धरेन्मंत्रेण। इयमुस्यानिर्ब्राह्मणोकृणाग्नास्त्वा॥ हिरण्यउपसंजुहुयादितिवचनात्। उत्तरत्राहुस्त्वर्थम
ग्नेर्नेस्यानिः॥ ॥इत्याहवनीयानुगतप्रायश्चित्तं॥ ॥अथानस्तमितहोमप्रा॰॥ ॥यद्यनस्तमि
तेअस्तमितमोस्याहोमोभवतितदातस्मिन्नेवाहवनीयेपुनर्होमः। होमोत्तरंयजमानोगार्हपत्याह
वनीयावुपतिष्ठेत। भवतंनःसमनसौसमोकसावरेपसौ॥ मायज्ञंहिंसिष्टंमायज्ञपतिंजातवे॥

मं·टी०३ दसौ शिवो भवतमघनः॥ इति। एवं प्रातः॥ ॥इत्यनस्तमितहोमे पुनर्होमपूर्वकं प्रायश्चित्तं॥ ॥
८० अथ नित्यहोमातिक्रमप्राय०॥ [illegible]॥ अग्निहोत्रातिक्रमे मनस्वत्या चतुर्गृही
तं कृत्वा अतिक्रांतहोमः कार्यः॥ इदमेव द्विरात्रादिषु होमविच्छेदे ज्ञेयं॥ ॥इति नित्यहोमातिक्रमे
प्रा०॥ ॥अथ सर्वानुगमनप्रा०॥ सर्वेषामनुगमने सूर्योस्तमियादस्तुदियान्नदा अग्न्याधेयं पुन
राधेयं वा प्रायश्चित्तं॥ एतदेव समास्त्वेषु चारणीनाशे।पि। अत्राग्न्याधेयपुनराधेयशब्दाभ्यां सेष्टि
के एव गृह्येते। अजस्रपक्षेपि इदमेव। अग्निहोत्रे द्व्याधिश्रयणात्पूर्वं गार्हपत्यादुद्धृते यं गार्हरे दुष्दि
उद्धृतस्य गार्हपत्यस्य च नाशास्तदा गार्हपत्यं संमथित्वा पूर्ववत्तपस्वतीष्टिः॥ अपोढवर्त्तमाने
गार्हपत्यानुगमने अपोद्यैकदेशं गार्हपत्ये निधाय सर्वप्रायश्चित्तं। अपोढमात्रनाशे सर्वप्राय- एम०
श्चित्तं। एवं गार्हपत्यदक्षिणाग्न्याहवनीयानामनुगते पृथगन्येवयथासंभवं कर्त्तव्यानि। तथा सति ८०

80

सर्वानुगमन एव अग्न्याधेयं पुनराधेयं वा प्रायश्चित्तं ॥ न केवलं गार्हपत्यमात्रस्यानुगमने ।
गार्हपत्याहवनीययोरनुगमने वा ॥ ॥इति विस्तृतेषग्निषु सर्वानुगमनप्रा० ॥ ॥अथ समा
रूढारणीनाशप्रा० ॥ ॥अग्निष्वरण्योः समारूढेषु सत्सु द्वयोरन्यतरयोर्नाशे वा अग्न्याधे
यं पुनराधेयं कर्त्तव्यं ॥ इत्यरणीनाशप्रा० ॥ ॥अथानेकनिमित्तेषु तत्तत्कृष्णविधिष्वाग्नेय्य
इष्टय उच्यन्ते ॥ ॥तत्रोपवसथ्येऽहनि यजमानपत्न्योर्व्रतातिपत्तौ व्रातपतीष्टिः कार्या । तत्र व्र
तपकृष्णे कोऽग्निर्देवता । त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति याज्यानुवाक्ये । नि
र्हृत कर्मणा अनिर्हृत कर्मणा वा अग्निना सहिते आहवनीयायतने यद्यन्य अग्निरहवनी
यार्थं उत्क्रियेत तत्र मनिधायै वसमरति चेदायतनस्थं वा दृष्य उत्स्य तं निदध्यात् । तत्रानपहृ
तकर्मो दूत्येतत्र दात्या हति होमप्रायश्चित्तं ॥ अनपवृत्ते उध्धृतस्याग्नेः अनिधाने पुनस्तूष्णीं

मं॰टी॰२ गार्हपत्येसमोप्यसर्वप्रायश्चित्तंकुर्यात्।निधानेवक्ष्यमाणलौकिकाग्निसंसर्गप्रायश्चि
८१ त्तं।अनपहृत्तेयपस्मत्तैवपूर्वप्रणीतेग्नौनिदध्यात्।तदाइष्टिःकर्त्तव्या।तत्राग्निवरुण
कोग्निर्देवता।अग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनेतियाज्यानुवाक्ये।अगारदाहेसा
मवतेष्टिःकर्त्तव्या।अग्नेत्वमस्मद्युयोध्यमीवाअक्रंददग्निस्तनयन्निवद्यौरितियाज्या॰इ
81 त्यादयः सर्वेसगुणाग्नयेअष्टाकपालाज्ञेयाः।शवाग्निनासंसर्गेशुचयेष्टिः।अग्निःशुचिव्र
ततमउदग्नेशुचयस्तवेतियाज्या॰गार्हपत्यादीनांपरस्परंसंसर्गेविविचयेष्टिः।वितेविष्व
ग्वातजूतासोअग्नेत्वामग्नेमानुषीरीळतेविशइतियाज्या॰गार्हपत्याहवनीययोःसंसर्गे
वीतयेष्टिः।अग्नआयाहिवीतयेयोअग्निंदेववीतयइतियाज्या॰ग्राम्येणसंसर्गेसंव रा॰म॰
र्गेष्टिः।कुविदङ्गनोगविष्टयेमानोअस्मिन्महाधनइतियाज्या॰वैद्युतेनाग्निनासंसर्गेअप्सुम ८१

नेष्टिः अप्स्वग्ने सधिष्टव यदग्ने दिवि जा असीति याज्यानु०। द्विषदन्नमोऽज्जने वैश्वानरायेष्टिः। वै
श्वानरो अजीजनस्य छोदि वीति याज्या०। उद्वासनात्साक् कपालनाशे अनुद्वासने पश्येत्कर्मम॰
ध्येपियेषां अपणो जरं उद्वासनं नदकृते आश्रावणे कृते वैश्वानरेष्टिः। यजमाने जीवति मृतस्य
वं श्रुत्वा सुरभय इष्टिः कर्त्तव्या। तत्र सुरभयगुणकोऽग्निर्देवता। सूत्रे एवकारस्य पठितत्वात्तन्नसु
रभिमतः। अग्निर्होतान्यसीदद्यजीयांत्साध्वीमकर्द्देववीतिं नो अद्येति याज्यानु०। यस्य भार्या गौ
र्वा यमौ जनयेद्दिष्टिर्मरुतः। मरुतो देवता। मरुतो यस्य हि क्षये प्रशर्द्धा प्रमारुताय स्वभानव इति
याज्यानुवाक्ये॥ ॥इत्याग्नेय्य इष्टयः॥ ॥अथाकाले दर्शारम्भ प्रायश्चित्तं०॥ ॥यद्यकाले दर्श
रंभे अकालोयमिति ज्ञाते स एव दर्शोत्रैधातव्ये स्या समापयेत्। वृधन्वंतावित्यमावास्या धर्मा भवं
ति। तत्र दाता अग्नेर्गुणः। प्रदाता इन्द्रस्य॥ शिपिविष्टो विष्णोः। अग्ने दा दाशुषे रयिं सयं तावि प्रए

मं·टी०२ षामिति अग्ने दर्शे तु पर्यायानुवाक्ये। दीर्घस्ते अस्त्वंकुशो भद्राते हस्ता सुकृतो न पाणी इतीन्द्र
८२ स्य प्रदाने पुर्योज्यानुवाक्ये। वषट्कृते विष्णवा सन्त्राक्ष्णोमित प्रतने अग्ध शिपिविष्ट नामेति विष्णो
शिपिविष्टस्य। अत्र पुनर्योगो नास्तीत्यध्वर्युभिः संदर्शितम्॥ ॥इत्यकाले दर्शारंभ प्रायश्चि
त्तं॥ ॥अत्र प्रायश्चित्तप्रकरणे सत्रोक्ताग्राह्यणोक्ता इष्टयस्तासां देवतानां प्रति देवतं तस्यै तस्यै
82 देवतायै द्वादशगृहीतेन स्रुचं पूरयित्वा चतुर्थ्यन्तेन देवतानाममंत्रेण पूर्णाहुतिं जुहुयात्। इदं तु
कर्म मध्ये वा अशक्तौ वा अनारभ्य दर्शं दर्शपूर्णमासस्य वा भवति आरभ्य दर्शपूर्णमासस्य च इष्टिः पू
र्णाहुतिर्वा॥ ॥इति इष्ट्यनुकल्प प्रा०॥ ॥अथ हविस्कन्नप्रायश्चित्तं॥ ॥यदि हविः स्कन्नं तदा देवो
ऽनमगन्यज्ञस्तस्य माशीरवतु वर्द्धतां भूतिर्घृतेन मुंचतु यज्ञोयं। ज्ञपतिं मंहसः। भूपतये स्वाहा भु दम०
वनपतये स्वाहा भूतानां पतये स्वाहा यत्तस्य त्वा प्रमयोन्मया भिमया प्रति मया इत्प्रस्कन्दा इत्येत ८१

दंतेनमंत्रेण सर्वत्र स्कन्नमभिमन्त्रेत् । सर्वप्रायश्चित्तं च ॥ ॥इति हविषां स्कन्नप्रा० ॥ ॥अथा
हुतेर्बर्हिः स्कन्नप्राय० ॥ ॥अथ हूयमानाहुतिः परिधेर्बर्हिः पतेत्तदा तस्याः स्कन्ने पूर्ववदभिम
र्शनेब्रह्मणाहुते आग्नीध्रस्तामादाय तूष्णीमेव जुहुयात् । आग्नीध्राययेन केनचिद्धान्येन रसा
दिना वा पूर्णपात्रं दद्यात् । सर्वप्रायश्चित्तं च ॥ ॥इत्याहुतेर्बर्हिःस्कन्नप्रा० ॥ ॥अथानेकविपर्यास
प्रायश्चित्तं ॥ देवताविपर्यासो नाम आवाहनादिषु व्युत्क्रमः । अनुवाक्याविपर्यासो नाम अन्यदी
यामन्यस्यानुब्रूयात् । एवं याज्याविपर्यासः । जोहवोपभृतयोरप्यविपर्यासेपि । अवदानविपर्यासो
नाम मध्यात्पूर्वार्द्धादित्यादिषु वैपरीत्यं । हविर्विपर्यासो नाम निर्वापादिषु व्युत्क्रमः । अन्यदीयेन
हविषा अन्यस्य यागो वा एतेषु सर्वेषु । यज्ञे देवा अतिपातयानि० न्यत्रास्मिन्नमरूतत्संनिधेतन स्वाहा
। देवेभ्य इदं० इत्याज्याहुतिं हुत्वा हुतवते ब्रह्मणे मुख्यं धनं दद्यात् । मुख्यं धनं नाम सर्वोत्कृष्ट

मं॰टी॰३ त्प्रधानभूतं द्रव्यमित्यर्थः॥ सर्वप्रायश्चित्तं च॥ एतेषु निमित्तेषु प्रधानयागोत्तरं स्रुते सतिप
८३ श्चाद्देवा सर्वप्रायश्चित्तं च नयागाभ्यासः॥ इति देवतादीनां विपर्यासप्रा०॥ ॥अथ प्रधानदेवताम
नावाह्य देवतांतरावाहनप्रा०॥ ॥देवतावाहनकाले विहितदेवतामनावाह्य उत्तरं कर्म कुर्या
त्तदा यावति गते स्मरति तावद्दर्वधिस्वरेण विहितामावाहयेत्॥ मनसा वा वाहयेदित्येके॥ यद्यवि
83 हितामावाहयेत्तदा यस्मिन्नेव क्रमे निगदादिषु पठितत्वाच्चतुर्गृहीतेन ध्रौवाज्येन तां यजेत्॥
इत्यविहितदेवतावाहनप्रा०॥ अथ हविरपक्वप्रायश्चि०॥ यदा हविरपक्वं स्यात्तदा तेनैव प्रक्रांतं
समाप्य दक्षिणाग्निं पुनर्विहृत्य चतुःशराव परिमितव्रीहिभिः ओदनं श्रपयित्वा चतुरो ब्राह्मणा
न्भोजयेत्॥ इति हविरपक्वप्रा०॥ अथ हविष एकदेशदाहे कृत्स्नदाहे वा प्रा०॥ यदा यद्धविर्दग्धं त ए॰म॰
दैकदेशश्च वदानपर्याप्तः स्यात्तदा तेनैव प्रकृते समाप्यैतस्मिन्नयोगे दक्षिणार्द्धे दातव्या। अन्य ८३

त्विगम्यः। पुनरन्वाधानादितरदेव सर्वो यागः कर्तव्यः। अवदानपर्याप्ते सर्वं प्रायश्चित्तमेव न पुनर्या
गः। एवं द्वयोर्बहूनां ज्ञातव्यं। यदि कृत्स्नं दग्धं तदा तस्मिन्नेव प्रयोगे निर्वापादितद्धविरुत्साद्य प्र
कृतं समापयेत्। इयं पुनरावृत्तिः। इति हविर्दग्ध प्रा०। अथावाहनात्प्राग्घविर्दोष प्रा०। आवाह
नात्प्राक् हविर्दोषे सति आवृत्तिरेव। अंगहविषां दोषे सति कर्मसमाप्तिपर्यंतं पुनरावृत्तिरेव।
आवाहनादूर्ध्वं प्रधानहविषां व्यापत्तौ यदुक्तं तस्यावधिः स्विष्टकृतः प्रागेव॥ तेनाप्यत्रांगानां
पुनरावृत्तिरेव। इत्यावाहनात्प्राक् हविर्दोष प्रा०। अपगृहीतावदानदोष प्रायः०। मध्यात्पूर्वार्द्धा
द्गृहीतं यदि दुष्टं भवति तदा सर्वप्रायश्चित्तं कृत्वा पुनस्तत एव मध्यात्पूर्वार्द्धाद्गृहीत्वा यजेत्। स
र्वेषु कर्मसु विहिता दक्षिणा दातुमशक्तौ उर्वरां दद्यात्। उर्वरा नाम सस्यसंपन्ना भूमिः। विहिता दक्षि
णादानकालातिक्रमे एषा दक्षिणेति केचित्। इति गृहीतावदानदोष प्रा०। अथ कपालभेदन

मं.टी०२ प्रा०। यदि पुरोडाशश्रपणात्स्यात्कपालं भिन्नं तदा गायत्र्या त्वा शताक्षरया संदधामि। इति संधान
८४ द्रव्येण संधाय सर्वप्रायश्चित्तं कृत्वा। अभिन्नो घर्मो जीरदानुर्यत आर्त्तस्तदगन्पुनः। इध्मो वेदिः प
रिधयश्च सर्वे यज्ञस्यायुरनुसंतरंतु। त्रयस्त्रिंशत्तंतवो यान्वितन्वत इमं यज्ञं स्वधया ये यजंते।
तेभिश्छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवान्। इति द्वाभ्यामप्सु प्रक्षिपेत्। सर्वप्राय
84 श्चित्तं कृत्वा अन्यत्कपालमानीय यथापूर्वं संस्कारं कृत्वा मंत्रेण तत्र निधाय पुरोडाशं श्रपयेत्।
श्रपणोत्तरं कपालभेदनेनैतत्प्रायश्चित्तं। इति कपालभेदप्रा०। अथ कपालाशुचिसंबंधप्राय
श्चित्तं॥ यदि कपालानि श्वादिभिर्दृष्टानि स्पृष्टानि अशुचिना वास्पृष्टानि तदा। अभिन्न इति द्वाभ्या
मेवाप्सु क्षिपेत्। सर्वप्रायश्चित्तं च। इति कपालाशुचिसंबंधप्रा०॥ अथ कर्ममध्ये मन्त्रयसाधार ए.म०
ण प्रायश्चित्तं। अथान्यानि मन्त्रयानि दुष्टानि। भूमिर्भूम्निमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः ८४

पशुभिर्यो नो द्वेष्टि स्सभिघतां। इति मंत्रेणाप्स्वेव प्रक्षिपेत्। सर्वप्रायश्चित्तं च। इति कर्ममध्येम
न्मयसाधारणप्रा०। अथ पुरोडाशभेदनोत्पतनप्रा०। यदि पुरोडाशः भिद्येतोत्पतेत वा तदा कि
मुत्पतत्सि किमुत्प्रोष्ठाः शं नः शं नेरिहागहि। अघोरे यज्ञियो भूत्वासीद सदनं स्वमासीद सदने
स्वं। इति मंत्रेण बर्हिष्येनं निधाय। माहिंसीर्देव प्रेरित आज्येन तेजसाज्यस्व मा नः किं च नरीरिषः।
योगक्षेमस्य शांत्या अस्मिन्नासीद बर्हिषीति अभिमंत्र्य सर्वप्रायश्चित्तं कुर्यात्। इति पुरोडाशभेद
नोत्पतनप्रायश्चित्तं॥ अथोद्धरणकाले समारूढमथ्यमानोग्नेरनुत्पत्तिप्राय०॥ ॥यदि समारूढो
ग्निः प्रणयनकाले मथ्यमानो न जायेत तदा लौकिकमानीय गार्हपत्ये निधाय ततः प्रणीय तत्रैवाग्नि
होत्रं जुहुयात्। एतदनुगतेन भवति। अनुगते तु मेथनादि तपस्वतीष्टिं तत्र प्रायश्चित्तं। अनुगतावजा
यमाने पियावज्ञान्मनावन्मनावन्मथितव्यमेवात तस्य पस्वतीष्टिः। ततोग्निहोत्रहोमो नुष्ठेत प्रायश्चित्तेन

मं॰टी॰ ३ सहायदिहोमकालोपि। अतिपन्नस्तदा मनस्वतीहोमश्च कार्यः॥ अनुगतप्रसेपि लौकिकाग्नौ हो
८५ मइति केचित्॥ अथाग्न्यभावे ब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सु काष्ठेषु पृथिव्यादयो गताः॥ पाण्यादी
नां चतुर्णां इंधनस्य प्रणादिदृष्टार्थान्वर्जयित्वा अन्यत्सर्वमदृष्टार्थं भवंति। काष्ठे पूर्दकार्यं न भवति।
पृथिव्यामाहुतिधारणार्थो न भिन्न भवति। पूर्वाल्लाभ उत्तरोत्तरेषु उक्तप्रकारेणाग्निहोमं हुत्वा अ होत्र
नंतरं तदैव मंथयेत्। न पुनर्होम इति। पाणिहोमे ब्राह्मणवासानवरोधः। कर्णे त्वजमांसं वर्जयेत्।
स्तंबे चेद्दर्भेनाधिस्थापीत। अप्सु चेत्सम्यगसम्यग्विवेकेन। एतत्सांवत्सरव्रतं यावज्जीविकं वा। इत्य
ग्न्यभावे प्रा॰॥ अथ पूर्वाहुत्यनंतरमाहवनीयानुगमने प्रा॰ उत्तराहुतिकाले अग्न्यनुगमने आय
तने हिरण्यं निधाय तत्रैवोत्तरां जुहुयात्। इति मंचनाचार्यविरचितायां आश्वलायनसूत्रप्रयोगदीपि एमं॰
कायां तृतीयोध्यायः॥ अथ सप्तसंस्थो ज्योतिष्टोमाख्यः सोमस्तस्य योगोभिधीयते। तत्र सर्वेषामेका ८५

85

हाहीनसत्राणांनानाप्रकृतिभूतः परिमितशंस्योग्निष्टोमसंस्थो ज्योतिष्टोमस्ताबदुच्यते। तस्यादौ ऋ
त्विग्वरणसमये अमुकशर्मणः सोमोभविष्यति तत्र भवता हौत्रं कर्त्तव्यं। इति सोमप्रवाके [illegible]णोक्ते। होता
कोयज्ञः कऋत्विजः कादक्षिणेति तं पृच्छति। तेन प्रतिवचने दत्ते। अग्निर्मे होता स मे वमादिना मंत्रेणायजमा
नो होतारं वृणीते। स हृतो जपेत्। अमहन्मे वो चो तेन भु क्षिणीयेस्वं तं जपित्वा। अग्निष्टे होता स ते होता होता
हं ते मानुष इति मंत्रेणाभ्युपगच्छति। होत्रकाणामपि एवं वरणविधिः। अयं तु विशेषः। आपस्तेहोत्राशं
सिन्यस्त्वा स्ते होत्राशंसिन्यो होत्रकावयं ते मानुषाः। इति सर्वे युगपत्प्रतिजानीते। एवमृत्विजो वृत्वा
वरणक्रमेणैव तान्मधुपर्केणपूजयेत्। घमानः। तत्रास्मदीयानां होत्रादीनां आश्वलायनोक्तविधिना मधु
पर्को भवति। स च उच्यते। पूर्वमेव विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरिति एतानि द्रव्याण्युपकल्प्य।
होतारमासने प्राङ्मुखं उपवेश्य प्रथमं विष्टरं निवेदयेत्। विष्टरो विष्टरो विष्टर इति त्रिरुक्ता। होता नेगृ

म॰टी॰४ होताऽहं वर्ष्म सजातानां विद्युतामिव सूर्यः। इदं तमधितिष्ठामि यो माकश्चाभिदासति। इत्युदगग्रे वि
८६ विष्टर उपविशेत्। ततः पाद्यमिति त्रिरुक्त्वा। पादप्रक्षालनार्थमुदकं अर्घ्यमिति त्रिरुक्त्वा निवेदयति।
होता तदंजलिना प्रतिगृह्य निदधाति। अथाचमनीयमिति त्रिरुक्त्वोदकं निवेदयति। होता तदुदकस्यैकदेशं गृ
हीत्वाऽमृतोपस्तरणमसीति मंत्रेणाचामेत्। ततः शेषेणाचार्यमाचमनं कारयेत्। अथाह्रियमाणं मधुपर्कं
86 मित्रस्य त्वा चक्षुषा प्रतीक्ष इति मंत्रेण होता वीक्षते। दधनि मध्वानीय सर्पिर्वा मध्वलाभे। कांस्यपात्रे कृ
त्वा कांस्येनैवापिधाय। मधुपर्क इति त्रिरुक्त्वा निवेदयति। होता देवस्य त्वेति मंत्रेणांजलिना प्रतिगृह्य।
मधु वाता ऋतायत इति तृचेनावेक्ष्य। सव्ये पाणौ कृत्वा अनामिकया चांगुष्ठेन त्रिः प्रदक्षिणमालोड्य। वस
वस्त्वा गायत्रेण छंदसा भक्षयंत्विति पुरस्तान्निमार्ष्टि। रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंत्विति दक्षिणतः ए म॰
आदित्यास्त्वा जागतेन छंदसा भक्षयंत्विति पश्चात्। विश्वे त्वा देवा आनुष्टुभेन छंदसा भक्षयंत्वित्युत्तर ८६

तः। भूतेभ्यस्त्वेति मध्यात्त्रिरुत्क्षिपति। मंत्रस्यापि त्रिरावृत्तिः॥ अथ मधुपर्कस्यैकदेशं गृहीत्वा। विराजो दोहो
सीति प्रथमं प्राश्याचम्य। पुनः किंचित् गृहीत्वा। विराजो दोहमशीयेति द्वितीयं प्राश्याचम्य। मयि दोहः प
द्यै विराज इति तृतीयं प्राश्याचम्य। पूर्वावशिष्टाचमनीयस्यैकदेशं गृहीत्वा। अमृतापिधानमसीति पिबेत्।
शेषोचार्य्यमाचमनं कृत्वा पुनस्तदेवाचमनशेषं सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति पिबेत्। शेषोचार्य्यमाचमनं
कृत्वा। अथ गोरिति त्रिरुक्ताय यजमानो गां निवेदयति। होता। माता रुद्राणामित्येतामृचं जपित्वा ओमुत्सृज
तेति ब्रूयात्। ततोऽस्मिन्नेव काले गंधमाल्यवस्त्राभरणादीनि ददाति। एवमेव प्रशास्त्रादीनां मधुपर्कः॥ अथ प्रकृ
तस्य ज्योतिष्टोमस्य प्रयोगेऽनुसंधीयते। यत्र सोमः साग्निचित्यस्तत्र अग्निचयननिमित्तोखासंभरणीयेष्टिः के
षांचिन्मते भवति। तस्यां देवताः। अग्निर्ब्रह्मण्वान्। अग्निः क्षत्रवान्। अग्निः क्षत्रभृत्। इति तिस्रः॥ एते
नाग्ने ब्रह्मणा वावृधस्व ब्रह्म च ते जातवेदो नमश्चेत्यग्नेर्ब्रह्म एवं तो याज्यानुवाक्ये। पुरूण्यग्ने सवित्रमि

मं.टी.०४ त्वग्नेः क्षत्रवतः। अग्निरीडे। इह हतः क्षत्रियस्यार्चामिते सुमतिमित्यग्नेः क्षत्रभृतः। पौर्णमासवदन्य
८१ त्। उखासंभरणीयाप्रभृतीनि कर्माणि। औपवसथ्यपर्यन्तानि तेषु मन्त्रेऽन्तरं यत्कर्म तत् पूर्वस्मा
त्कर्मणो न्यूनस्वरेण भवति। एतदप्युखासंभरणीयकर्म पौर्णमासाच्छनैस्तरं भवति। एतच्छनैस्त
रत्वं प्रधानसंबंधमेवेति वेदितव्यं। अंगेषु तंत्रस्वर एव। यत्र पुनरियमिष्टिर्नास्ति तत्र दीक्षणीया
87 प्रभृति उत्तरोत्तरं कर्म शनैस्तरं भवति॥ ॥अपस्वाग्निवित्यस्य एव कर्तौ प्राजापत्यः पशुः। अग्निनि
मित्तः तस्य वायव्यः पशुः पुरोडाशो भवति॥ एषाश्वलायनमतिः। आपस्तंबानां मते वायवे नियुत्वते
पशुर्भवति। प्राजापत्यः पुरोडाशस्तस्येन्द्राग्नवत्कल्पः। विशेषस्तूच्यते। आवाहने वै कश्चिका काऽप
भागा वाहनानंतरं। वायुं नियुत्वंतमावह। वनस्पतिमावहेत्यादि। अस्मिन्नग्नौ समिद्धोऽग्निरीघे जा ए.म०
मदग्न्य एव सर्वेषामाप्रियो भवति। स्रुक्पूर्वमेव। वपायागे। आवायो भूष शुचिपा इत्यनुवाक्या। हे॰ ८१

ह्वायुं नियुतं नं च्छागस्य वपाया मेदसो जुषतामिति प्रैषः । पीवों अन्नां रयिवृध इति याज्या । प्राजापत्यः
पशुपुरोळाशस्तस्योपांशु प्रचारः । य आत्मदा बलदा इत्यनुवाक्या ॥ होता० प्रजापतिं उपांशु पुरोळा
शस्य जुषतां ॥ जुषतामित्युपांशु उच्चैर्वा हविर्होतर्यजेत्युच्चैः रितिप्रैषः ३
। प्रवाशुमच्छेति याज्या । वनस्पतिस्विष्टकृत्सूक्तवाकप्रैषेषु आवाहनक्रमेण देवतानि
गमयेत् । अन्यत्सर्वं मैत्रावरुणवत् ॥ ॥ अथ साग्निचित्ये अग्निचित्ये दीक्षणीयेष्टिः ॥ तस्याः प्रयोग
उच्यते । सामिधेनीषु धाय्ये । अग्निमग्न आ ३ वह । सोममा ३ वह । अग्नाविष्णू आ ३ वह । देवां आज्यपा
नित्यादि । अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत् । यजमानाय परिगृह्य देवां दीक्ष
येदं हविरागच्छतं नः ॐ मा । ये ३० अग्नाविष्णू । अग्निश्च विष्णो तप उत्तमं महो दीक्षापालाय वनतं हि श
क्रा । विश्वैर्देवैर्यज्ञियैः संविदानौ दीक्षामस्मै यजमानाय धत्तां ३ वौ ३ षट् । पंचमे प्रयाजे । ये० ३ स्वाहा

मं॰टी॰२ ग्निं स्वाहा सोमं स्वाहा अग्नाविष्णू स्वाहा देवा इत्यादि। कार्त्रे प्रावाज्यभागौ। प्रधानस्य। अग्निर्मुखं प्रथमो
८८ देवतानां अग्निश्च विष्णो तप उत्तमं मह इति याज्यानुवाक्ये कल्पज्ञे पूर्वमेवोक्ते। विष्टौ स्विष्टकृतः
संयाज्ये। ये३ं यजामहेऽग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाट् अग्नाविष्ण्वोः प्रिया धामा
न्ययाट् देवानामित्यादि। दीक्षणीयाप्रभृतिषु इष्टिषु [illegible]मार्जनं न भवति। प्रायणीयायाः इदमादि इ
88 डायां सूक्तवाके च सर्वत्र आग्नीध्रस्थाने आमूर्न भवति। तद्यथा। उपहूतो यं यजमानो अस्य यज्ञस्यागुर उदृ
चमशीयेति तस्मिन्नुपहूतः इति इडायां। सूक्तवाके तु। अस्यामृध्येद्धोत्रायां देवंगमायामाशास्तेयं य
जमानो अस्य यज्ञस्यागुर उदृचमशीयेत्याशास्ते यदनेन हविषाशास्त इत्यादि सूक्तवाके। नामादेशश्च न क
र्तव्यः। आसवनीयपश्विडायां। ऊर्ध्वं प्रकृत्या संस्थाजपवर्जं। अन्यत्सर्वं पौर्णमासवत्। आ[illegible]ड्वेषु ए.म.
नो दीक्षणीया॥ ॥साग्निचित्ये सोमे दीक्षणीयायां विशेषः॥ ॥अग्नाविष्णू वैश्वानरः। आदि ८८

स्ताः भुवद्वद्भ्यो भुवनपतिभ्यो वा । त्रयाणां विकल्पः । सरस्वती अदितिर्वा द्वयोर्विकल्पः । एवं च नव स्तः प्रधानदे
वताः । अग्नाविष्णोरुक्ते याज्यानुवाक्ये । वैश्वानरो अजीजनत् पृष्टो दिवीति वैश्वानरस्य । धारयन्त आ
दित्यासो जगत्स्था इति द्वे अदितेः । एते एव [stain] भुवद्वद्भ्यो भुवनपतिभ्यो वा । पावका नः सरस्वती पावीरवी
कन्या चित्रायुरिति सरस्वत्याः । वो धायनसं मतिः । आपस्ते बमने । अग्नाविष्णू अग्निर्वैश्वानरः अदितिः इ
ति ति स्तः प्रधानदेवता उक्ताः स्तासो याज्यानुवाक्याः । अन्यत्समानं । एका तिस्रो वा दीक्षाः ॥ ॥ अपदीक्षां ते प्रा
पं यणीयेष्टिः इ[stain]ता ॥ अनाज्यभागा । यदि पूर्वकारिणः कुर्वन्ति तथा सति कुर्यात् । अनाज्यभागायां आवाहने
विशेषः पथ्यां स्वस्तिं अग्नन्आ ३ वह । अग्निं आ ३ वह । सोमं आ ३ वह । सवितारं आ ३ वह । अदितिं आ ३ वह ।
देवां ३ आज्यपां इत्यादि । पञ्चमे प्रयाजे । ये ३ यजामहे स्वाहा पथ्यां स्वस्तिं स्वाहा अग्निं स्वाहा सोमं स्वाहा सवि
तारं स्वाहा अदितिं स्वाहा देवा इत्यादि । प्रधानस्य । स्वस्ति नः पथ्यासु धन्वस्विति द्वे पथ्यास्वस्तेः । अग्ने नय सुपथा

मं॰टी॰२ ८९ ए ये असमाना देवानामपि पंथामगन्मेत्यग्नेः। त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथि
व्यामिति सोमस्य। आ विश्व देवं सत्पतिं य इमा विश्वा जातानीति सवितुः। सुत्रामाणं पृथिवीं द्याम नेह
सं महीमू षु मातरं सुव्रतानामित्यदितेः। अपश्विष्टकृतः। से दग्निरग्नीरत्यस्त्वन्यानि त्यनुवाक्या।
ये रयजाम हे ग्निं स्विष्टकृत मयाळ्ग्निः पथ्यायाः स्वस्तेः प्रिया धामान्ययाट्ग्ने प्रिया धामान्यया
ट् सोमस्य प्रिया धामान्ययाट् सवितुः प्रिया धामान्ययाट् अदित्याः प्रिया धामान्ययाड् देवानामाज्य
पानामित्यादिः जुषतां हविः से दग्निरिति याज्या। इडायां पूर्ववत्। सूक्तवाके चापथ्यास्वस्तिः इदं ह
हविरित्यादि। शंयुंतेति पूर्वैस्य यज्ञोऽयो र्ग्रहणं। न पत्नीसंयाजाः॥ ॥संस्थितायां प्रायणीयायां॥
अध्वर्यवो यज्ञानेक्रीणंति। तत्रत्र त्ला दक्षिणत आस्ते। अध्वर्यवः सोममनसि कृत्वायदानयंति। ए म॰
तदा होता शुचिर्भूत्वानसः पश्चात्त्रिपदमात्रे देशे चक्रवर्त्मनोरंतरे पावस्थाय प्रेषितः सन्। ८९

त्वं विप्रस्त्वं कविरित्यनेन मंत्रेण दक्षिणपादस्य प्रपदेन दक्षिणस्यां दिशि पांसूंस्त्रिरुद्वपेत्।

पार्ष्णिमचालयन्सकृन्मंत्रेण द्विस्तूष्णीं। अथाभिहिंकृत्य मंद्रस्वरेण सोमप्रवहणीया अन्वाह

। प्रायणीयावत्सोमप्रवहणमित्युक्तत्वात्। भद्रादभिश्रेयः प्रेहीत्येतामृचं तिष्ठन्नेव ब्रूयात्त्रिः।

अस्यास्तृतीये वचने अर्द्धर्चे वसाने। यावदध्वर्युर्वानगाछंति। गाथ स्तुतिष्ठन्नेव शिष्टार्द्धर्चमुक्त्वा

सं चक्रव[illegible]नी अंतरेणैवानुव्रजन्नुत्तरे अनुब्रूयात्। सोमयास्ते मयोभुव इतित्रिस्रः। सर्वेनंदंतीत्येका।

आगं देव ऋतुभिर्वर्द्धतु क्षयमित्यर्द्धर्चान्तमेत्। अपपलीशालाया आगनतः उदङ्मुखेन स्थितव्यं वक्षि

नेतस्य दक्षिणपार्श्वेन गत्वा राजानमभिमुखो वतिष्ठते। धुरादंडस्य समीपे आप्रपादनात्। प्रपाद्य

माने राजनि शकटमग्नेणातिक्रम्य राजानमनुव्रजन्नु सनः सुपाभिरित्यर्द्धर्चेन याते धामानि हविषा य

जंतीत्येतामृचमुपसंतनोति। अर्द्धर्चान्तमेत्। यावद्राजनिधानं भवति। निहिते राजनि गायत्रस्फानः प्रतर

मं॰टी॰३ णः इमां धियं शिक्षमाणस्येत्येतामुपसंनह्य तयापरिदध्यात्। सज्ञानमुपस्पृश्य न्वसनेशुभवाऽस्म
९० पिवसने शुस्पर्शनं चेद्भवति तदा ऽऽप्यायने ऽप्यर्थं कृत्यो भवति। प्रक्रमस्थानं गत्वा तिष्ठन्नेव भूर्भु
वःस्वरिति वाचं विसृजेत्। तिष्ठत्सं प्रैषे प्रतप्यैव वाग्विसर्गः इत्युक्तत्वात्। अथातिथ्येष्टिः। तस्यां ब्रह्मा
90 तु बर्हिर्वेद्यियो दिशं व्रजेयुः कर्त्तारस्तां प्राचीं कृत्वा दक्षिणतो व्रजेत्। से तामंत्रितः स्थानाचमने कृत्वा
तीर्थेन प्रविश्य। अग्निमंपनीया अन्वाहवैश्वदेव्यामुक्तन्यायेन। सामिधेनीषु धाय्ये भवतः। आ
वाहने। अग्निमग्न आ ३ वह। सोममा ३ वह। विष्णुं आ ३ वह। देवां आज्यपानित्यादि। पंचमे प्रयाजे।
ये॰ स्वाहाग्निं स्वाहा सोमं स्वाहा विष्णुं स्वाहा देवा आज्यपा इत्यादि समिधाग्निं दुवस्यतेत्याप्याय
स्वसमेतु त इति अतिथिमंत्या वाज्यभागयोः पुरोनुवाक्ये। निलेयाज्ये। इदं विष्णुर्विचक्रमे तदस्य प्रि रा॰मं॰
यमभि पाथो अश्यामिति विष्णोर्याज्यानुवाक्ये।। स्विष्टकृतः। होतारं चित्ररथमध्वरस्येत्यनुवाक्या। ९०

येऽग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाट् विष्णोः प्रिया धामान्ययाड्
देवानामित्यादि। हविः प्र प्रायमग्निरिति याज्या। पूर्ववदिडोपह्वानं। इडांते यमिष्टिः॥ सोमिक्यः सर्वा इष्ट
यः उपांशु हविषो भवंति। सोमिक्य इत्युक्तत्वात्। प्रायणीयायां पथ्यां स्वस्तिमग्न आवह। तत्र अग्निरावह
उच्चैर्भवति। संस्थितायामातिथ्यायां ऋत्विजः सर्वे तानूनप्त्रमाज्यमभिमृशंति। अनाधृष्टमिति मंत्रे
ण। स्थिते माधाइत्यं तेन। तानूनप्त्रप्रभृत्यासव्यविसर्जनात्। अन्योन्यं द्वेषादि न कर्त्तव्यं। तस्मादाहुर्नस
तानूनप्त्रिणे द्रोग्धव्यमिति ब्राह्मणवचनात्। अपस्पृष्टोदकं राजानमाप्याययंति। अंशुरंशुष्टे देवसो
मेति मंत्रेण॥ इदमाप्युपसत्सु उदकोपस्पर्शनं यत्र यत्र विधीयते तत्र मदंतीभिरेव कर्त्तव्यं। सोमाप्याय
नेनाम अद्भिः स्पर्शनं। स्पृष्टोदकं निह्नुवंते। प्रस्तरे पाणीन्निधायोत्तानां दक्षिणात्सव्यानीचः। एष्टा रायः इ
ति मंत्रेण। निह्नवो नाम द्यावापृथिवीभ्यां नमस्करणं। तथा च ब्राह्मणे। प्रस्तरे निह्नुवते द्यावापृथिवीभ्या

मं·दी·३ मेवतंनमस्कुर्वंति॥ ॥अथप्रवर्ग्येणप्रचरिष्यत्सुपूर्वकारिभुहोतातीर्थेनप्रविश्यसप्रोदकं।उत्तरे
९१ णाखरंगत्वापश्चादग्निरसनोवेशनेकृत्वोपविशेत्।ततःअध्वर्युणाब्रह्मन्प्रवर्ग्येणप्रचरिष्यामइतिप्रे
षितःब्रह्माभूर्भुवस्वर्बृहस्पतिप्रसूतइतिजपित्वा।ॐप्रचरतेत्युच्चैरनुजानाति।सर्वत्रयथाकर्मत्वादेत्रे
शुक्तत्वात्।अभिष्टुयात्।उद्गगावानमत्वमचमनवानमुक्त्वाप्रणुत्यअवस्येत्।एवमुद्गगावानमुच्यते।म
91 ध्यमस्वरेणोत्तमस्वरेणवाअभिष्टवनंकुर्यात्।मध्यमादिघर्मेइत्युक्तत्वात्।पूर्वपटलस्यमध्यमस्व
रः।उत्तमपटलस्योत्तमइतिकेचित्।अभिहिंकृत्यब्रह्मजज्ञानंप्रथमंपुरस्तादितित्रिःइयंपित्रेराष्ट्रे
त्यग्रइत्येका।महान्महीअस्तभायइत्येक॥अभित्यंदेवंसवितारमोण्योरित्येका।चतुर्थ्यांकृपास्वःत
पास्वःइतिपदविकल्पः।इत्येतास्वनस्वःकल्पजाः।अथसंसाद्यमानेमहावीरेसंसीदस्वेत्येकंब्रूयात्।अ एम०
ज्यपानेमहावीरेअंजंतियंप्रथयंतइतिब्रूयात्।सादनाञ्जनयोर्विपर्यासेऽपिविपर्यासोभवति।पतंगम ९१

कं मसुरस्येति द्वे। यो नः सनुत्यो अभिदासद् अग्न इति द्वे। भवा नो अग्ने सुमना उपेताविति द्वे। कृणुष्व पाज इति प
ञ्चापरित्वा गिर्वण इद्वै कं कतीयानी यमाना सुरक्षा। अधिद्वयोरदधा इत्यृचा। यद्दत्त इदं समिधो विरराज्ञिनी
रधाति। सुकं ते अग्न्वरिति एकया सुवर्णोह कम उपधीयमाने। अपश्यं गोपामनिपद्यमानमित्येका। कर्णा
जिनानि धवित्राणि तेषामादाने। स्तके द्रप्सस्येति तिस्र वर्चः सूक्तं। अयं वेन श्चोदयदित्येका। पवित्रं ते विततं ब्रह्म
णस्पत इति द्वे। वियत्सवित्रं इत्येका। कल्पजाः। गणानां त्वेत्येकेन विंशार्चे सूक्तं। प्रपथ्यस्येति तर्चं सूक्तं। अ
पश्यं त्वेति सूक्तस्य आद्यया यजमानमीक्षते। द्वितीयया पत्नीं। तृतीयया त्मानं। काण्ड धर्मोत्राश्विनावभि
तिन वर्चा। आ मा त्वग्निरिति पंचर्चं सूक्तं। ग्रावाणो वेत्स्व ष्टर्चं सूक्तं। ईळे द्यावापृथिवी पूर्वचित्तय इति पञ्च
विंशार्चं सूक्तं। अस्य सूक्तस्योत्तमायाः पुरस्तात् अरूरुचदुषस इत्येकामावपेत्। अस्याश्चोत्तरेणार्द्धर्चेन
पत्नीमीक्षेत। द्युभिरक्तुभिरित्येतापरिदधाति। अथाध्वर्यवो होतारं उत्थाप्य मंत्रान्वाचयंति। तान् ब्रूयात्।

मं·टी·४ इति पूर्वपटलं। अथोत्तरं पटलं॥ ॥उपविष्टेषु ब्रह्मादिषु धर्मदुघामाह्वयति। अध्वर्युर्गृह
९२ पत एहीति स एवोत्तरस्य पटलस्य संप्रैषः। इति सच्चयितं अपहोतानभिहिंकृत्या उपह्वयेसुदुघां
धेनुमेतामिति द्वे। आघ्रांत्रि ब्रूयात्। अभित्वादेव सवितरित्येका। समीवत्सं न मातृभिरित्येका। सं
वत्स इव मातृभिरित्येका। यस्ते स्तनः शशय इति स्तनं वत्से धावति प्रस्नवनार्थं। गोरमीमेदनु
92 वत्सं मिषं तेन मसेदुपसीदत संजानाना उपसीदन्नभिज्ञु। आदशभिर्विवस्वतश्च दुहे इति सप्तैकामि
ति चैकपातिन्यः। समिद्धो अग्निरश्विनाइत्येका। समिद्धो अग्निर्वृषणा रतिर्दिव इत्येका। एते द्वे कव्य
ज्ञे। तदु प्रयक्षतममस्य कर्म। आत्मन्वन्नभो दुह्यते घृतं पयः। उत्तिष्ठ ब्रह्मणस्पत इत्येकपातिन्यः।
एतामुक्त्वा अवतिष्ठते। घर्मदुघायां दुग्धायां अधुक्षत्पिप्युषीमिषमित्येतां ब्रूयात्। आह्रियमाणे एम·
पयसि। उप द्रव पयसा गोधुगोषमित्येतां कल्पजां ब्रूयात्। गर्भे पयसि आसिच्यमाने। आनूनमश्वि ९२

नोर्द्ध्वःषिरित्येतां ब्रूयात्। आज्ये पयसि आसिच्यमाने आसुते सिंचतेति ब्रूयात्। आसेचनविपर्यासे स्त्र
ग्विपर्यासः। उभयोरासिक्तयोः समुत्ये महतीति ब्रूयात्। महावीरमादाय यो निष्टप्तस्तु अध्वर्युः उदुष्य दे
वः सविता हिरण्ययेत्यनूत्तिष्ठेत्। प्रैतु ब्रह्मणस्पतिरित्यत्र व्रजेत्। गंधर्व इत्येत्यनया खरस्य पश्चात् आ
उत्तु स्वस्तिष्ठन्नु खरमवेसनेत्। तं परिक्रम्य व्रजित्वा उत्तरोपि देशं प्राप्य। नाके सुपर्णमित्येतामुक्त्वा स्वगं ते
प्रणवोच्चरणसमकालं उपविशेत्। अनिरस्यतृणं। एतेनैतेन पिज्ञापितं भवति। अस्मिन् घर्माभिष्टव
नमध्ये यत्र यत्र क्रियांतरं विहितं अपश्यं त्वेत्यादिकं उदुष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठेदित्यादि
कं यजमानमीक्षतेत्यादिकं च तत्सर्वं मंत्रसमकालमेव कर्त्तव्यं। न पुनर्मंत्रांत इति। अथ प्रेषितो यज
ति। ये ३ तप्तो वां घर्मो नक्षति स्वहोतेत्येकां कल्प्य जा। उभा पिबतमश्विनेत्येकां। एताभ्यामगम्यामनाद्विष्पा
नवानं यजति। आगूर्वषट्कारे तु सकृदेव। अग्ने वीहीत्यनुवषट्कारः। घर्मस्याग्ने वीहीति वा द्विरनुमंत्रणं।

मं०टी०४ अपक्रम्यालाद्दक्षिणेनगत्वानिरसनोपवेशनेकृत्वावषट्कृतेजपति। अनुवषट्कृतेच। विश्वा
९३ आशादक्षिणसदित्येतांकल्पजांऋचं। एवमपराह्णिकेप्रवर्ग्ये। अयंतुविशेषः॥ यदुस्रियास्वा
हुतंघृतंपयइत्येकाकल्पजा। अस्यपिबतमश्विनेत्येताभ्यामृग्भ्यांपूर्ववदनादिष्टयजति। उक्तोनु
93 वषट्कारः। अनंतरं अप्रेषितएवाभिष्टवनशेषंब्रूयात्। स्वाहाकृतःशुचिर्देवेषुघर्मइत्येकाक
ल्पजा। समुद्रादूर्मिमुदियर्तिवेनइत्येका। द्रप्सःसमुद्रमित्येका। सखेसखायमित्येका। ऊर्ध्वऊ
षुणऊतयइतिद्वे। तंघेमित्थानमस्विनइतिप्रागाथीपूर्वाह्णे। काएवीमपराह्णे। अर्पचिदस्येतिपूर्वा
ह्णे। होत्राभिरग्निमित्यपराह्णे। सर्वेषुप्रवर्ग्येषुअन्यतरंवाकुर्यात्। अस्मिन्पक्षेउत्तमेप्रवर्ग्येका
एवीमेवकुर्यात्॥ केचिदुत्तमेहनिप्रवर्ग्यद्वयेपिकाएवीमेवब्रुवते। अनयोर्ऋचोः विशिष्टकालनि ए०म०
र्देशादन्यत्सर्वंसाधारणमितिगम्यते। अथयावकशोचेत्येतामुक्त्वा। घर्मभक्षमाकांक्षते। अथा ९३

हुतेभक्षमिच्छामिव प्रतिगृह्य अध्वर्युर्ब्रह्मा प्रतिप्रस्थाताग्नीध्रयजमान इत्युपहूय । ब्रह्मा अध्वर्युर्होताप्र
तिप्रस्थाताग्नीध्रयजमानः इत्युपहूय । हुतं हविर्मधु हविरिन्द्रतम इत्यनेन मंत्रेण भक्षयति । अत्रापि प्रा
णभक्ष एव यजमानं वर्जयित्वा । आचम्य पूर्ववदुपविश्य । संस्थायमानायेति प्रेषितः सन् अभिष्टवन
शेषं ब्रूयात् । अस्येनोनयोनिमित्येका । आयस्मिन्सप्तवासवा इत्येका । कल्प्यजा । स्यवसाद्भगवती हि भूया इ
ति परिधानीया । उत्तमे प्रवर्ग्ये प्रागुत्तमायाः हविर्हविष्म इत्येतामावपेत ॥ उत्तमेहनि प्रवर्ग्यं द्वयेपि के
चित् ॥ ॥ अथोपसदिष्टिरुच्यते ॥ ॥ तस्यां पित्र्यावज्ज पक्षेपः । स तंत्रोपांशु प्रयोज्या । स्नानाचमन
प्रपदनानि न भवंति । प्रवर्ग्यार्थं प्रपन्न एवोपसदमपि कुर्यात् । यत्र पुनः प्रवर्ग्यो न स्यात्तत्र प्रवर्ग्यव्यति
रिक्ते उपसन्मात्रमेव क्रियते । तत्र स्नानाचमनादीनि कर्तव्यानि । तथा चोक्तं । स्नानादि यत्स्या यनिःश्रि
यायाः प्राग्भाविनेन क्रियते समस्तं । पूर्वं यदा नास्ति हि घर्मकर्म स्नानादि सर्वं करणीयमेवेति । वेदिः श्रोण्यो

मं·टी·४ न्तरयेत्सेवमादिनाधर्मेणास्थित्वाप्रेषितोग्निर्हिं कृत्वा। उपसंधायमीळ्हुष इतितिस्र ऋचः सामिधेनी
२४ रन्वाह। एकैकामृचं त्रिरनुवान[illegible]मुपांशुसप्रणवां। ऋचां परस्परसंधानं न भवति। एवं नवसामि
धेन्यः। एवं नवसामिधेनीरनूच्यतासामुत्तमेन प्रणवेनसंधाय अग्निं सोमं विष्णुमित्यावाहयेत्। अग्नआ
वहेति तु प्रथमदेवतां। इत्यावाह्येति वचनात्। एवं च अर्थात्सामिधेन्यावाहनयोर्यदंतराले तत्सर्वं लुप्यते।
95 केचिदावाहनं नेच्छंति। अनावाहनेप्येता एव देवतायष्टव्याः। अतऊर्ध्वं प्रागग्घोतृषदनाभिमंत्राणां लुप्य
ते। आवाहनानंतरमेव अध्वर्युणा ईळितः सीद होतरिति वोक्तः तूष्णीं होतृषदनमवेक्ष्य तूष्णीं निरस
नोपवेशने कृत्वा तूष्णीं जानुशिरसा बर्हिरूपस्पृशति। मंत्राणां क्रियाशेषत्वान्मंत्रलोपेपि क्रियाया न
लोपः। अथ स्रुगादापनमाह। न प्रयाजानाज्यभागौ। प्रधानस्य। अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया इत्य एम०
ग्नेः। त्वं सोमासि सत्पतिर्गयस्फानो अमीवहेति सोमस्य। इदं विष्णुर्विचक्रमे त्रीणिपदा विचक्रमइति विष्णोः। २४

स्विष्टकृदादि लुप्यते प्रयाजा आज्यभागौ च। सोमाप्यायननिह्नवौ पूर्ववत्कर्त्तव्यौ। एवमेवापराह्णेषूप
सत्। अयं तु विशेषः। इमां मे अग्ने समिधमितिति सृचः सामिधेन्यः। पूर्ववद्देवता आवाहयेत्। याज्या
नुवाक्यानां विपर्यासः। पूर्वाह्णे उक्तानाः पापायोये तानपराह्णे न्युं[stain] कुर्युः। ये न्युङ्खास्तानुक्तानानि[stain] ङ२
ति। एतयोरुपसदोर्मध्ये या पौर्वाह्णिकी सा पूर्वाह्णे कर्त्तव्या। अपराह्णे अपराह्णिकी कर्त्तव्या। औपवस
थ्येऽहनि उक्तमेव्युपसदो पूर्वाह्ण एव कुर्यात्। औपवसथ्य उभे पूर्वाह्ण इति वचनात्। अपसाग्निचित्ये
सोमे विशेषः। प्रथमस्यामुपसदि समाप्तायां चित्याग्निभ्यः प्रणीयमानेभ्य इति प्रेषितः। पुरीष्यचितये
न्वाह। यदि होतादीक्षितः अदीक्षिते हो[stain]तरि यजमानो ब्रूयात्। यत्र स्थः संप्रेष्यत्यध्वर्युः तस्य पश्चात्सद
मात्रे वस्थाय। अभिहिं कृत्य पुरीष्यासो अग्नयः इत्येतामृचं उपांशु संप्रणवां त्रिरुक्त्वा तिष्ठन्नेव भूर्भुवस्स्व
रिति वाचं विसृज्य। प्रणयत्तेलुच्चैर्ब्रूयात्। संप्रेष्य व्रजेयुः। तथा सति अनुब्रुवन्ननुव्रजेत्। आगत्य प्रक

मं० टी० ४ मस्थाने पूर्ववद्धाचं विसृज्य प्रणयनेति ब्रूयात्। संचिते ग्नौ छंदोगौ। रनुगाने कृते। अग्निपुछस्य पश्चान्नि
९५ रस्तनोपवे(शनेकृत्वा)। अभिहिंकृत्य मध्यमेन स्वरेण। अग्निरस्मि जन्मना जातवेदा इति। एतामृचं त्रिः
शंसेत्। एतदपि होतर्यदीक्षिते यजमान एव ब्रूयात्। अपसाग्निचित्येऽनग्निचित्ये वा प्रणयने पशुबं
95 धवत्। अपवृत्ता आशुः शिशान इति। अप्रतिरथं संज्ञक सूक्तं जपित्वा दक्षिणतो ग्नेः सा(ग्)ग्निचित्ये तु दक्षि
णतो ग्नेर्बर्हिर्वै घुपविशति। आस्ते वसोर्धारां चोपगच्छति। वसोर्धारा नाम होमः॥ ॥ औपवसथ्येहनि
प्रथमायामग्निप्रणयनीयायाः तूर्ध्वस्वरादिनियमो नास्ति। इछ्यामेन्द्रादीनामन्यतमोग्नात्युः। तथाच
ब्राह्मणे। तस्मादुपवसथे यावत्या वाचा कामयीत तावत्यानुब्रूयात्। उच्चैरेव अध्वर्यु वदात्। अपसा(ग्)
ग्निचित्ये विशेषः॥ अग्निप्रणयनीयानंतरं वैश्वानरीयेष्टिर्भवति मध्यमेन स्वरेण। वैश्वानरेऽअ एम०
जीजनस्य छोदिवीति याज्यानुवाक्ये। प्रधानस्य। केषांचिदध्वर्यूणां मते कृत्स्नेष्टिर्भवति। न स्याः प्रयो ९५

ग उच्यते। तस्यां प्रयाजानुयाजा न भवंति। न स्विष्टकृत्। आमंत्रितस्यानाच मनेकृत्वा तीर्थेन प्रविश्यअ
ग्निपुच्छस्य पश्चाद्वस्याय नमः प्रवक्ष्ये इत्यादि। आवाहने। अग्निमग्न आवह॥ सोममावह। अग्निं वै
श्वानरमावह। आवह जातवेदः सुयजा यजेत्यादि। देवां आज्यपां इत्यादेर्लोपः। वार्त्रघ्नावाज्यभागौ। प्रधा
नस्योक्तैयाज्यानुवाक्ये। स्विष्टकृदादि लुप्यते। आ सूक्तवाकात्। सूक्तवाकप्रभृतीष्टिशेषः कर्तव्यः। संस्था
जपवर्ज्यं। सूक्तवाकेऽग्निरिदं हविः। सोम इदं हविः। अग्निर्वैश्वानर इदं हविः। अस्यामृधेद्धोत्रायां देवंगमा
यामित्यादि। देवा आज्यपा इत्यस्य लोपः। पूर्ववदागूः॥ ॥अथाग्निचित्ये अनग्निचित्ये हविर्धाने प्रवर्त्त
यंति पूर्वकारिणः। तदा होता शुचिर्भूत्वा दक्षिणस्य हविर्धानस्योत्तरस्य चक्रस्य यद्वर्त्म पादयोर्मध्ये य
थास्यात्तथा पश्चात्त्रिपदमात्रे देशे स्थित्वा प्रेषितोऽग्नेभिहिंकारात्। तं विप्र इति मंत्रेण पादस्य पार्ष्णी मसं
दयन्। प्रपदेन दक्षिणापांसून् स्त्रिरुद्वर्तेत्। सकृन्मंत्रेण द्विस्तूष्णीं। अथाभिहिंकृत्य युञ्जे वां ब्रह्म पूर्व्यं

मं० टी० ४ नमोभिरित्येतां तिष्ठन्नेव ब्रूयात् । अस्यास्तृतीये वचने अर्द्धर्चारमेत् । यावदध्वर्युर्वा गच्छति । गच्छत्सु तेषु
९६ तिष्ठन्नवशिष्टमर्द्धर्चमुक्त्वा अनुव्रजं व्रजन्नन्वाह । प्रेतां यज्ञस्येति तिसृः । प्रमे इव यतमानेयदैतमित्येकां
अस्या अर्द्धर्चारमेत् । अव्यवस्ता चेद्रशना । अपबद्ध्यां रशनायां । अधिद्वयोरदधा उक्थ्यं वच इत्येकां ।
मीक्षमाणः । असंयत्त इत्यर्द्धर्चे न विश्वारूपाणीत्येतामुपसन्तनोति । अस्या अर्द्धर्चारमेत् । मेथ्यावनिहते वे
त् । मेथ्यो रूपनिहतयोर्विनाकमित्यर्द्धर्चे न परिवीतागिर्वणो गिर इत्येतां परिधानीयामुपसन्तनोति । केचि
दध्वर्यवः पूर्वमेव मेधीहननं कृत्वा पश्चाद्रशनाबंधनं कुर्वन्ति । तेषां हप्रयोगे परिवीतागिर्वणा इत्येतामुक्त्वा
विश्वारूपाणीति परिदध्यादिति केचिदाचक्षते । वृत्तिकारस्तु सेत्नमे वानुवचनं कर्त्तव्यमित्याहुः । अवबद्ध्यायां
रशनायां मेध्यो रूपनिहतयोरिति मूलकालविशिष्टत्वेनैतयोः श्रवणात् । प्रक्रमस्थाने तिष्ठन्नेव भूर्भुवः राम०
स्वरिति वाचं विसृजेत् । अग्नीषोमौ प्रणेष्यत्सु पूर्वं कारिषु ।। ।। होतातीर्थेन प्रविश्य आग्नीध्रीयाय ९६

ततं सदस्योत्तरेण गत्वा। पूर्वया द्वारा पत्नीशालां प्रविश्य। उत्तरेण गत्वा शालामुदीच्यमतिव्रज्य। पश्चाग्नि

रसनोपवेशने कृत्वा प्रेषितोऽभिहिंकृत्यासादीहि देव प्रथमाय पित्र इत्येतां कल्यजां त्रिरन्वाहासीनः।

अस्यास्तृतीये वचने अर्द्धर्चे रमेत्। यावदध्वर्युर्वेदगच्छति। गच्छत्सु तेषु शिष्टमर्द्धर्चमासीन एव तान् अ

नुव्रजन्नुत्तरामन्वाह। प्रैतु ब्रह्मणस्पतिरित्येका। होता देवो अमर्त्य इति तिसृः। उप त्वाग्ने दिवे दिव इति

तिसृः। उप प्रियं पनिप्नतमित्येका। अस्या अर्द्धर्चे रमेत्। आग्नीध्रीये अग्नौ निहिते अभिहूयमाने। अग्न आवि

भ्रत इत्यर्द्धर्चेन। अग्ने जुषस्व प्रति हर्य तदित्येतामुपसंतत्य पितुमाँ इव क्षय इति चतुर्मात्र प्रणवेनोपरमे

त्। आग्नीध्रीयमतिव्रजत्सु अध्वर्युषु सदस्यमप्युत्तरेणाग्नीध्रीयमतिव्रज्य। सोममनुव्रजन्हविर्द्धानं गच्छे

त्। अप्रेषित एव सोमो जिगाति गातुविदिति तिसृः। नमस्य राजन्नित्येका। अस्या अर्द्धर्चे रमेत्। प्रपाद्यमानं राजानं

मनुप्रपद्येत। दाधार दक्षमुत्तममित्यर्द्धर्चेन। अन्तश्च प्रागा इत्येका। श्येनो न योनिमित्येका। अस्तभ्नाद्याम

मं॰टी॰४ सुर इत्येषा परिधानीया। स्रेमाचारश्चे धृतमानः तदा एवावेदस्वेत्येतया परिदध्यात्। प्रक्रमस्थाने उपवि
९७ श्य भूर्भुवस्स्वरितिवाचं विसृजेत्॥ ॥अथ ब्रह्महोत्रवदवस्थानवर्जं अपरेण वेदिमतिव्रज्य दक्षिण
तः श्याकामुखी यस्य निरसनोपवेशने कृत्वोपविशति। ब्रह्महोतारमनूत्थाययथैतमग्रतो व्रजेत्। यदि
राजानं प्रणयेत्। यदि न प्रणायेत्तथासति दक्षिणतो व्रजेत्। जपत्याप्नुः श्मिशान इतिसृजे। प्राप्य हवि
97 र्द्धाने गृहपतये राजानं प्रदाय। हविर्धाने अग्रेण। अपरेणवाति व्रज्य दक्षिणत आहवनीयस्योपविशेत्।
एतत् ब्रह्मासनं पशौ प्रातश्चावपाहोमात्। अथ यदि अग्रेण हविर्द्धाने गच्छेत्तत्तथासति प्रत्येयात्। सोमेह
विर्द्धाने प्रपाद्यमाने पुनः तत्रैवोपविशेत् तूष्णीं॥ ॥अथाग्नीषोमीयेण पशुनाचरंति॥ ॥दण्डप्रदानां
ते कर्म उत्तरवेदिसमीपे भवति। तस्यऐन्द्राग्नवत्कल्पः। विशेषस्तूच्यते। अस्य पुरस्तादुपरिष्टाद्धानेष्टिः। राम॰
इष्टेर्निरूढशेषत्वात्। उत्तरवेदेः पश्चान्निरसनोपवेशने कृत्वापूर्णपंजनीया अन्वाहा। ततः नीर्थेन प्रवि ९७

रस्य पश्चादुत्तरवेदेरवस्थाय अग्निमंथनीयाऽन्वाहा। तत्रस्था एवनमः प्रवक्र इत्यादि। आवाहने वैक
ल्पिकावाज्यभागावावाहनानंतरं। अग्नीषोमावा३वह। वनस्पतिमा३वह। देवां आज्यपां इत्यादि। प्रवृ
ताहुतीर्हुत्वा। प्रशास्तारं तीर्थेन प्रपाद्य दण्डमस्मै दायतमग्रतः कृत्वोत्तरेण हविर्धानेति व्रज्य। पूर्वयाद्वा
रा सदः प्रविश्य। उत्तरेण यथास्वं धिष्ण्यावति व्रज्य। होतृषदनाभिमंत्रणादि स्रुगादापनांतं करोति
होता। मैत्रावरुणस्तु स्वधिष्ण्यस्य पश्चादवतिष्ठते। अथ प्रयाजाः। पर्यग्न्यनुवचनं। उपप्रैषः। अ
ध्रिगुः। स्तोकानुवचनमुत्तमप्रयाजः। आज्यभागौ वपायागे विशेषः। अग्नीषोमाविमं सुमे इत्यनुवा
क्या। हो०दग्नीषोमौ छागस्य वपाया मेदसो जुषेतामिति प्रैषः। स्रुवमेतानीति याज्याने दमादिषु मार्ज
नानिषेधस्यैष्टिककर्मविषयत्वात्। अत्र चात्वाले मार्जनं कर्त्तव्यं। अथ पुरोडाशयागः। अग्नीषोमायो
ऽग्रवाभित्यनुवाक्या। हो०दग्नीषोमौ पुरोडाशस्य जुषेतामिति प्रैषः। आन्यं दिवो मातरिश्वा जभारेति

मं·रि·४ याज्या। अथ साग्निचित्ये विशेषः। पशुपुरोडाशः स्विष्टकृतः पुरस्ताद्देवसूनां हवींष्यन्वायातयेयुः। पूर्वका
१८ रिणः। तेषां देवता। अग्निर्गृहपतिः। सोमो वनस्पतिः। सविता सत्यप्रसवः। बृहस्पतिर्वाचस्पतिः। इन्द्रो ज्येष्ठः
। मित्रः सत्यः। वरुणो धर्मपती॥ रुद्रः पशुमान्पशुपतिर्वा। इत्यष्टौ देवताः। आसां याज्यानुवाक्या उपांशु प्रयो
क्तव्याः। याज्यासु देवतादेशो न कर्त्तव्यः। अन्वायात्यत्वात्। त्वमग्ने बृहद्वयो हव्यवाळग्निरजरः पिता न इत्या
98 दि सूक्त पठिताः षोडश ऋचः। आसामष्टानां याज्यानुवाक्याः। अथास्मिन्नेवावस्थाने सर्वपृष्ठसंज्ञकानि ह
वींषि चेदन्वायातयेयुः। तेषां देवताः। अग्निर्गायत्रस्त्रिवृद्राथंतरो वासंतिकः। इन्द्रस्त्रैष्टुभः पञ्चदशो बा
र्हतो ग्रैष्मः। विश्वे देवा जागताः सप्तदशा वैरूपा वार्षिकाः॥ मित्रावरुणा वानुष्टुभा वैकविंशो वैराजौ शारदौ।
बृहस्पतिः पांक्तस्त्रिणवः शाक्वरो हैमंतिकः। सविता तिछंदास्त्रयस्त्रिंशो रैवतः शैशिरः॥ अदितिर्विष्णुप रम०
त्न्यनुमतिः। वैश्वानरः क इति। आदित्याः षड्गायत्र्यादीनां एकैकस्या देवतायाश्चत्वारश्चत्वारो गुणाश्चः। १८

विष्णुपत्न्यदित्यागुणाः। एवं दश देवताः। आसां याज्यानुवाक्याः। समिद्धशामाशयानः स्वर्विदित्याद्याः स्तत्रप
ठिताः ४ षोडशर्चः। अग्न्यादीनामष्टानां याज्यानुवाक्याः। वैश्वानरे अजीजनस्य ष्टोदिवीति वैश्वानरस्य।
कोऽत्र घर्मं केधुरिग्गास्तनस्येति द्वैकस्य। अत्राप्यन्वायास्यत्वादुपांशुत्वादिधर्मो वेदितव्यः।। अपसाग्नि
चित्से अनग्निचित्से पशुपुरोडाशस्विष्टकृत्प्रकृतिवत्। अपहविर्यागः। अग्नीषोमायत्माहुतिमिस्व
नुवाक्या।। होऽग्नीषोमौ छागस्य हविष आत्ताम घ॰ घस्तां नूनं॰ करत एवाग्नीषोमौ जुषेतामिति प्रै
षः। अग्नीषोमा हविषः प्रस्थितस्येति याज्या। वनस्पतियागे। देवेभ्यो वनस्पत इत्यनुवाक्या।। होऽवन
स्पति॰ रशनया [illegible] धितः यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य॰ यत्राग्नीषोमयो
श्छागस्य हविषः॰ यत्र वनस्पतेः प्रिया पाथांसीत्यादि। एवमेव स्विष्टकृति अयाडिति विशेषः। औप
सदैर्गारैरनभिपरिहारे प्रयतेरना। आग्नीध्रीयाद्दाहरेऽप्युः उत्तरे पाहोता [illegible] रमति कस्य प्रत्यानीया

मं. टी. ४ ग्नतो निदधाति। शामित्राद्वेदाहरेयुः। दक्षिणेन मैत्रावरुणं गत्वा अग्नतो निदध्यात्। आसवनीये
९९ तु पुनः अंजसाहरणं भवति। अपामूयाजादि वेदहरणान्तं करोति। वेदग्रहणकाले सदसोभिक्र
म्य वेदं गृह्णीयात्। शाकामुखीये पत्नीसंयाजाः। नेदमादिषु स्रुदयमूदौ द्वासनं अर्वागनूबंध्या
99 याः। अवभृथवशाद् उपेक्षणः संस्थितः। अथ का उपवसथ अन्तमेव यज्ञं तन्वते इति ब्राह्मणवच
नात्। आ संस्थाजपात् कर्तव्यं। ब्रह्मा तु यद्यन्तो हविर्धाने न गतस्तदा तेनैव प्रत्येत्या यद्धि तु अपरेण
गतः तदा अपरेणैव प्रत्येत्य सर्वप्रायश्चित्तानि जुहोति कृत्वा निष्क्रामति। अथ वसतीवरीहूयमाणासु बुपरि
अदीक्षितायै स्वस्तिजो निष्क्रम्यासीरन्॥ ॥समाप्तोऽग्नीषोमीयः पशुः॥ अथ यस्यां रात्रौ अग्नीषोमीयः स
माप्यते तस्यां रात्रौ अग्नीषोमीयः समाप्यते तस्यां रात्रेः चतुर्थयामे साकृपाक्षिणं प्रवादात् प्रातरनुवाकः एम.
र्यमध्वर्युणा संप्रेषितो वाग्यतस्तीर्थेन प्रपद्य आग्नीध्रीये दक्षिणं जान्वाच्य आहुतिं जुहुयात्। आस ९९

न्यान्मा मंत्रात्साही स्वनेन। अथाहवनीये जुहोति। वागग्नेगा अग्र एत्विति मंत्रेण प्रथमां। वाचं देवीं मनोने
त्रामिति द्वितीयां। अतः समानं ब्रह्मणश्च। अवस्थानवर्ज्जं कृत्वा दक्षिणत आहवनीयस्योपविशेत्। उभ
योर्मंत्रयोः वाग्भूता सरस्वती देवता। अथ होता हविर्द्धानं गत्वा पूर्वद्वारि प्रत्यङ्मुखस्तिष्ठन्। उर्वंतरिक्षं वीहि
ति रराटीमभिमृशति। ततो देवी द्वारौ विति दक्षिणेन पाणिना दक्षिणां द्वार्यां स्थूणामभिमृश्योत्तरामपि द्वार्या
मनेनैव पाणिनाभिमृशति। मंत्रस्तु सकृदेव। द्विवचनलिंगात्। केचिदुभाभ्यां पाणिभ्यां उभे अपि द्वार्ये युग
पदभिमृशंति। तदयुक्तं यत्नाभावात्। यत्रोभाभ्यां पाणिभ्यामभिमर्शनमभिप्रेतं तत्र यत्नं करोति। यथा नाना
पाणिभ्यामपिपद्यते त्वा देवी। दक्षिणं प्रतीयादनारेत्रा इति परिमार्ष्टि विरोधाच्च। अतः पर्यायेणाभिमर्शनं कर्त्त
व्यं। ततः प्रविश्य युगधुरावंतरेण प्राङ्मुखस्थित्वा निरसनोपवेशने कृत्वा उपविश्य। प्रेषितः प्रातरनुवाक
मनुब्रूयान्मंद्रेण। आपो रेवतीरित्येका प्रातरनुवाकस्य प्रतिपत्। अथोपप्रयंत इत्यारभ्य आग्नेयोषसाश्वि

मं॰टी॰४ तेषु त्रिषु त्रिषु ऋतुषु गायत्र्यादीनि यानि छंदांसि उक्तानि सप्त त्रकारैः। तेषु सर्वेष्वपि छंदस्सु एकैकं
१०० सहस्रं गृह्णीयात्। नास्यैतस्मिन्संगा। यात्रमसप्तावपेत् ब्राह्मणस्येति वचनात्। आग्नेयगायत्रे पञ्च प्रतीका
नि गृह्णीयात्। यथास्थानं ध्रुवाणि मांगल्यानीति वचनात्। आग्नेयमहाऽनाम्नीष्वेव द्यावापृथिवीयं इति त्री
100 णि सूक्तानि मांगल्यानि अधिकानि भवंति। एवं क्रियमाणे यावान् सूक्तसमूहः संपद्यते सोऽपरिमितः
प्रातरनुवाके वेदितव्यः॥ अयमेव प्रातरनुवाको ब्राह्मणे नियततया अभिहितः। तस्मादपरिमितमेवानू
च्यमिति। अथ प्रयोगकर्तॄणां सौकर्यार्थमस्य प्रातरनुवाकस्य सूक्तानामाद्यंतानि गृह्यंते। अभिहिं
कृत्य। आपो रेवतीः क्षयथा हि वस्वः० सरस्वतीन्द्रूणाते वयोधो३मुप प्रयंतो अध्वरं० अग्ने यक्षि
स्वं दमो३मवानो अग्न ऊतिभिः० होतारं पीन उ कष्या३मग्निमीळे पुरोहितं० स च स्वानः स्वसयो३म ए॰म॰
ग्निं दूतं वृणीमहे० इमं स्तोमं जुषस्व नो३ वृषि घाहि मिये ध्य०उ वक्षे रग्निर्ह्यं हृद्गा नो३ त्वमग्ने वसूंरि १००

हृ॰ बर्हिरासाद्या वसो ३ म बोध्यग्निः समिधा जनानां॰ प्रद्वीव रुक्ममुरुव्यं चमश्चो ३ मगन्म महा नमसा यवि
ष्ठं॰ यूयं पात स्वस्तिभिः सदा नो ३ मेना वो अग्निन्नमसा॰ अग्निर्जनाय दाशुषो ३ मग्ने वाजस्य गोमतः॰ मति
गमजं भरस्व सो दहस्र तो ३ ऊर्जनस्य गोपा अजनिष्ट जागृविः॰ त्वामग्रुः सहसस्पुत्रमंगिरो ३ मग्निं तं मन्ये यो
वसुः॰ दृषं स्तोतन्य आभरो ३ प्रति व्यास्तनरीजनी॰ उषाः शुक्रेण शोचिषो ३ मुषो मद्रेभिरा गहि॰ भीभिः कण्वा
अरूषतो ३ मिदं श्रेष्ठं ज्योतिरागात्॰ अदितिस्सिंधुः पृथिवी उत द्यो ३ र्नू अमु अदर्श्यायती॰ उषा उच्छद्रपस्त्रिधो ३ मु
षस्तच्चित्रमाभर॰ अपानो विश्वा सौभगान्यावहो ३ मेता उत्या उषसः केतुमक्रत॰ गावो न व्रजं व्युषा आवर्तमो ३
मस्थेनो अघं द्वेषो धय॰ सुजाते अश्वसूनृतो मे षो उषा अपूर्व्या॰ अविद्वियाभिरूतिभो ३ यदघस्य परावतः॰
अर्वाचा मब्रह्हन्न मो ३ मामा त्वग्निरुष सामनीकं॰ आविश्वान्यमृता सौभगानो ३ मतारिष्यतमसस्पारमस्य॰
यूयं पात स्वस्तिभिः सदा नो ३ मिमा उ वां दिविष्टय॰ उतस्रियन्ति सुष्टितो ३ मश्विना वर्त्तिरस्मदा॰ उषर्बुधो वहं

मं·२१·४ तुसोमपीतये। इमं वो अग्निर्ऋतु देति सूर्यः। यो वां हविष्मान्मनसा ददाश। ईळे द्यावापृथिवी पूर्वचित्तये।
१·१ अदितिः सिन्धुः पृथिवी उत द्यौः। प्रति प्रियतमं रथं। माध्वी मम श्रुतं हवं। आ घो न मेत्रिर्दूयात्॥ ॥यस्य च महत्
त्वां रात्र्यां प्रातरनुवाकः प्रारभ्यते न तदा ईळे द्यावापृथिवीयमावर्त्तयेत्। आतमसोपघातात्। अथ प्रभाते ईळे
101 द्यावापृथिवीयस्योत्तमामनुब्रुवन् पूर्ववदनुस्मरण्य द्वार्य्ये स्तृणे अन्तरेणासीनः उत्तमस्वरेणाभूदुषा इत्यनया
परिदध्यात्॥ ॥अपान्यः प्रकारः शताधिको ह्रि शतादर्वाग नियतः शतप्रभृत्यपरिमित इत्युच्यते। तस्य संस
वादिषु प्रयोगो भवति। तत्र सत्वरता पाचिकीर्षितत्वात्। तस्येयं क्लृप्तिः। आपो रेवती रित्येका। उप प्रयन्त इति सू
क्तेन नवपञ्चके। अवा नो अग्न इति षट्। अग्निमीळे इति सूक्तेन नवकं। अपत्नचाः त्वमग्ने वसून्। अबोध्यग्निः
समिधा। आगन्म महा। एना वः। अग्ने वाजस्य। जनस्य गोपाः। अग्निं तं मन्ये। प्रति ष्या सूनरी। उषो भद्रेभिः। इदं श्रे एम·
ष्ठं। प्रत्यु अदर्शि। उषस्तच्चित्रं। एता उत्याः। महे नो अद्य। एषो उषाः। या दस्रा सिन्धु। यदद्य स्थः। आ भात्यग्निः। अता १·१

रिष्मपञ्च। इमाउवांदिविष्टयः। अश्विनावर्तिः। ईळेद्यावापृथिवी पञ्चविंशतिः। प्रतिप्रियतमंनव। अयमे
वार्यः। श्लोकेनाभिहितोन्यैः। अभ्यासात्प्रतिपत्तिस्तः। प्रतीकंचतुर्णसंयथापादेवतंप्रतिषेदज्ञथाग्नात्स्वंक्र
मान्नतः। प्रतिप्रियतमंसूक्तंमंगदैर्व्याधिकंच्यातं। इति। तथाच। शतमनूच्यमात्र्येष्कामस्येत्यादिब्राह्मणेभिहिताः
प्रातरनुवाकसूक्तक्रमानुसारेणप्रयोक्तव्याः। तत्रच्यातस्येयंकॢप्तिः। आपोरेवतीरित्येका। अभ्यासान्निसृतः। उपप्रयं
तइतिसूक्तेनवपञ्चके। अवानोअग्नइतिषट्कृचः। अग्निमीळेइतिसूक्तंनवकं। अग्नेकपातिन्यः। त्वमग्नेवसू
न्। अबोध्यग्निः। अगन्ममहेतितिस्रः। एनावोअग्निमितिद्वे। अग्नेवाजस्यजनस्यगोपाः। अग्निंतमन्ये। प्रति
व्यासूनरीतिद्वे। उषोभद्रेभिः। इदंश्रेष्ठं। प्रत्युअदर्शीतिद्वे। उषस्तच्चित्रं। एताउत्याः। महेनोअद्यबोधय। एषो
उषाइतिद्वे। यदद्यस्थः। आभात्यग्निः। अतारिष्मतमसइतिपञ्च। इमाउवामितिद्वे। अश्विनावर्तिः। अबो
ध्यग्निर्ज्मः। ईळेद्यावापृथिवीइतिपञ्चविंशतिः। प्रतिप्रियतममितिनव। उत्तमायाअभ्यासेनैकादशालवेश

मं·टी·४ तं भवति। शान्तस्य कृष्टेः श्लोकः। तिस्रः प्रतिपदोभ्यासात्प्रतीकत्रयमुत्तरं। ततश्छंदस एकैका द्वे द्वे गायत्र्यावा
१०२ र्हते। प्रतिश्रियतमं सूक्तं मंगलानि च तद्वते इति। त्रीणि चत्वारि तानि षष्टिश्चानूच्यानि एवमादीनां अस्मिन्ने
वसमाम्नाये पूर्वोक्तन्यायेन यावत्प्रयोजनं सूक्तानि ग्रंथविस्तारभयान्नोच्यते अस्माभिः। इति संचनाचार्यवि
102 रचितायां आश्वलायनसूत्रे प्रयोगदीपिकायां चतुर्थोध्यायः॥ ॥अथैषां प्रातरनुवाकानां मध्ये अन्यतमं
प्रातरनुवाकमनूच्य। तत्रस्य एवापथिष्यहोतरित्यध्वर्युणा उक्तः। अनभिहिंकृत्यापोनप्त्रीयाः अन्वाह। प्र
देवत्रा ब्रह्मणे गातुरेत्विति नव ऋचः। हिनोता नो अध्वरं देवयज्येति दशमी॥ तत्रस्य प्रथमां अर्धर्चका
रं ब्रूयात्। सामिधेनीन्यायेन। द्वितीयाद्या त्रगावानं ब्रूयात्। एवं चार्थात् द्वितीये आदाने पञ्चार्धर्चा अनुष्टु
सता भवंति। यद्ययजमानो वृष्टिकामः स्यात्तदा द्वितीयाद्या वृष्टिकामस्य प्रकृत्यैव ब्रूयात्। प्रकृतिपक्षे पूर्वे रम०
द्या सामर्धर्चे चेत्प्रलिंगानि कांक्षेत्। अयमग्रहणं देशात् आवृत्तास्वेक धनास्वावर्त्तनीरिति ब्रूयात्। तस्मादेवयज १०२

न देवं प्रति आहृतास्वेकधनासु प्रतिदृश्यमानासु प्रति यदाप इति ब्रूयात्। तीर्थसमीपमागतासु आधेनव इति ब्रू-
यात्। तीर्थदेशं प्राप्तासु समन्यायंत्युपयंतीति ब्रूयात्। तीर्थदेशे होतृचमसे पां पूर्यमाणे वसतीवरीष्वेकधना-
सु समानीयमानासु आपो न देवीरुपयंतीति होत्रियमित्युक्त्वा चतुर्मात्रप्रणवेनोपरमेत्। प्रकृतिपक्षे प्यत्रा-
वसानं भवति। अथागतमध्वर्युमवेरपो ध्वर्याउ इति पृच्छति। उतेमनन्नमुरिति अध्वर्युणा प्रत्युक्तो नि-
गदं ब्रुवन्। गच्छंतीनामेकधनानामभिमुखो गच्छेत्। तास्वध्वर्यो इत्यादि विष्पदे व्यावर्तत इत्यंतमनवानमु-
क्त्वा ताः परेणातीत्योत्तरतस्तिष्ठेत्। तास्वात्मनो दूरेतीतासु प्रत्यस्थेन्द्र इत्यादि निगदशेषं अनुब्रुवन् व्रजेत्।
तारिषो३ मं बयोर्येत्स्वध्वमिरितितिसृः। ऋगावानपक्षे प्यत्र संततिः कार्या। पदसामर्थ्यात्। तिसृणामुत्त-
मामनुब्रुवन् त्वपरया द्वारा हविर्धानमुपपद्येत। एमा अग्मन्निति साद्यमानासु एकधनासु ब्रूयात्। सन्नासु आ-
ग्मन्नाप इत्येतया परिधाय। ततो निष्क्रम्य पूर्वया द्वारा हविर्धानं प्रविश्य उत्तरं हार्यं स्थूणामासाद्य एजा

मं॰ दी॰ ५ नमभिमुख उपविश्योदङ्निरस्यत्तृणं । प्रदेवत्रेत्यारभ्य आनिगदात् उत्तमस्वरेण । किंचिच्छ्नेत्ततंप्र
१०३ योजनं व्ये । निगदप्रभृति अपो देवी रूपतव्य इत्येतत्पर्यन्तं मध्यमस्वरेण । शेषं मन्द्रेण । अत ऊर्ध्वं प्रातः
पत्र ३ सौम्यासेमं द्वे पौवा । अथोपांशुसंज्ञकं ग्रहं हूयमानं तत्रस्थ एवाभिमुखो भूत्वानुमन्त्रयेत् । प्राणं यच्छ
स्वाहा त्वा सुहव सूर्याय प्राणः प्राणमेव चेत्यनुमन्त्र्य । ॐ इत्युच्चार्य । अनु प्राणनं कुर्यात् । शरीरस्थं वा
103 मुं नासिकाद्वारेण बहिर्निर्गमयेदित्यर्थः । अन्तर्यामसंज्ञकं ग्रहं अपानं यच्छ स्वाहा त्वा सुहव सूर्याया
पानापानं मे पुच्चेत्यनेन भागेनानुमन्त्र्योत्तरेण ॐ इति भागेनाभ्यपाननं कुर्यात् । एवमन्तर्यामे । ततो
व्यानायत्वेत्युपांशुसवनं ग्रावाणमभिमृशति । अपापोन स्त्रीयास्थाने निरस्तनोपवेशने कृत्वा भू
र्भुवस्वरिति वाचं विसृजेत् । प्रातरनुवाकोपाकरणकालादारभ्य एतदन्तं वाग्यमनं कुर्यात् । अ ए म०
थ बहिष्पवमानसर्पणकाले मैत्रावरुणो ब्रह्मा च द्रप्सश्चस्कन्देति द्वाभ्यां द्वे आहुती जुहोति । प्रस्तरा १०३

द्गाहवनीयादवस्थाप्येत्येवमादिना। द्वयोर्विप्रुषो देवता॥ हुत्वा पूर्वकारिभिः सहसर्पणं कुरुतः। स्तोत्रा
र्थं ते धूपविष्टे मुनिरसनोपवेशने कृत्वा मैत्रावरुणः प्रस्तकृशिरः प्राङ्मुख उद्गातारमभिमुख उ
पविशति। दक्षिणतो ब्रह्मा उदङ्मुखः उद्गातारमेवाभिमुखः। अथ होताऽऽपोनप्त्रीयारंभस्थाने ए
वासीनः तान्सर्वा नुपविष्टाननुमंत्रयते। यो देवानामिति मंत्रेण भूयासमित्यंतेन। अथ ब्रह्मन्स्तो
ष्यामः प्रशास्तरिति प्रस्तोत्रा स्तोत्रायाति सर्जितः। ब्रह्मा मैत्रावरुणश्च अतिसृजतः। भूरिन्द्रवंतः स
वितः प्रसूता इति जपित्वोंस्तुध्वमिति चैवं ब्रह्मा ब्रूयात्प्रातःसवने। मैत्रावरुणः स्तुत देवेन सवित्रा इत्यादि
साम्न ओमिति जपित्वा स्तुध्वमिति चैवं ब्रूयात्॥ ॥ अथ सवनीयेन पशुना चरंति पूर्वकारिणो मार्जनांत
मग्नीषोमीयवत्। विशेषस्तूच्यते। यूपाय परिवीयमाणायेति प्रेषितः पश्चादुत्तरवेदेर्निरसनोपवेश
ने कृत्वा। अभिहिंकृत्य वसुवास इत्येतां त्रिर्ब्रूयात्। अथाग्निमंथनादि समानं। आवाहनादि चेष्टि

मं·८·५ केषु निगमेषु यत्र यत्र यजमानशब्दो यद्विभक्त्यंतः श्रूयते तत्र तत्र तद्विभक्त्यंत एव सुन्वच्छब्दो
२०४ यजमानशब्दादग्ने प्रयोक्तव्यः। आं त्वा सूरियो जनादूर्ध्वमयं विधिर्न भवति। प्रावित्रं साधु ते य
जमानदेवता ओ मन्वतीते स्मिन्यज्ञे यजमाने स्येत योरपि न भवति। अथावाहने। आवह देवान्सुन्व
105 ते यजमानायेत्यत्र स्वायां वैकल्पिकावाज्यभागावावाह्यौ। अग्निमाँ३ वनस्पतिमा३ वह। इन्द्रं वसुमे वह४
तमा३ वह। इन्द्रं रुद्रवंतमा३ वह। इन्द्रमादित्यवंतमृभुमंतं विभुमंतं वाजवंतं बृहस्पतिवंतं विश्वदेव्या
वंतमा३ वह। देवां आज्यपां इत्यादि। इन्द्रं वसुमंतमित्याद्याः सवनदेवता। आसां च देवतानां प्रस्थित
याज्यासु ध्यानं कर्तव्यं। संमार्गस्पर्शनानंतरं प्रवृत्ताहुतीर्जुहुति वषट्कर्तारः। अच्छावाकवर्जं।
स्तनुयाज्याक्रमेणास्य होमस्य वषट्कारनिमित्तत्वात्। अग्नीषोमीये हविर्वरणे कृतेऽप्यस्मिन्नेवा स्म०
हनि होमः कर्तव्यः। अथ प्रस्नास्तस्तीर्थेन प्रपघ सेत्तुकोमे त्रावरुणः स्थानाचमने कृत्वा प्रवि २०४

श्यस्तथमेव तूष्णीं दंडं गृह्णाति। दण्डप्रदानवर्जमित्युक्तत्वात्। मेधपतये मेधमित्यधिगो विशेषः।
वपायागे विशेषः। अग्ने नयसुपथाराये अस्मानि त्यनुवाक्या। हो॰ दग्निं छागस्य वपाया मेदसो जु
षतामिति प्रैषः। प्रवः शुक्रायेति याज्या। अथये पाशुकाः ऋत्विजः ते चात्वाले मार्जयंते। केचिद्येषांव
क्ष्यमाणमुपस्थानं तेस्म वै मार्जयंत इत्याहुः। चात्वाले मार्जनानंतरं होता मैत्रावरुणो ब्राह्मणाछंसी
पोता नेष्टाग्नीध्र इत्येते अध्वर्युपर्येस्य त्वा आदित्यप्रभृतीधिष्ण्यानुपतिष्ठंते। अथादित्यं अग्ने
अध्वनामध्वपत इति मंत्रेण। अयत्र तत्रस्था एव यूपादित्याहवनीयनिर्मथ्यानुपतिष्ठंते। निर्मथ्यो
नाम यत्राग्निर्मथ्यते स देशः। मथित्वा प्रक्षिप्तोग्निरिति केचित्। अन्ये प्रसिद्धाः। अग्नयः सगर
इति मंत्रेण। अथ सव्यावृतास्तत्रस्था एव शामित्रो वध्यगोह्य चात्वालोत्करास्तावानुपतिष्ठंते। अग्न
यः सगर इत्यनेन। ऊवध्यगोहं पशोर्यंत्राणां निस्थानदेशः। आस्तावो बहिष्पवमानदेशः। प्रसिद्धा

मं॰टी॰५ इतरेषु न दक्षिणा हुतास्तत्र स्थाणेव आग्नीध्रीयमच्छावाकस्य वा दं दक्षिणां मार्जालीयं खरमित्ये
१०५ तानुपतिष्ठंते अग्नयः सगरा इत्यनेनैव। अच्छावाकस्य वा दं अच्छावाकस्योन्नीयमानस्रुक्स्थानं।
खरोग्न्याहासादनप्रदेशः। प्रसिद्धा इतरे। अथोत्तरेणाग्नीध्रीयं परिव्रज्य सदः पूर्वद्वारि प्रत्यङ्-
105 मुखाः स्थित्वा सदोभिमृशंति। ऊर्वं तरिक्षं वीहीति आग्नीध्रवर्ज्जाः। अथ द्वार्य्ये स्थूणे अभिमृशंति।
देवीद्वार इति मंत्रेण दक्षिणेन पाणिना पर्यायेणाभिमर्शनं कर्त्तव्यं। मंत्रस्तु सकृदेव। अथ तत्र
स्थाएव अपरेण नेनैवोपतिष्ठंते। ततउपस्थितांश्चानुपस्थितांहोत्रीयांश्चाप्यपश्यंत इतरजः।
ततश्चानवेक्षमाणा उपतिष्ठंते। उपस्थिता आदित्यप्रभृतयः। अनुपस्थिता होत्रीया दृश्याः। त
तस्सर्वैः उरुं नो लोकमनुनेषि विद्वानित्येतामृचं जपंतो युगपद्देवसदः प्रविशंति। प्रविश्य प्रथ एम॰
मं नेष्टा उत्तरेण सर्वान्धिष्ण्यानात्वा स्वधिष्ण्यस्य पश्चान्निरसनोपवेशनं करोति। अन्येषामप्ये १०५

वमेव मार्गः। पोतारमपरेण गत्वा स्वस्य पश्चादुपविशन्ति। ब्राह्मणाच्छंसी तावपरेण गत्वा स्वस्य
धिष्ण्यस्य पश्चादुपविशन्ति। होताप्येतानपरेण गत्वा स्वस्य धिष्ण्यस्य पश्चादुपविशन्ति। मैत्रावरु
णश्चा प्रसर्पणकाले आग्नीध्रमाग्नीध्रीयस्थानमभिमन्त्रयन्ति। उर्वन्तरिक्षं वीहीति। देवी द्वारौ इति द्वा
र्यै स्थूणे। उरुं न इति जपन्नविश्याग्नीध्रीयस्य पश्चाग्नीदुपविशन्ति। अथ सर्वे होत्रादयो यो अघसो
म्य इति जपन्ति। अथोपविष्टानामत ऊर्ध्वमासवनसमाप्तेः स्वस्य स्वस्य सदः प्रसर्पणं निसर्पणं वा प्राप्नो
ति तदा स्वं स्वं धिष्ण्यमुत्तरेणैव कर्त्तव्यं। नापरया। धिष्ण्यरहितानां तु दक्षिणं धिष्ण्यमुत्तरेण। एवं
ब्रह्मा आदित्यप्रभृतीं धिष्ण्यानुपतिष्ठते। अयं तु विशेषः। पश्चात्सदः प्राङ्मुखः सदोऽभिमन्त्र्य अपरे द्वा
र्यै अभिमन्त्रयति। तत्र स्थ एव पत्नीशालायां धिष्ण्यानुपतिष्ठते। समस्तांश्चापापरया द्वारा एतथैव प्रविश्य द
क्षिणापुरस्तान्मैत्रावरुणस्य निरसनोपवेशने कृत्वा यो अघसोम्य इति एतं मंत्रं जपति॥ ॥अथैन्द्रः

मं॰टी॰५ पुरोळाशैरनुसवनं चरंति॥ ॥धानावंतं करंभिणमित्यनुवाक्या। होतायक्षदिंद्रं हरिवां इन्द्रो
१०६ धाना अत्त्विति प्रैषः प्रातःसवनलिंगकः। अयमेव प्रैषो याज्या। इयान्विशेषः। इन्द्रमित्यादेश्चास्यो
ह्वारः। होतायक्षदित्यस्य स्थाने आगूः। होतर्यजेत्यस्य स्थाने वषट्कारः। यथा। ये३यजामहे हरिवां
106 इन्द्रो धाना॰ जुषाणो वेतु वौ३षट्। इति। एवमन्यत्रापि। यत्र क्वच प्रैषेण यजति। तत्रादेशः पदोद्धा
रवर्जं। अयं विधिर्भवति। अथ स्विष्टकृतः। अग्नेर्जुषस्व नो हविरित्यनुवाक्या। होतायक्षदग्निं
पुरोळाशानामिति प्रैषः। ये३यजामहे हविरग्ने वीही३ वौ३षट्। इति याज्या॥ अथ द्विदेवत्यसं
ज्ञकैर्ग्रहैश्चरंति॥ तत्रादौ वायव इन्द्रवायुभ्यां ग्रहो भवति। तस्य वायवायाहि दर्शतेन्द्रवायू
इमे सुता इत्यनुवाक्ये। अनवानं पृथक्प्रणवे। होतायक्षद्वायुमग्रेगां होतायक्षदिन्द्रवायू अर्हं एम॰
तेति प्रैषावनवानं। अग्रं पिबा मधूनां सुतेनानो अभिष्टिभिरिति याज्ये अनवानं। द्वयोरपि या। १०६

ज्ययोरेकैवागूर्भवत्यादौ। वषट्कारस्तु प्रतियाज्यं भवति। इत ऊर्ध्वं प्रातःसवने प्रयुज्यमानाया याज्यानु
वाक्या अनवानं वक्तव्याः। इत उत्तरयोर्ग्रहयोः प्रैषावप्यनवानं वक्तव्यौ। अथ प्रहुतेन तु ग्रहपात्रमा
हरत्स्वध्वर्युस्तद् गृह्णीयात्। ऐतु वसुः पुरूवसुरिति प्रतिगृह्य सव्येन पाणिना दक्षिणस्योरोर्वस्त्रमप
नीय तस्मिंस्तु ऐन्द्रग्रहपात्रं सादयित्वा। आकाशवदंगुलिना पाणिनापिदध्यात्। अथ मैत्रावरुणस्य ग्र
हस्य। अयं वां मित्रावरुणे सुतानुवाक्या। होतायक्षन्मित्रावरुणेति प्रैषः। गणानाजमदग्निनेति याज्या।
ऐन्द्रवायवं सव्येन पाणिनापिधाय दक्षिणेन पाणिना मैत्रावरुणं गृह्णीयात्। ऐतु वसुर्विदद्वसुरिति
प्रतिगृह्य दक्षिणेनैन्द्रवायवं हृत्वा अभ्यात्मं सादयित्वोभावपि दक्षिणेन पाणिनापिदध्यात्। प्रतिग्रह
णकाले भक्षणकाले च सव्येन पाणिनापिधानं अन्यदा दक्षिणेन। अथाश्विनस्य ग्रहस्य। प्रातर्युजाविबो
धयेत्यनुवाक्या। होतायक्षदश्विना नासत्येति प्रैषः। वाट् धाना शुभस्पती इति याज्या। इत रैग्रहे सव्येन

मं॰टी॰५ पाणिनापिधाय। ऐतु वसुः संयद्वसुरित्याश्विनं दक्षिणेन पाणिना प्रतिगृह्य दक्षिणेनतरा वस्नतो नीत्वाउ
१०७ त्तरेण शिरः पर्याहृत्याभ्यात्मतरं सादयित्वा। त्रीण्यपि पात्राणि पूर्ववदसंसृष्टांगुलिकेन पाणिना दक्षिणे
नापिधायास्ते॥ अपोन्नीयमानेभ्यः प्रेषितो मैत्रावरुणः। आ त्वा वहंतु हरय इति नवर्चं सूक्तमन्वाह। अ
नभिहिंकृत्य आ घोत्तमे त्रिर्ब्रूयात्। होता यक्षदिन्द्रं प्रातः प्रातःसावस्येति प्रैषेण प्रशास्त्रा प्रेषितः होता
यजति। इदं ते सोम्यं मध्विति अनया। प्रशास्त्राद्योध्वर्युणा नामभिरद्दिष्टाः संयजंति। मैत्रावरुणो द
ण्डं निधायासीनो यजति मित्रं वयं हवामह इति। इन्द्र त्वा वृषभं वयमिति ब्राह्मणाच्छंसी। मरुतो यस्य
हि क्षय इति पोता। अग्ने पत्नीरिहा वहेति नेष्टा। उक्षान्नाय वशान्नायेत्याग्नीध्रः। सोमस्याग्ने वीहीति
सर्वत्रानुवषट्कारः। तथा चोक्तं। सोमस्याग्ने वीहीत्यनुवषट्कारः प्रस्थितयाज्यासु शस्त्रयाज्यासु एम॰
मरुत्वतीये हारियोजने महिम्न्याश्विने चतैरे अ[illegible]न्ये इति। अनुवषट्कारस्याग्नौ नास्ति। सानुवषट्का १०७

107

रेषुद्भिरनुमंत्रणं। यत्र क्व चैकसंप्रैषे द्वौ वषट्कारौ समस्तौ वेव तत्रद्भिरनुमंत्रयेत न चाग्रूरुन्नरस्मिन्निति।
अथ होता आगतमध्वर्युं अयाड्ग्नीद्विति पृच्छति। अयाडित्यध्वर्युणा प्रत्युक्तः। समन्द्रमकर्योन इतिज
पति। अथाश्विनमैत्रावरुणौ ग्रहौ सव्येन पाणिनापिधाय। ऐन्द्रवायवमुत्तरे दंगहस्तात् अध्वर्यवे प्रय
छेत्। ग्रहणार्थमनुसृजन्नेव। एष वसुः पुरूवसुरिति मंत्रेण तद्वयं तां तनूपावानस्तन्वस्तपोजा इति मंत्रा
न्तः। ततोध्वर्यउपह्वयस्वेत्युक्तः। पात्रस्थं सोमं द्वाभ्यामपि नासिकाभ्यामवघ्राय वाग्देवी सोमस्य तृप्यत्विति
मंत्रेण भक्षयेत्। यदि तु तत्र प्रतिप्रस्थाता भक्षयति तमप्युपहूय भक्षयेत्। सर्वत्रापि सोमभक्षणे वाग्दे
वी त्वयमेव मंत्रो वेदितव्यः। ततोध्वर्युणा होतरुपह्वयस्वेत्युक्तः। उपहूत इति ब्रूयात्। सर्वत्राप्युपहव वा
चने अयमेव प्रत्युपहव मंत्रः। अध्वर्युणा प्रतिभक्षितं किंचित्सावशेषं होतृचमसेऽवनीय। अनाचम्यैवा
ध्वर्युं प्रतिप्रस्थात्रोरुपहवमिष्ट्वा नासिकाभ्यामवघ्राय पुनर्भक्षयेत्। ताभ्यां च प्रतिभक्षिते शेषं होतृचम

मं·टी०५ सत्रूआनीयोत्स्रजेत्पात्रं। अथाश्विनं सव्येनापिधाय मैत्रावरुणमुत्तरेर्धे गृहीत्वाध्वर्युर्वे प्रयच्छेत्।
१०८ अग्नेस्त्वज्जन्ने वा एष वसुर्विदद्वसुरिति मंत्रेण। हुयं तां तनूपावान स्तन्व स्त पोजा इति मंत्रांतः। ततोध्व
र्युः प्रतिप्रस्थात्रोरुपहवमिष्ट्वा प्रथमं दक्षिणेनाक्ष्णावेक्ष्य पश्चात्सव्येनावेक्ष्य भक्षयेत्। ताभ्यां च प्रति
108 भक्षिते शेषं होतृचमस आनीयोत्स्रजेत्पात्रं। अथाश्विनं दक्षिणेन पाणिनापिधाय। ऐतु वसूनां पतिर्वि
श्वेषां देवानां समिदिति मंत्रेण होतृचमसं समादाय सव्येनारत्निना सव्यस्योरोर्वस्त्रमपनीय तस्मिं
न्नुरौ सादयित्वा विरलांगुलिकेन सव्येन पाणिनापिदध्याद्धोतृचमसं। अथाश्विनमुत्तरेर्धे गृही
त्वा दक्षिणेन शिरः पर्याहृत्योत्तरेणानायपूर्वमासादितस्थाने पुनः सादयित्वाध्वर्युर्वे प्रणाम
येत्। अग्नेस्त्वज्जन्ने वा एष वसुः संयद्वसुरिति मंत्रेण। ततोध्वर्युः प्रतिप्रस्थात्रोरुपहवमिष्ट्वाग्रह एम०
पात्रे दक्षिणकर्णसमीपे नीत्वा पश्चात्सव्यकर्णसमीपे नीत्वा भक्षयेत्। ताभ्यां च प्रतिभक्षिते शेषं हो १०८

तृचमसमानीयोत्सृजेत्पात्रं। अथ दक्षिणेन पाणिना होतृचमसमादाय भूमौ निधाय इडामुपहूय
ति। उपहूतोयं सुन्वन्यजमानोस्य यज्ञस्यागुरउदृचमशीयेति तस्मिन्नुपहूत इति विशेष इडायां।
उपहूयमानामुपोघ्रंति चमसांश्चमसाध्वर्यवश्चमसिनो वा। उपहूयावांतरेडां प्राश्य। इडाभ
क्षणमकृत्वैवाचमनं चमसभक्षणं कुर्यात्। अध्वर्युरुपहूयस्वेत्युक्त्वा होता स्वं चमसं द्विर्भक्षयेत्। उ
क्तेनैव मंत्रेण। सानुवषट्कारे तु द्विर्भक्षणं। मंत्रेण प्रथमं तूष्णीं द्वितीयं। प्रतिवषट्कारं भक्षणं तूष्णी
मुत्तरमिति वचनात्। यदा तु शुक्रामंथिनोः संस्रावं होतृचमसेवनीतं बौधायनमतेन दाऽध्वर्युः प्रति
प्रस्थात्रोरुपहूवमिष्ट्वा भक्षयेत्। अस्मिन्पक्षे तावपि प्रतिभक्षं कुरुतः। ततः उन्नेतृब्रह्मयजमानच
मसान्द्विर्द्विर्भक्षयेत्। तं तमेवोपहूय अस्मिन्पक्षे तावपि प्रतिभक्षं कुरुतः। केचिदुन्नेतृचमसभक्ष
णं न कुर्वंति। उन्नेतृचमसं नान्यो भक्षयतीति न्यास्यांतरे निषेधदर्शनात्। ततः प्रचरणस्था ब्राह्मणा

मं·टी·५ घंसी पोतानेष्टाग्नीध्र इत्येतेषां चमसान् सकृत्सकृद्भक्षयति। तं तं चमसिनं अध्वर्युश्चोपहूय। यथा
१०९ समक्षंलिति वचनात्। एवं होतुर्वषट्कारनिमित्तभक्षे समाप्ते। प्रशास्त्राद्याग्नीध्रांताः स्वस्ववषट्कार
निमित्तं स्वं स्वं चमसं द्विर्भक्षयेति। तत्र होतारमध्वर्युश्चोपहूय। उभयोरपि समभक्षत्वात्। तानध्वर्युः
प्रतिभक्षयति। एवं सर्वेषां वषट्कारनिमित्ते भक्षे समाप्ते। सर्वे चमसिनः स्वं स्वं चमसं समाख्यां पि
109 सकृद्भक्षयेति। तत्र होताध्वर्युमुपहूय। ब्रह्मादयस्तु होतारं अध्वर्युं च स्वचमसिन उपहूयध्वमि
ति वा। सर्वैः सर्वत्रोपहवयाचने कृते उपहूत इति प्रत्युपहवः कार्यः। सर्वत्र वाग्देवी सोमस्येति मं
त्रः। अथ सर्वे भक्षयित्वा। अपाम सोमं शन्नो भवेत्याभ्यामृग्भ्यां यथाक्रमेण मुखहृदये अभिमृ
शेरन्। प्रतिभक्षमिति केचित्। एतदाप्यायनं सर्वत्र सोमभक्षणे कर्त्तव्यं। एकपात्रवर्ज्जं। तथा चो एम०
क्तं। सर्वत्रात्मानमन्यत्रैकपात्रेभ्य इति। ततः आप्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा इति १०९

हूयमानमग्न्यां चमसानाप्याययंति। एतच्चमसाप्यायनं प्रातःसवने माध्यंदिने च। घोपाघानां चमसानां। तृतीय
सवने चाघानामेवानान्यत्रा। चमसानाघोपाघान्पूर्वयोःसवनयोराघांतृतीयसवन इति वचनात्। आप्याय्या
यितांश्चमसांदक्षिणस्य हविर्धानस्याधस्तात्सादयंत्यध्वर्यवस्ते नाराशंसा संज्ञा भवंति॥ ॥एतस्मिन्काले अ
च्छावाकःस्थानाचमने कृत्वा तीर्थेन प्रविश्य। उत्तरेणाग्नीध्रीयं परिव्रज्य पूर्वेणासदश्रासनो धिष्ण्य दक्षिणे नि
रसनोपदेशने कृत्वोपविश्य। अध्वर्युणा दत्तं पुरोडाशखंडं इडामिवोधम्याच्छावाकवदस्वेत्युक्तो नभिहिं
कृत्वा। अच्छावो अग्निमवस इति तृचमन्वाह। आ घोत्नमेत्रिर्ब्रूयात्। अस्य तृचस्योत्तमायाश्चतृतीये वचने यः
प्रणवस्तेन यजमानहोतरध्वर्योग्ना रितिनिगदमुपसंतनुयात्। अनवानं हूयधामस्ते वमंतः समाहे
तस्मिन्निगदे अध्वर्युर्होतर्ज्ञुपहवं कंसते। अच्छावाकाय। अप होता प्रत्येता मुन्नयजमानः इत्यनेन निग
देनाच्छावाकमुपह्वयते। अच्छावाक उन्नीयमानायेति प्रेषितो नभिहिंकृत्य। प्रत्यस्मै पिपीषत इति सूक्तं

मं॰ टी॰ ५ चतुर्थं च मन्वाह आग्नीध्र मेति ब्रूयात्। अथ वा कर्तुर्यजेत्युक्तः। प्रातर्यावभिरागतमित्यनया प्रस्थितया
११० ज्यया यजति उक्तो वषट्कारः। एतस्यैतं पुरोडाशशकलस्येडाया इवोपहवनं भवति। अथ पुरोडा
शशकलं निधाय स्वछ्वोदकं। चमसं भक्षयेत्। अध्वर्य उपहूयस्वेत्युक्त्वा। उक्तेनैव मंत्रेण तूष्णीं द्वितीयं
भक्षयति। अध्वर्युणा प्रतिभक्षिते पुनरध्वर्युमुपहूय समाख्यानिमित्तं भक्षयति। प्रतिभक्षिता नो चेत्समा
ख्या भक्षस्य प्रसंगसिद्धिः। यथा भक्षणं न कर्तव्यं। भक्षयित्वा पामसो मंत्रेणोभवेत्साभ्यामृग्भ्यामाप्यायने।
आप्यायस्व समेतु ते संते पयांसीति चमसाप्यायने। आप्यायितं चमसं सादयति सो पिनाराशंसं संज्ञको
भवति। [illegible]स्य छ्वोदकं अथ पुरोडाशशकलं गृहीत्वोत्थाय तत्रस्थ एव पूर्वोक्तक्रमेण आदित्यप्रभृती
न्धिष्ण्यानुपस्थायापरया द्वारा सदः प्रविशति पूर्ववत्सदो द्वार्ये चाभिमृश्योपस्थितं श्चानुपस्थितं श्चो ए म॰
पस्थाय। उक्तं लोकमित्येनां जपन् प्रविश्य प[illegible]श्चात्स्वस्य धिष्ण्यस्य निरसनोपवेशने कृत्वा योऽ ११०

110

घसोम्य इति जपति होत्रादयः अछावाकस्योपवेशनात्प्रागेव विसंस्थितसंचरेण निष्क्रम्याग्नीध्रीयं प्रा
प्नुवंति। अछावाकोपि सदस्येव पुरोडाशशकलं प्राश्याचम्य। उपविष्टेछावाकेत्र स्तापि विसंस्थितसंच
रेण निष्क्रम्याग्नीध्रीयं गछेत्। अछावाकोपि पूर्वया द्वारा निष्क्रम्याग्नीध्रीयं प्राप्य तत्र सर्वे हविरुछिष्टमा
ग्नीध्रीये ध्वर्युनिरुनीतं प्राश्नीयुः। आग्नीध्रीयसमीप एव अछावाकः पुरोडाशशकलं प्राश्य हविरुछि
ष्टं प्राश्नीयादित्येके। एतस्मिन्नेव काले सुधान्नानां शरीरस्थित्यर्थं भोजनमपि भवति। न प्राक्। अथ सर्वे
सदः प्रविशंति। विसंस्थितसंचरेण। सर्वेषूपविष्टेषु स्तनुयाज्या भवंति। तेषां प्रैषाः होतायक्षदिंद्रं हो
त्रादित्यादिपञ्च मंत्रं प्रैषसूक्तं। एषा एव याज्याः। याज्याकाले अयं विशेषः होतायक्षदिति तस्य स्थाने आ
गूर्भवति। असौ यजे तस्य स्थाने वषट्कारः। यत्र येन प्रैषेण मैत्रावरुणो यं यं प्रेष्यति स स तेन तेन प्रै
षेण यजति। मैत्रावरुणस्तास्मियं प्रैषमुक्त्वा दण्डं निधायोपविश्य यजति। अध्वर्युर्गृहपतिभ्यां हो

मं·प्र·५ तरेतघ्रजेलुक्तः। होतातयेवषजति। नानुवषट्कारः। अथानुवषट्कृतक्रमः। होता। पोतृ। नेष्टा। आग्नी
१११ ध्रा। ब्रह्मन्। प्रशास्ता होता। पोता। नेष्टा। अच्छावाक। अध्वर्युः गृहपतयः। अथाहतं त्वनुपात्रं वषट्कार
क्रमेणैव वषट्कर्त्तारो भक्षयंति। ये षां याज्यासु प्रतिप्रस्थाता होमः कृतः तेन मेवोपहूय भक्षयंति। स एव
111 तेषां प्रतिभक्षयिता। तस्मिंश्चैवोपहव इति वचनात्। अप बहिष्पवमानानुशंसनमाज्यशस्त्रं शंसेत्।
त्वनुपात्रभक्षणानंतरं। अध्वर्युः होतृपुरतः आसीनः परागावर्त्तते। तस्मिन्पराङावृत्ते। होता सुमत्स
द्वगेपितामातरिश्वेत्यादिकं होतृजपसंज्ञकं मंत्रं जपित्वा। आनमिहिंकृत्य शोंसावोमित्युच्चैराह्वयति।
प्रातःसवने शस्त्रादिषु शोंसावोमिति त्र्यक्षर आहावः। पर्यायप्रभृतीनां चादौ त्र्यक्षर एव। सवनत्रयेपि
शस्त्रमध्ये त्र्यक्षर एव॥ आहूयानुध्रूसन्भूरग्निर्ज्योतिर्ज्योतिरग्न इत्येतं तूष्णींशंससंज्ञकं मंत्रं शंसे रा·म०
त्। उपांशुसप्रणवमसंतन्वन्। स च त्रिपदो भवति। षट्पदं तूष्णींशंसं शंसेदिति ब्राह्मणवचनात् ष १११

द्रूपदो वा शंसितव्यः। षड्रूपदं पच्छः पूर्वं ज्योतिःशब्दे रग्ने वस्येत्। तूष्णींशंसं शस्त्वा अनुष्टुप्सन्नमि
द्दे वेद्ध इति एतां द्वादशपदां निविदं संदध्यात्। यथा पठितमेव पदानि विगृह्य शस्त्वा। उत्तमेन पदे
न प्रणुत्य प्रवो देवायेति समस्तं च सूक्तमुपसंतनुयात्। अस्या धाय्य चेत्रिः शंसेत्। अर्द्धर्चशो विगृह्य।
ऋगावानं वा विगृह्यमेव। ऋगावानं पच्छस्तृतीये वचने संततिः कार्या। द्वितीया धाय्य अर्द्धर्चश एव शंसेत्।
प्रातःसवने सर्वत्रार्द्धर्चशः शंसनमेव। आहूयोत्तमया परिदध्यात्। सर्वत्र शास्त्रपरिधानीयास्वयं वि
धिर्भवति॥ एषा आज्यशस्त्रस्य क्लृप्तिः॥ ॥अथ शस्त्रपाठः प्रदर्श्यते। सुमत्पद्वग्दे पिता मातरिश्वा।
अछिद्रापदा धादछिद्रे उक्था कवयः शंसन्। सोमो विश्वविन्नीथानि नेषद् बृहस्पतिरुक्थामदानि शंसि
षद्वागायुर्विश्वायुर्विश्वमायुः क इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वा। शोंसावोमित्युच्चैरुक्
त्वा भूरग्निर्ज्योतिर्ज्योतिरग्निरों ३। इन्द्रो ज्योतिर्भुवो ज्योतिरिन्द्रों ३। सूर्यो ज्योतिर्ज्योतिः स्वः सूर्यों ३। अग्निर्दे वे

म०२।०५ द्धः। अग्निर्मे न्विद्धः। अग्निः सुषमित्। होता देववृतः होता मनुवृतः प्रणीर्यज्ञानां रथीरध्वराणां।
११२ अतूर्तो होता तूर्णिर्हव्यवाट्। आदेवो देवान्वक्षत्। यक्षदग्निर्देवो देवान्। सो अध्वरा करति जात
वेदाः। प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदों श्वत्रिः। अग्ने सह
स्रसातमो। र्न्त्रों सा वोंश्नूनो रस स सहस्रवत्रिः। प्रवो देवायेति सरूक्ं ब्राह्मणक्रमेण वाचांसेत्। अनु
ब्राह्मणं वेति वचनात्। प्रवो देवाय। दीदिवांसमपूर्व्यं। स नः शर्माणि। उत नो ब्रह्मन्। सैयं ताविप्रः स्र
ता वायस्वानूनोरस्खेति परिधानीया। अयं ब्राह्मणविहितः क्रमः। अन्यत्समाने। उक्थं वाचि घो
षाय त्वेति जपेत्। अपो कथ्यशाय ज्ञेति प्रेषितः। अग्न इन्द्रश्च दाशुषो दुरोण इति याज्या। उक्तो नुवषट्
कारः। शास्त्रोपक्रमादारभ्य आवषट्कारान्मध्यमं कर्त्तव्यं। स वैष शस्त्रेष्वयं विधिः। अथाह एम०
तमुक्थपात्रमध्वर्युमुपहूयद्भिर्मार्जयेत्। सर्वत्र सानुवषट्कारैर्द्भिर्मार्जनं। मंत्रेण प्रथमं तूष्णीं। ११२

112

द्वितीयं। एतं न विसर्जनीयं। ततः सर्वे चमसिनः स्वं स्वं चमसं समाख्यानिमित्तं सह भक्षयंति। अध्वर्युरुपह्व-
यस्वेत्युक्त्वा चमसिन उपह्वयध्वमित्युक्त्वा वा। उक्तमाप्यायनं चमसाप्यायनं च॥ अथ शस्त्रस्य प्रतिग-
र उच्यते॥ शस्त्रादौ शस्त्रमध्ये चाध्वर्युः शोंसामोदैवेति प्रतिगरः। विरामाद्धे प्रतिगरो नास्ति। अवसा-
ने ओथामोदैवोमिति प्रतिगरः। यस्य स च प्रणवे प्लुतादिर्भवति। आहाव पूर्ववर्जिते प्रणवे त्रिमात्रः प्र-
तिगरः। स चाहाव प्रतिगरेण संततो वक्तव्यः। ॐ शोंसामोदैवेति यादृशः शस्त्रस्वरः। प्रणवे त्रिमात्रः प्रण-
वः प्रतिगरः॥ ॥ अथ ब्रह्मन्स्तोष्यामः प्रशास्तरिति प्रस्तोत्रा स्तोत्राय्याति सार्जितः। ब्रह्मा भूरिन्द्रवंतस्स-
वितः प्रसूतः। ओं स्तुध्वमित्युच्चैः। मैत्रावरुणः स्तुत देवेनेत्यादिकं मंत्रं जपित्वा स्तुध्वमित्युच्चैर्ब्रूयात्। स-
र्वस्तोत्रेषु मैत्रावरुणस्यायं विधिः। अथ प्रस्तोत्रा स्तोत्रं नैष्येत्युक्ते अनंतरं उद्गातुर्यो हिंकारः तं ना-
स्मिन्हिंकारे शस्त्रायाध्वर्युः प्रातःसवने। उत्तरयोः सवनयोरेषेत्युक्ते नंतरं प्रतिहारस्तदा त्वध्वर्यु

मं॰टी॰धू॰ रन्तुः। इति शस्त्रकालनिरूपणं। अथ प्रउगशस्त्रं। वायुरग्रेगा यज्ञप्रीरित्येवमाद्याः पुरोरुक्
११३ संज्ञकाः सप्तसृचः। वायवायाहि दर्शतेत्येवमाद्यास्तृचः। तत्र यथाक्रमेण एकैकस्य पुरोरुच
उपरिष्टात्तृचं तृचं शंसेत्। द्वितीयं प्रउगे त्रिरिति वचनात्। वायवायाहि दर्शतेत्येतामेव त्रिः शं
सेत्। नाद्यां॥ विश्वान्देवानित्येषा षष्ठी पुरोरुक्। सा सप्तपदा तस्यां त्रिरवसानं द्वयोर्द्वयोः पादयोः॥
एकैकमवसानं। सप्तभ्यः पुरोरुग्भ्य आह्वानं कुर्यात्। वाचमहं देवीमित्येषा [illegible] पुरोरुक् विक
ल्पेन शस्या। यदा तस्याः पुरोरुचः शंसनं न स्यात्तदा पावका नः सरस्वतीत्यस्य तृचस्याद्यावृक्
र्नैव्यः। आहूयोन्नयापरिदध्यात्। एतत्प्रउगं माधुच्छंदसमित्युच्यते। एषा प्रउगशस्त्रक्लृप्तिः
॥ अथ शस्त्रपाठः॥ हिं भूर्भुवः स्वरों३ शोंसावो३ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञं। शिवो रा॰म॰
नियुद्भिः शिवाभिो३ वायवायाहि [illegible] दर्शते०। शुधीहवों त्रिः वायउ० उरूची स्तोमपीतयो३ शोंं ११३

सावों३ हिरण्यवर्त्तनीनरा देवापती अभिष्टये। वायुश्चेन्द्रश्च सुमखों३ मिंद्रवायू इमे सुता॰ मश्वि
त्वा धियानरों३ ओं सावो३ ऋ कव्या राजाना क्रत्वा दक्षस्य दुरोणो। रिशाद सा सधस्थ आ॰३ मित्रं हुवे
पूतदक्षं॰ दक्षं दधाते अपसों३ ओं सावो३ नदेव्या अध्वर्यू आगतं रथेन सूर्यत्वचा। मध्वा यज्ञं समं
ज्ञाथो३ मश्विना यज्ञ्वरिषो॰ आयातं रुद्रवर्त्तनों३ ओं सावो३ मिन्द्र उक्थेभिर्मंदिष्ठो वाजानां च वा
जपतिः। हरिवां सुतानां सखों३ मिन्द्रायाहि चित्रभानो॰ सुते दधिषनश्चनों३ ओं सावों३ विश्वान्
देवान्हवामहे स्मिन्यज्ञे सुपेशसः। त इमं यज्ञमागमं देवासो देव्या धिया। जुषाणा अध्वरे सदो ये
यज्ञस्य तनूकृतः। विश्व आ सोमपीतयो३ मो मा सश्चर्षणीधृतः॰ मेधं जुषंत वह्नयों३ ओं सावो३ वा
चमहं देवीं वाचास्मिन्यज्ञे सुपेशसः। सरस्वतीं हवामहो३ मपावका नः सरस्वती॰ यज्ञं दधे स
रस्वतों३ ओं सावो३ मा हो अर्णः सरस्वतीरिति परिधानीया परि दध्यात्। उक्थ्यं वा चित्रलोकाय

मं·टी०५ त्वेति शस्त्वा जपः। विश्वेभिः सोम्यं मध्विति अनवानं याज्या। उक्तो नुवषट्कारः। आज्यशस्त्रवद्भक्ष
११४ विधिः। चमसाप्यायनवर्ज्जं। सर्वभक्षाश्चमसा भवंति। अथ प्रशास्ता ब्राह्मणाछंस्यछावाक इति त्रयः
शस्त्रिणो होत्रकाः। तेषां शस्त्राण्युच्यंते। प्रातःसवने तेषां शस्त्राणि चतुरहावानि भवंति। स्तोत्रिये
114 भ्योनुरूपेभ्यो नुरूपानंतरं परिधानीयाभ्यश्चेत्साहवस्यानानि। अलन्त्वोभ्यामः प्रशास्तरिति श्रुता
ब्रह्मापूर्वं वदति स्तज्ञे मैत्रावरुणस्य॥ अथ मैत्रावरुणशस्त्रं। एषेत्युक्ते उक्थानुर्हिंकारे भिर्हिंकृत्स
शोंसावोंमानो मित्रावरुणेति स्तोत्रियस्तृचः। पातं सोमम्रतावृधोंशोंसावोमानो गंतरिशाद
सेत्यनुरूपस्तृचः। अन्यत्रापि स्तोत्रियानुरूपाविर्युक्तेतृचौ वेदितव्यौ। अस्य सोमस्य पीतयोंशों
सावोंप्रवो मित्रायेति पंचर्चं सूक्तं। प्रमित्रयोर्वरुणयोरिति नवर्चं। आहूयोत्तमया परिदध्यात्। एम०
उक्थं वाचीन्द्रायस्त्वा जपः। आयातं मित्रावरुणेति याज्या। उक्तो नुवषट्कारः। उक्थपात्रशेषं चम ११४

त्रा हस्तपृष्ठपक्षे

सेवनीतं। अध्वर्युमुपहूयद्धिर्भक्षयतितंतमेवोपहूय। ततः सर्वे चमसिनः स्वंस्वं चमसं समाख्यानिभि
र्नेस हूय [illegible] मित्रं वयं हवामह इति त्र्यस्तोत्रियः। अनुरूपादि समानं। ब्रह्मन्स्तोष्यामः प्रशास्तरिति स्तुत्वा
ब्रह्मापूर्ववदिति सज्जमैत्रावरुणस्य। अपवाहलक्षणा छंसिनः शास्त्रं। एषेत्युक्ते उक्तनुहिंकारे। अभिहिं
कृत्य शोंसावो ३ मायाहि सुषुमाहित इति स्तोत्रियस्तृचः। सुतावंतो हवामहे ३ शोंसावो ३ मानोयाहि सुता
वत इत्यनुरूपस्तृचः। शोंसावो ३ मयमुत्वा विचर्षण इति सप्तर्चः। इन्द्रत्वा वृषभं वयमिति नवर्चं सूक्तं।
उक्ष्वेदमीतिति सृजः। तिसृणामुत्तमामाहूयपरिदध्यात्। उक्थं वाचि शास्त्वा जपः। इन्द्र क्रतुविदं सुतमिति याज्या
। उक्तोनुवषट्कारः। मैत्रावरुणवद्भक्षविधिः। तत्र प्रतिप्रस्थातरुपहूयस्वेति विशेषः। नृहस्तपृष्ठपक्षे इन्द्र
मिद्गाथिनो बृहदित्यिति स्तोत्रियः। अनुरूपादि समानं। अपवाहलन्स्तोष्यामः प्रशास्तरिति स्तुत्वा। ब्रह्मा प्रशा
स्तरेपूर्ववदिति सज्जतः। अथाच्छावाकस्य शास्त्रं। एषेत्युक्ते उक्तनुहिंकारे। अभिहिंकृत्य शोंसावो ३ मिन्द्र गाथिनो४

[illegible] आ गतं सुतमिति स्तोत्रियस्तृचः।
शोंसावो ३ मिंद्रा

मं॰ टी॰ ५ ग्नी अपसस्सरी त्यनुरूपस्तृचः। शोंसावोऽम् तो ऽग्ना वृत्रहणा हुव इति तिस्रः। इहेन्द्राग्नी उपह्वये इति षळ्

११५ चं सूक्तं। इयं वामस्य मन्मन इति नव तृचः। आ हूयो नमया परि द्धाता उक्थं वाचि॰ ऽग्नास्त्वाजपेता इन्द्राग्नी

आगतं सुतमिति याज्या। उक्तो नवषट्कारः। ब्राह्मणाछंसिवद्भसः। वृहत्स्य छेनु इन्द्रे अग्ना नमो वृहदिति स्तो

115 त्रियः। अनुरूपादि समानं॥ ॥संस्थितं प्रातःसवनं॥ ॥अथ माध्यंदिनं सवनं संस्थिते सवने मरुगती

र्यं सर्पणं कुर्युः। तस्य विधिरुच्यते। प्रशास्ता प्रसुहीस्य ध्वर्युणोक्तः। मैत्रावरुणः सर्पतेति ब्रूयात्। ततो

हे ता दक्षिणे नौदुंबरी मित...रे अज्ञेवेन गत्वा सर्वे अपरया द्वारा निष्क्रम्य। उत्तरया वेदिश्रोण्या बहि

र्निष्क्रामंति। निष्क्रम्य किंचिदुदककार्यमावश्यकमस्ति चेत्तत् कृत्वा पुनस्तथैव वेदिश्रोण्या दिवेदिं प्रवि

श्य। सदः पश्चात्प्राङ्मुखः स्थित्वा आदित्यप्रभृती न्धिष्ण्यानगन्यः स गराइति मंत्रेण सकृदेवोपस्था ए म॰

य। अपरस्यां दिशि सदो द्वार्ये च पूर्ववदभिमश्य तूष्णीं सदः प्रविश्य। यथास्थानं धिष्ण्यानीपश्चान्निर ११५

सनोपवेशनं कृत्वा यो अघसोम्य इत्येतन्मन्त्रं जपेत्। एतन्नागतीर्थसर्पणमित्युच्यते॥ ॥एतस्मिन्काले।
ग्नावस्तुतस्थानाचमनं कृत्वा तीर्थेन प्रविश्य। अध्वर्युपदे स्थित्वा आदित्यप्रभृतीन्धिष्ण्यान् छावाकवदु
पस्थाय। हविर्धानस्य पूर्वद्वारं गत्वा हविर्धानचात्वालद्वार्ये स्थूणे पूर्ववद्दक्षिणमश्वा। उपस्थितानुपस्थितांश्च
पूर्ववदुपस्थाय। उरुं नो लोकमित्येतां जपन् प्रविशति। तूष्णीमेव प्रवेशनमिति केचित्। दक्षिणस्य ह
विर्धानस्योत्तरस्याः स्रक्तेः शिरसः प्राग्दक्षिणदेशे स्थित्वा मंत्रेणात तर्णं शिरस्य नोपवेशनं मंत्रमुक्त्वा तिष्ठन्नेव यो
अघसोम्य इति जपित्वा राजानमभिमुखो वतिष्ठते। अपगतवस्त्रो अध्वर्युरुष्णीषं प्रयच्छति तदञ्जलिना
प्रतिगृह्य। त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वा स्ते। अपप्रवृत्ते अभिषवे अप्रेषित एव ग्राव्णोऽभिष्टुयान्मध्य
मस्वरेण। एतस्मिन्मतीदं सवनं मध्यमस्वरेण॥ ॥अभिष्टवनमुच्यते॥ ॥अनभिहिंकृत्य अभित्वा दे
व सवितरित्येतां त्रिर्ब्रूयात्। अयमु ष्टु तेमन इत्येका। आनून इन्द्र इत्येका। मा चिदित्येका। प्रेतेव दन्तिस्वर्व दसे

मं॰टी॰५ हृकं चतुर्दशर्चं सूक्तं। अस्य सूक्तस्य प्रागुत्तमायाः आ व ऋंजसे प्रवो ग्रावाण इति सूक्ते अष्टकच
११६ तुर्थके आवपेत्। अनयोः सूक्तयोर्मध्ये तु रस्ताद्वु परिष्टाद्वा यावमानीः स्वादिष्ठयेत्या वा वपेत्
यावदभिषूतेर्यं सोमः। समाने भिषवे। सुते अध्वर इत्येता मर्धुदस्यो न मामुपसंतत्य तया परिदध्यात्। पि
116 धानेऽष्वगी यं यजमानाय प्रयच्छेत्। ततस्तेनानुज्ञातः पुनराशयय यथारुचि विनियोगं कुर्यात्॥ ॥ अथाप
रमभिरूपमित्यारभ्य समानमन्यदित्यंतेन सूत्रेणोक्तमभिष्टवनं कुर्यात्। यथा सूत्रं। अर्वुदमेवेत्येके प्रवो
ग्रावाण इत्येके। अनयोः सूक्तसंसवादिषु प्रयोगो वेदितव्यः। तत्र त्वरायां अपेक्षितत्वात्। एवं विकल्पेन रू
पद्वयं। तत्र पूर्वं उच्यते। अथापरमभिरूपं कुर्यादिति गणगारिराचार्यः। आप्यायस्व समेतु त इति तिस्रः।
षष्ठं ध्याये प्रेते वदंत्विति तृचः विपरीतं वा सर्वत्रा एतास्तृचः आप्यायमानो मरजंति त्वा दस्रिप इति तृचः। ए गम॰
तमुत्यं दशक्षिपो मर्जंति सप्तधीतयः। स्वादुष्धं मदिन्तमं इति तृचः। मर्ज्यमा नः सुहस्त्येति तृचः। सुपर्णा वा ११६
आप्यायस्व मदिंतम॰ सं ते पयांसि

चमक्रतोपघवीतिनृच इति। एतामज्यमाने सोमे। आदस्याभिर्विवस्वत इति सूक्तं। दुहंति सप्तैकामिति सूक्तं। अ
धुक्षस्व पिप्युषीमिषमिति सूक्तं। ते अस्य योदशायंत्रास आशव इति तृचः। आ कलशेषु धावति पवित्रे परिषिच्यत
इत्येका॥ आ कलशेषु धावति श्येन इति द्वे। तरित्सा अतरित्सासो अद्य इति तृचः। इत्यासिच्यमाने सोमे। बृह
छृव्हे श्रूयमाणे अध्वर्युसकाशात्। चतुर्थी बृहद्वदंति मदिरेण मंदिनेत्येतामृचं। अथ यदि ग्रावाणः संहरेयुः
तथासति मा चिदन्यद्विशंसतेति। एतामृचमभिष्टुयात्। सुते अधर इत्येतां परिदधाति। समानमन्यत्। अथा
परमभिष्टवनं। अर्बुदमेवैके इच्छंति। अथापरमभिष्टवनं। प्रवो ग्रावाण इत्येतदेव सूक्तमिच्छंति। अथ मै
त्रावरुणो ब्रह्मा च माध्यंदिने पवमानसर्पणार्थं पूर्ववद्विप्रुड्होमौ कृत्वा पूर्ववत्सर्पणं करोति। ब्रह्मन्स्तोष्यामः
प्रशास्त इति प्रस्तोत्रा प्रेषिते। ब्रह्मा। भुव इन्द्रवंतः सवितृप्रसूता इति जपित्वा ओं स्तुध्वमित्येव ब्रूयात्। मैत्राव
रुणः स्तुत देवेन सवि त्रे सनेन स्तुते माध्यंदिने पवमाने अंगारविहरणानंतरं दधिघर्मेण चरंति। यदि

मं॰ टी॰ ५ प्रवर्ग्यवान्क्रतुः स्यात्। होतर्वदस्वेत्युक्तः। होता उत्तिष्ठतावपश्यते स्येतामृचमनवानमाह। आतं हविरि

११७ त्युक्तः। आतं हविरोधित्येतामृचमनवानमाह। उद्गावानमेके। यजेत्युक्तः। आतं मन्य ऊधनि आतमग्ना

वित्यनवानं यजति। अग्ने वीहीत्यनुवषट्कारः। दधि घर्मस्याग्ने वीहीति वा। घर्मवद्भक्षविधिः। मयित्यदि

117 न्द्रियं बृहदिति भक्षणमंत्रः। यं धिपाय वं तेनि आमंतसंगारैरभिविहरेयुः तस्यैवं प्रायश्चित्तं भवति। प

श्चात्स्वस्वधिष्ण्यस्योपवेशनं कृत्वा परित्वाग्ने पुरं वयमित्येतामृचं जपेत्॥ ॥अपसवनीयैः पुरोडाशैश्च

रंति। तेषां पुरस्तादुपरिष्टाद्वा पशुपुरोडाशेन चरंति। पशुपुरोडाशस्याक्रियां एके इच्छंति। यदि क्रियते

तदा। अग्ने त्वं पारयानव्यो अस्मानित्यनुवाक्या। होतायक्षदग्निं पुरोडाशस्य जुषतामिति प्रैषः। यथावि

प्रस्यमनुषइति याज्या। अग्नेः स्विष्टकृतः। इळामग्ने। होतायक्षदग्निं पुरोडाशस्येति प्रैषः। स्वदस्वहव्ये एम॰

ति याज्या। अथ सवनीयपुरोडाशानां। माध्यंदिनस्य सवनस्य धाना इत्यनुवाक्या। होतायक्षदिन्द्रं हरि ११७

वां इन्द्रो धाना अत्त्विति प्रैषः। एतेनैव प्रैषेण यजति पूर्ववत्। प्रैषयाज्या माध्यंदिनसवनलिंगिका। अथ स्विष्ट
कृतः। माध्यंदिने सवने जातवेद इत्यनुवाक्या। होता यक्षदग्निं पुरोळाशानामिति प्रैषः। अग्ने ३ हविरग्ने वी
हीत्यवो३षट्। इति याज्या। यदस्य सवनीयानां स्विष्टकृतामहेव पशुपुरोडाशस्य स्विष्टकृतं कुर्वीत। तदा सवनी
यानामेवानुवाक्याप्रैषयाज्या भवन्ति। न पशुपुरोडाशस्य। अथोन्नीयमानेभ्यः प्रैषितो मैत्रावरुणोऽनभि
हिंकृत्य। असावि देवं गोऋजीकमन्ध इति द्व्यर्चं सूक्तमन्वाह। आघोन्नमेत्रिः। होता यक्षदिन्द्रं माध्यंदिनस्य
सवनस्येत्यनेन प्रैषेण प्रेषितो होता। पिबा सोममभि यमुग्र तर्द इत्यनया प्रस्थितयाज्यया यजति। उक्तोऽनुव
षट्कारः। प्रशास्ता दध्यः स्वैः स्वैर्नामभि रादिष्टाः संतो यजंति। मैत्रावरुणः। स ई पाहि। एवा पाहि प्रत्नथा मंदतु
त्वेति ब्राह्मणाच्छंसी। अर्वाङेहीति पोता। तवायं सोम इति नेष्टा। इन्द्राय सोमाः प्रदिव इत्यच्छावाकः। आपूर्णो
अस्य कलशः इत्याग्नीध्रः। सर्वत्रानुवषट्कारः। इत्येता माध्यंदिन्यः प्रस्थितयाज्याः। अथ होता आगतमध्व

मं·टी०५ ॐ अपाऽग्नी इति पठति। अथाक्षितप्रयुक्तः समर्द्धमकर्यीन इति जपति। अथ इच्छोपहूतादिनाराशंससा
११८ द्नांते प्रातःसवनवत्। अयं तु विशेषः। आग्नीध्रचमसात्याग छावाकचमसं भक्षयति। सन्नेषु नाराशंसेषु
दक्षिणाकाल। दक्षिणासु उन्नेष्यमाणासु होत्रादयः सब्रह्मकाः। विसंस्थितसंचरेणानिष्क्रम्याग्नीध्रीये द्वे द्वे आ
118 ऽऽहुतीर्जुह्वति। प्रत्यग्दक्षिणाहवनीयाद्वस्थाये त्वनेन धर्मेण। ग्रावस्तोता चाददानीत्यग्निर्वै दत्ति। प्राचि त्वेधिप्रा
चीत्येताभ्यां मंत्राभ्यां उभयोरपि स्वाहेति मंत्रांतः। प्रथमस्याग्निर्वायुश्चन्द्रमा आदित्या आपो दक्षिणाश्च दे
दक्षिणासु वताः। द्वितीयस्य दक्षिणाः। अथ विहारदेशमानीतासु ॐ क इदं कस्मा अदात् इत्यनेन मंत्रेण दक्षिणानामधेये
यत्किंचित्प्राणि द्रव्यं गवादि तत्तदनुमंत्रयेत्। अत्रापि च यद्धिरण्यादि प्रधानभूतं तदनेनाभिमृशेत्। कन्यां
चाभिमृशेत्। सत्यपि प्राणित्वे दैवेन विवाहप्रकारेण दक्षिणार्थं यदि कन्या दीयते तत्रैवेदमभिमर्शनं एम०
नान्यत्र। केचित्सर्वत्रेच्छंति। सर्वत्र दक्षिणाप्रतिग्रहे अयं विधिर्भवति। यत्र तु आग्नीध्रीयो नास्ति तत्राप्य तु ११८

मंत्राणां कर्त्तव्यं। एवं प्रतिगरत्यागनीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्राश्नीयुः। एतस्मिन्नेव काले शरीरस्थित्यर्थं
भोजनादिकमपि कुर्वंति। क्षुधार्थिनश्चेत्। प्रास्त्यस्य सदः प्रविश्य यथास्वं धिष्ण्यानां पश्चादुपविशंति॥ ॥अ
थ मरुत्वतीयेन ग्रहेण संचरंत्यध्वर्यवः। तस्येन्द्र मरुत्व इह पाहि सोममित्यनुवाक्या। होतायक्षदिन्द्रं मरुत्वं
तमिति प्रैषः। सजोषा इन्द्र सगण इति याज्या। उक्तो नु वषट्कारः। आहृते ग्रहं अध्वर्युं प्रतिप्रस्थातारं चोप
हूय भक्षयेत्। ऋद्धिः॥ ॥अथ माध्यंदिनपवमानानुशंसनं मरुत्वतीयं शस्त्रं शंसेत्। अभिहिं कृत्वा। अध्वर्यो
शोंऽ३सावो३मिति षड्स्वरेणाह्वयति माध्यंदिने शस्त्रादिषु सर्वत्र। आहूयात्तारणं यथोतय इत्येतं प्रतिपत्सं
ज्ञकं तृचं शंसेत्। अस्य तृचस्याद्यां आज्यवदर्द्धर्चशो विग्राहं शंसेत्। प्रतिपच्छंसनानंतरमाहूय इदं वसो
सुतमंध इत्यनुचरसंज्ञकं तृचं शंसेत्। सर्वत्र प्रतिपदनुचरयोर्विलुप्तकेन तृचो वेदितव्यो। अनुचरशंसनाहूय इ
न्द्र नेदीय एदिहीति इन्द्रनिहवसंज्ञकं प्रगाथं तिस्रः काः ककुबुत्तराकारं चां शंसेत्। सर्वत्र प्रगाथ इत्युक्ते तृचो

मं·टा·५ वेदितव्यः। तिरस्कारमिति द्वैरूप्यौ तिरस्कारं शंसेत्। ककुबुत्तराकारमिति तिसृणां मध्ये उत्तमे द्वैरू
११९ प्यौ ककुभौ कृत्वा शंसेत्। बार्हते तु प्रगाथे पुनश्चतुर्थषष्ठौ पादौ पुनरभ्यसितावुत्तरयोरेव स्यातां। एवं श
स्यमाने तिरस्कारे ककुबुत्तराकारं भवति। एवमिन्द्र नेदीय इति प्रगाथं शस्त्वा हूय प्रनूनं ब्रह्मणस्पतिः
119 इति ब्राह्मणस्पत्यसंज्ञकं द्वृचं निहवप्रगाथवच्छंसेत्। आज्यशस्त्रादारभ्य ब्राह्मणस्पत्यप्रगाथान्तं यत्किं
चिच्छस्त्रजातं तत्सर्वं अर्द्धर्चशः शंसेत्। इतऊर्ध्वं चत्वारि याज्यारूपाः प्रतिपदनुचराः प्रगाथाश्च आर्द्ध
र्चशः शंस्याः। गायत्र्युष्णिगनुष्टुब्बृहत्यश्च सर्वाश्चैवा चतुष्पदाः सचोर्द्धर्चशः शस्याः। पंक्तिषु द्विरेव स्याद्द्वयो
र्द्वयोः पादयोः आश्विनशस्त्रेषु अर्द्धर्चशो वा शंसेत्। उक्तादन्यत्सर्वं पच्छः शंसेत्। पादैरेवसायार्द्धर्चीतैः
संतानः॥ ब्राह्मणस्पत्यं प्रगाथं शस्त्वा हूय अग्निर्नेतेत्येकां पच्छः शस्त्वा हूय त्वं सोम क्रतुभिरित्येकां पच्छः श सम०
स्त्वा हूय पिन्वंत्यप इत्येकां पच्छः शंसेत्। एतास्तिस्रो धाय्याः शस्त्रान्तर्गताः। एकपातिन्यस्तृचो धाय्या उच्यंते। धाय्या ११९

नामनन्तरं आहावः धाय्याभ्य इति वचनात्। अनन्तरं आहूय प्रव इन्द्राय बृहत इति मरुत्वतीयं प्रगा
थं अर्द्धर्चशः शस्त्वा हूय जनिष्ठा उग्र इत्येकादशर्चं सूक्तं पच्छः शंसेत्। अस्य सूक्तस्यैकभूयसी ऋचः
शस्त्वा हूय इन्द्रो मरुत्वानित्येतां निविदं शंसेत्। यथा निशान्तं। सर्वत्र माध्यंदिनसवने षट्सुजातासु ऋक्षु
सूक्तेष्वेवमेव निविदं दध्यात्। तच्चैवं निविदं दध्यात्। दशैकं शस्त्वा निवित्। बृहस्पतिसवादौ। सुजातासु
ऋक्षु सूक्तेषु अर्द्धर्चः ऋचः शस्त्वा निविदं दध्यात्। तथा चोक्तं आश्वलायने। तस्यार्द्धः शस्त्वार्द्धः परिशिष्य म
ध्ये निविदं दधातीति॥ तृतीयसवने एकांशिष्टा निविदं दध्यात्। निविद मुक्तमेन पदेन प्रणुत्यत्वेव ध्ये
ति सूक्तशेषमुपसंतनोति। आहूय ववपः सुपर्णा इत्येतया परिदध्यात्। अक्षिणीमस्तानः स्वयं कृत ध्याय
नेन स्वकृतानाम अपेन सामध्येय देनोधिकं मन्यते तदेव ध्यायेत्। तथा चोक्तं आश्वलायने। येन मनसा प्राहृतो
मन्येत तन्मनसा गच्छेदिति। अपप्रासंगिकं। अतिदेशप्राप्तायां वचनादन्यत्रापि भवति। अन्यत्रापेतया

सं०टा०५ तं ते पवि र इ धरे वां। इदं तु वचनं जनिष्ठा उग्र उग्रो अजू इति मध्ये इन इत्युपदेशः प्रास्तायां प्रापणा
१२० र्थ। तत्रापि एतया परिदध्यात्॥ एषा मरुत्वती पङ्क्तिः॥ अपच्छाल्पपाठ उच्यते। अभि हिं हुत्वा अ
ध्वर्यो शों सा वो ३ मा त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुवि कूर्मिमृतीषहमिन्द्र शविष्ठ सत्पतों३
120 त्रिः। तुविशुष्मेति द्वे। शों सा वो ३ मिदं वसो सुतमन्ध इतिति स्तोर्द्वं चर्चः। शों सा वो ३ मिन्द्र नेदीय एदिहि
मित मेधाभिरूतिभिः। आ शं तमशं तमाभिरभिष्टिभिरा स्वापे स्वापिभो३ मा स्वापे स्वापिभिराजितुरे
सत्पतिं विश्वचर्षणिं। कृधि प्रजास्वाभगो३ इ कृधि प्रजास्वाभगं प्रस्तुति राज्ञा चाभिर्यतउक्थिनः। कृतुं पु
नत आनुषों३ शों सा वो ३ म प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यं। यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा
ओकांसि चक्रिरे ३ ई वा ओकांसि चक्रिरे तमिद्वोचेमा विदथेषु शंभुवं। मन्त्रं देवा अनेहसों ३ मन्त्रं देवा ए म०
अनेहसमिमां च वा+ न+ चं प्रतिहर्यथा नरः। विश्वेद्वामा वो अश्नवोंइ शों सा वो ३ मग्निर्नेता भग इव से १२०

का पच्छः। शोंसा वो ३ न त्वं सोम क्रतुभिः सुक्रतुर्भूरित्येका पच्छः। शोंसा वो ३ मपि नं त्वा पो मरुत इत्येका पच्छः।
शोंसा वो ३ मप्र व इन्द्राय बृहत इति द्वे अर्द्धर्चशः। शोंसा वो ३ अजनिष्ठा उग्र इत्येका द्वृचं सूक्ते पच्छः। सा
के प्रतिष्ठा हृद्याजघे थों ३ शोंसा वो ३ मिन्द्रो मरुत्वान्सोमस्य पिबतु। मरुत्वन्तो मरुद्गणः। मरुत्सखा मरुद्
धः। घ्नन्वृत्राणि सत्रजिद्यः। मरुत्वानोजसा सहायई मेनं देवा अन्वमेदन्। अस्तु येहं त्रतूर्ये। शं वरहत्येगविष्टौ।
अर्चं तं गुह्या पदा। परमस्यां परावति। आरो ब्रह्माणि वर्द्धयन्। अनाधृष्टान्योजसा। कृण्वं देवेभ्यो दुवः। मरु
द्भिः सखिभिस्सह। इन्द्रो मरुत्वाँ इह श्रवद्धिह सोमस्य पिबतु। प्रेमां देवो देवहूतिमवतु देव्या धिया। प्रेदं ब्र
ह्म प्रेदं क्षत्रं। प्रेमं सुन्वन्तं यजमानमवतु। चित्रश्चित्राभिरूतिभिः। श्रवद्ब्रह्माण्याव सागमो ३ न त्वं जघेथ
नमुचिं मखस्युं इत्यादि। यतः प्रजज्ञ इन्द्रो अस्य वेदों ३ शोंसा वो ३ वयः सुपर्णा उपसेदुरिन्द्रं। इति परिधानीया
।उक्थं वाचीन्द्राय शृण्वते त्वे तिशस्त्वा जपेत्। ये त्वाहिहत्ये मघवन्नवर्द्धन्निति याज्या। उक्तो नु वषट्कार

मं·टी·५ रः। आज्यवद्भ्रस्सविधिः॥ ॥अथ निष्केवल्यशस्त्रं कुशिकरुच्यते॥ ॥अभिहिंकृत्य। अभित्वा शूर नोनु
१२१ मइति प्रगाथः स्तोत्रियः। आहूय। अभित्वा पूर्वपीतय इति प्रगाथोऽनुरूपः। एतौ प्रगाथौ ककुबुत्तराकारं शस्त्वा
। आहूय यद्वावानेति धाय्यां शस्त्वा। आहूय पिबा सुतस्य रसिन इति साम प्रगाथं अर्द्धर्चशः शस्त्वा। आहूय इ
न्द्रस्य नु वीर्याणि प्रवोचमिति पच्छः द्वार्चं निविद्धानं सूक्तं पच्छः शंसेत्। अस्य सूक्तस्य अष्टौ ऋचः शस्त्वा। आ
हूय इन्द्रो देवः सोमं पिबत्वित्येतामेन्द्रान्निविदं शंसति। अस्य सूक्तस्य उत्तमां परिदध्यात्॥ ॥अथ शस्त्रपाठः॥
॥अभिहिंकृत्य अध्वर्यो शोंसावो३ अभित्वा शूर नोनुमो दुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशा
नमिन्द्र तस्थुषो३ त्विः। मीशानमिन्द्र तस्थुषो न त्वावाँ अन्यो दिव्यो न पार्थिवः न जातो न जनिष्यतो३ न जातो न ज
निष्यते अश्वायन्तो मघवन्निन्द्र वाजिनः। गव्यन्तस्त्वा हवामहे३ शोंसावो३ अभित्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः। ए म०
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यं३ रुद्रा गृणन्त पूर्व्यमस्येदिन्द्रो वावृधे वृष्ण्यं शवः। मदे सुत १२१

स्वर्विषाम वो ३ँम देसुतस्य विष्णव्ययातमस्य महिमानमाय वः। अनुष्टुवंति पूर्वथों ३ शोंसा वो ३ यद्दा वानेत्येका

पद्यः। शोंसा+मृ+ वो ३ मूर्पिबासुतस्य रसिन इति साम प्रगाथसंज्ञका द्वे अर्द्धर्च शः। शोंसा वो ३ मिन्द्रस्य नु वीर्या

णीति पञ्चदशर्चं सूक्तं पच्छः। तासामहिः पत्सुतच्छ्रीर्व भू वो ३ शोंसा वो ३ मिन्द्रो देवः सोमं पिबतु। एकज्ञानां

वीरतमः। भूरिद्युम्नानां तवस्तमः। हर्योस्थाता। पृश्नेः प्रेता। वज्रस्य भर्त्ता। पुरं भेत्ता। पुरं दर्मा। अपांस्रष्टा। अ

पुसत्व नानेता पां नेता। निजघ्निर्दूरे श्रवाः। उपमातिकृद्दंसनावान्। इहो ३ शं देवो बभूवान्। इन्द्रो देव इह श्रवदिह सोमस्य

पिबतु। प्रेमां देवो देवहूतिमवतु देव्याधिया। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रेमं सुन्वंतं यजमानमवतु। चित्रश्चित्राभि

रूतिभिः। श्रवद्ब्रह्माण्या वसागमो ३ न्नीचा वयामसमवहत्रपुत्रेत्यादि। श्येनो नभीतो अतरोरजांसि ३ शोंसा वो ३

मिन्द्रो यातो वसितस्य राजेति परिधानीया। एतच्छस्त्रं स्तोत्रियं शंसती त्यादि ब्राह्मणा स्वरेण शंसेत्। अनुब्राह्म

णं वा स्वर इति वचनात्। उक्थं वाचीन्द्रायोपशृ एवतेत्वेति शस्त्वा जपेत्। पिबा सोममिन्द्र मंदतु त्वेति याज्या। अत्र

मं॰ह्री॰०५ सोऽर्यं होमांतमारभेत्। अनुवषट्कारा सर्वे। उक्तोऽनुवषट्कारः। प्रउगवद्भक्षविधिः। बृहत्पृष्ठे तु त्वामि
१२२ द्धि हवामहे त्वं ह्येहि चेरव इति प्रगाथौ स्तोत्रियानुरूपौ। ककुभन्नरा कारयास्यौ। उभयं शृणवच्च न
इति साम प्रगाथः। अन्यत्समानं॥ ॥अथ होत्रकाणां शस्त्राणि॥ ॥तानि पञ्चाहान्यानि माध्यंदिने। स्तोत्रि
122 येभ्योऽनुरूपेभ्यः प्रगाथेभ्य इति वचनात्। अथ प्रगाथानेतरं परिधानीयायां च॥ ॥अथ मैत्रावरुणशस्त्रे॥
स्त्रे॥ ॥अभिहिंकृत्य। अध्वर्यो शोंसावोरड्। कया नश्चित्र आभुवदिति तृचः स्तोत्रियो ईर्चशाः। शोंसावोर
ड्। कया त्वं न ऊत्येति तृचोऽनुरूपो ईर्चशाः। शोंसावोरड्। कस्तमिन्द्र त्वावसुमिति द्वृचाः प्रगाथसंज्ञकाः। अर्द्धर्च
शः शंसेत्। शोंसावोंसद्यो ह जातमिति पञ्चर्चं सूक्तं पच्छः। एवा त्वामिन्द्र वज्रिन्नत्रेत्येकादशर्चं सूक्तं पच्छः। अ
स्य सूक्तस्योत्तमया हूय परिदध्यात्। उक्थं वाचीन्द्रायेति शस्त्वा जपेत्। उ त्वान्नुषुपणः सुमना उपाक इति या ए म॰
ज्या। उक्तोऽनुवषट्कारः। स्वेन प्रातस्सवनीयकेन शस्त्रेण सम्मोभक्षविधिः॥ ॥अथ ब्राह्मणाच्छंसिनः॥ १२२

॥ अभिहिंकृत्य । अध्वर्यो शोंसावो३ तं वो दस्ममृतीषहमिति प्रगाथः स्तोत्रियः । शोंसावो३ तत्त्वा यामि
सुवीर्यमिति प्रगाथोऽनुरूपः । एतौ प्रगाथौ ककुभं न एकारस्थौ । शोंसावो३ मुदुत्ये मधुमत्तमा इति प्रगाथोऽर्द्धर्च
शः । शोंसावो३ मिन्द्रः पूर्भिदातिरद्दासमर्कैरिति सूक्तमेकादशर्चं पञ्चमः । उदु ब्रह्माण्यैरत श्रवस्येति षळृचं
सूक्तं षष्ठः । अस्य सूक्तस्योत्तमया हृदयपरिदध्यात् । उक्थं वाचीन्द्रायेति शस्त्वा जपः । ऋजीषी वज्रीति या
ज्या । उक्तोऽनुवषट्कारः । स्वेन प्रातःसवनिकेन शस्त्रेण समो भक्षविधिः । इह स्तुष उपसेतु । अभि प्र वः सुरा
धसमिति स्तोत्रियानुरूपौ प्रगाथौ । ककुभं न एकारस्थौ । समानमन्यत् ॥ ॥ अथाछावाकस्य ॥ ॥
अभिहिंकृत्य । अध्वर्यो शोंसावो३ तरोभिर्वो विदद्वसुमिति प्रगाथः स्तोत्रियः । शोंसावो३ तरणिरि
त्सिषासतीति प्रगाथोऽनुरूपः । एतौ प्रगाथौ ककुभं न एकारोत्रास्थौ । शोंसावो३ मुदिन्न्वस्य रिच्यत इति
द्वे प्रगाथसंज्ञके अर्द्धर्चशः । शोंसावो३ मम्भृणं इन्द्रावृधे वीर्यायेति सूक्तं पंच[illegible]र्चं पञ्चमः । इमामूषु प्रभरतिसा

मं.२।०५ नयेथा इति एकादशर्चं सूक्तं पठेत्। अस्य सूक्तस्योपोत्तमामुद्धरेत्। अस्मभ्यं तद्धर्यश्वप्रयन्धीं इ
१२३ शोंसावों३ श्रुनंहुवेम मघवानमिति परिदध्यात्। उक्थं वाचीन्द्रायेति ग्रहस्याजपः। पिबा वर्द्धस्वे
ति याज्या। उक्तो नुवषट्कारः। ब्राह्मणाछंसिवद्भक्षविधिः॥ ॥इति माध्यंदिनं सवनं॥ ॥अथ मग
123 तीर्थसर्पणं पूर्ववत्। अथ तृतीयसवनमुत्तमस्वरेण। तत्र प्रथमं आदित्यग्रहेण चरेति। आ
दित्यानामवसानूतनेने त्यनुवाक्या। होतायक्षदादित्यान्प्रियान्प्रियधाम्न इति प्रैषः। आदित्यासो
अदितिर्मादयन्तामिति याज्या। एतं ग्रहं हूयमानं न ईक्षेत न अनुवषट्करोति न भक्षयति। केचिदत्र
मगतीर्थसर्पणं कुर्वन्ति। अथार्भवपवमानार्थं ब्रह्मा मैत्रावरुणश्च पूर्ववद्विसृष्टे मोकृत्वा सर्पणं
कुर्यात्। ब्रह्मन्स्तोष्यामः प्रशास्तः इति श्रुत्वा ब्रह्मा स्वरिन्द्रवन्तः सवितृप्रसूता इति जपित्वोंस्तुध्वमि एम०
त्युच्चैर्ब्रूयात्। मैत्रावरुणस्तु पूर्ववत्। स्तुते पवमाने अंगारविहरणानेतरं मनोतादिपश्विज्यान्तं पशु १२३

कर्मकर्त्तव्यं। मनोतायै संप्रेषितः। प्रशास्ता त्वं ह्यग्ने प्रथम इति सूक्तमन्वाह॥ अथ पशुहविर्यागः। पाहि नो अग्ने
पायुभिरजस्रैरित्यनुवाक्या। होता यक्षदग्निं छागस्य हविष आददद्य॰घसं नूनं॰ करदेवाग्निर्जुषता
मिति प्रेषः। प्रकारवद् इति याज्या। वनस्पतियागः। होता यक्षद्वनस्पतिमभि हि पिष्ट॰ यत्राग्नेराज्यस्य ह
विषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्राग्नेश्छागस्य हविषः प्रिया धामानि य
त्र वनस्पतेः प्रिया पाथांसि यत्र देवानामित्यादिः। एवं स्विष्टकृत्प्रैषेपि प्रिया धामान्ययाळिति विशेषः।
इडायां पूर्ववदागूः॥ अथैन्द्रः पुरोडाशोऽवरंति। नतायै धाना इत्यनुवाक्या। होता यक्षदिन्द्रं हरिवां इति त
तीयसवनलिंगकः प्रेषः। अनेनैव प्रेषेण यजति पूर्वोक्तन्यायेन। अथ स्विष्टकृतः। अग्ने तृतीये सवने
हि कानिष इत्यनुवाक्या। होता यक्षदग्निं पुरोडाशानामिति प्रेषः। हविरग्ने वीहीति याज्या। अथोन्नीय
मानेभ्यः प्रेषितो मैत्रावरुणः। अनभिहिंकृत्य इहोपयात इति नववर्चं सूक्तमन्वाह॥ आ द्योत्तमे त्रि ब्रूया

मं·टी·५ तः। होतायक्षदिन्द्रं तृतीयस्य सवनस्येत्यादिनाप्रैषेणाप्रेषितः। होता इन्द्र ऋभुभिर्वाजवद्भिरित्यन
१२४ याप्रस्थितयाज्ययायजति। प्रशास्त्रादयः स्वस्वनामभिराहिष्टाः संतो यजंति। इन्द्रावरुणासुतपावि
ति प्रशास्ता। इन्द्रश्च सोमंपिबतमिति ब्राह्मणाच्छंसी। आवो वहंतु सप्तय इति पोता। अमेव नः सुहवाआ
हीति नेष्टा। इन्द्राविष्णू पिबतमित्यच्छावाकः। इमं स्तोमममर्हत इत्याग्नीध्रः। सर्वत्रानुवषट्कारः। एतास्तृ
124 तीयसवनिक्यः प्रस्थितयाज्याः। अथागतमध्वर्युमयाक्षमिति पृच्छति। अयाडिति प्रत्युक्तः। समइ
मकरिति जपति। अप इच्छोपह्वानं प्रकृत्यैवाग्नूर्ध्वं वति। सुत्वघ्नव्येनु वर्त्तत एव॥ हारियोजनपर्यंतं।
अवांतरेडां प्राश्याचम्य होतृचमसं भक्षयेदित्यारभ्यनाराशंससादनांतं माध्यंदिनसवनवत्करोतीति। स
न्नेषु नाराशंसेषु सर्वे चमसिनो विसंस्थितसंचरेणानिष्क्रम्य सवनीयस्य पुरोडाशस्य मडुत्तराद्देशात्किं एमo
चित्किंचिदादाय पितृभ्यस्त्रः पिंडाः कृत्वा। प्रतिस्वं चमसेभ्यो दक्षिणातः। सान्वितन्नु पितामहानुप्रपितामह १२४

हान्प्रपितामहानुद्दिश्य स्थापयेयुः। अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति मंत्रेण। उपवीतिन ए
व एतत्पिण्डदानं। अविशेषेण जीवत्पितृकस्यापि भवति। ततः स व्याहृत आग्नीध्रीयं प्राप्य हविरुच्छिष्टं सर्वे प्रा
श्नंति। अन्यदपि भोजनादिकं कुर्वंत्यर्थिनश्चेत्॥ अथ सदः प्रसर्प्य सावित्रेण ग्रहेण चरंति। अभूद्देवस्सवि
तेत्यनुवाक्या। होता यक्षद्देवं सवितारमिति प्रैषः। दमूना देवः सविता वरेण्य इति याज्या। नानुवषट्करोति न
भक्षयति॥ ॥अथार्भवपवमानानुशंसनं वैश्वदेवसंज्ञकं शस्त्रं शंसेत्। संशिष्यन्नवीदिशो ध्यायेत्। यस्यां
दिशि यजमानस्य द्वेष्योस्ति ततो ध्यायेत्। अध्वर्यो शोंशोंऽसावो शमिति सभासद आह। वस्तृतीयसवने ए
तस्मादिषु सर्वत्र षोडशिन ऊर्ध्वं पर्यायप्रभृतिषु शोंसावो शमिति प्रातःसवनवदाहावः। अभि हिंकृत्य तत्सवि
तुर्वृणीमहे। अद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ। आ घा मच्च मा द्या घ व छंसेत्। अभूद्देव इ
ति सावित्रं सूक्तं पच्छः चं। पंच पच्छः चास्त्वा सविता देव इति विंशाति परां निविदं दध्यात्। एकां शिष्ट्वा तृतीयसवन

मं॰टी॰५ इतिवचनात्। एकयाचेति कल्पजाधाय्या। प्रद्यावायज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयं सूक्तं पंचर्चं। च
१२५ तस्रश्चास्त्वा द्यावापृथिवी सोमस्य मत्सतामिति पञ्चदशप दांनिविदं दध्यात्। सुरूपकृत्नुमूतय इत्येकाऽ
र्द्धर्चेशः। नसन्नयमितिसूक्तं पञ्चर्चं पच्छः। चतस्रः शस्त्वा इमे वो देवा इति सप्तदशप दांनिविदं दध्यात्। अ
यं वेनः ये भ्यो माता एवा पित्रे। इतिति स्रो धाय्याः। आनो भद्रा इति दशर्चं सूक्तं। नव वैश्वदेवं अष्टौ शस्त्वा वि
125 श्वेदेवाः सोमस्य मत्सन्निति त्रिंशत्य दांनिविदं दध्यात्। नवमीमर्धर्चं पच्छः शस्त्वा। आहूय अदितिर्द्यौरदिति
रंतरिक्षमिति परिधानीया। भूमिमुपस्पृश्यानृद्धिः पच्छः सकृदर्द्धर्चशः। अस्मिन् शास्त्रे प्रति प्रतीकमाहावः। नि
विदं चादेः। एषा वैश्वदेव कृप्तिः॥ ॥अथ शास्त्रस्वरूपमुच्यते॥ ॥अभिहिंकृत्य अध्वर्यो शोंसा वो ३ सा
वो ३ म् तत्सवितुर्वृणीमह इति त्रचो र्द्धर्चशः। आघा मा ज्यवत्॥ शोंसावो ३ म घानो देव सवितरिति त्रचोर्द्ध रा॰म॰
र्चशः। शोंसावो ३ मभूद्देव इति सूक्तं षडृचं पच्छः। एवे व तस्थुः सवितः सवाय तो ३ शोंसावों ३ सविता देवः १२५

सोमस्यपिबतु । हिरण्यपाणिःसुजिह्वः । सुबाहुःस्वंगुरिः । त्रिरहन्सत्यसवनः । यःप्रासुवद्दसुधितौ । उभेजो
ष्ट्रीसवीमनि । श्रेष्ठंसावित्रमासुवं । दोग्ध्रींधेनुं । वोढारमनड्वाहं । आशुंसप्तिं । पुरंधिंयोषां । जिष्णूरथे
ष्ठां । सभेयंयुवानं । परामावांसाविषत्यराघवंसं । सवितादेवइहश्रवदिहसोमस्यमत्सत् । प्रेमांदेवोदेवहूति
मवतुदेव्याधिया । प्रेदंब्रह्मप्रेदंक्षत्रं । प्रेमंसुन्वंतंयजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा
गमो ३ योनेत्रिरहन्सवितःसवासः १० आदित्यैर्नोअदितिःशर्मयंसों ३ शोंसावो ३ मेकयाचदृश्यामिश्रवसभू
ते । इम्मामिष्टयेविंशत्याचो ३ न्तिस्त्रभिश्रवहसेति ३ ग्नाताच । नियुद्भिर्वायविहतानिमुंचों ३ शोंसावो ३ मूप्रया
वायद्भिःपृथिवीस्तनात्प्रधेतिपर्जन्यंचंपयः । समुद्रेअंतःकवयःसुदीतयों ३ शोंसावो ३ नद्यावापृथिवीसोमस्यम
त्सतां । पिताचमाताच । पुत्रश्चप्रजननंच । धेनुश्चऋषभश्च । धन्याचधिषणाच । सुरेताश्चसुदुघाच । शंभूश्चम
योभूश्च । ऊर्जस्वतीचपयस्वतीच । रेतोधाश्चरेतोभृच्च । द्यावापृथिवीइहश्रुतामिहसोमस्यमत्सतां । प्रेमांदेवीदे

मं॰टी॰५ वृहूतिमवतां देव्याधिया। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रेमं सुन्वन्तं यजमानमवतां॥ चित्रैचित्राभिरूतिभिः। श्रुतं।
१२६ ब्रह्मण्यावसागमतो३नूनद्धो अघसवितरित्यादि। ओं सावों३स्तु रूपकृत्नु मूतय इत्येका अर्द्धर्चश्च।
नुशं ओं सावो३न्नतरथमितिसूक्तं पञ्चर्चं पच्छः। तेनो हि न्वं नु सातये धिये जिषो३ ओं सावो३स्मभवो देवाः सोम
स्यमत्सन्। विद्वी स्वपसः। कर्मणा सुहस्ताः। धन्या धिष्णाः। शम्या शमिष्ठाः। शच्या शचिष्ठाः। ये धेनुं विश्व
126 जुवं विश्वरूपामरक्षन्। अरक्षं धेनुमभवद्विश्वरूपी। अयुंजत हरी अयुर्ईं वां उपा। अभुध्वंसं कनीना
मदं नः। संवत्सरे स्वपसो यज्ञियं भागमायन्। स्तभवो देवा इत्र्वभिहसोमस्यमत्सन्। प्रेमां देवा देव
हूतिमवंतु देव्याधिया। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रेमं सुन्वन्तं यजमानमवंतु। चित्राश्चित्राभिरूतिभिः। श्रव
न्त्ब्रह्मण्यावसागमो३स्मभुर्भरायसंशिशानुसातिमित्यादि। ओं सावो३मयं वेनश्चोदयत्पृश्निगर्भा इ राम॰
त्येका पच्छः। ओं सावों३ये भ्यो माता मधुमत्पिन्वते पय इत्येका पच्छः। ओं सावो३पे वा पित्रे विश्वदेवाय वृष्ण १२६

इत्येका पच्छः। शोंसावो ३ स्मा नो मद्यः कृतव इति नवर्चं सूक्तं पच्छः। व्यशेम देवहितं यदायोः ३ शोंसावो ३ विश्वे दे
वाः सोमस्य मत्सन्। विश्वे वैश्वानरः। विश्वे हि विश्वमहसः। महि महान्तः। तक्वान्नाने मधितीवानः। आस्क्राः प
र्वतवाहसः। वातात्मानो अग्निदूताः। ये द्यां च पृथिवीं चाततस्थुः। अपश्च स्वश्च। ब्रह्म च क्षत्रं च। बर्हिश्च वेदिं चाय
ज्ञं चोरु चान्तरिक्षं। ये स्थ त्रयश्च एकादश। त्रयश्च त्रिंशच्च। त्रयश्च त्री च शता। त्रयश्च त्री च सहस्रा। तावन्तो भिषाचः
। तावन्तो एति षाचः। तावतीः पत्नीः। तावतीर्ग्नाः। तावन्त उदरणे। तावन्तो निवेशने। अतो वा देवा भूयांसः स्थ। मा
वो देवा अपिशसा मा परिशसा इह स्थ। विश्वे देवा इह श्रवन्निह सोमस्य मत्सन्। प्रेमां देवा देवहूतिमवन्तु देव्या धि
या। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रेमं सुन्वन्तं यजमानमवन्तु। चित्राश्चित्राभिरूतिभिः। श्रवन्त्वला एत्यावसागमों ३ शा
तमिन्नु शारद इत्यादि। शोंसावो ३ मदिति द्यौरदितिरिति परिधानीया द्विः पच्छः सकृदर्द्धर्चशः। भूमिमुपस्पृश
न्। उक्थं वाचीन्द्राय देवेभ्य आश्रुत्सो त्वेति शस्त्वा जपेत्। विश्वे देवाः शृणुतेमं हवं म इति याज्या। उक्तोनुव

मं॰टी॰५ षट्कारः। प्रउगवद्गस्य विधिः॥ अथ घृतस्य यजेत् स्रुक्के॥ घृताहवनो घृतपृष्ठो अग्निरित्यनया॥ अनादिश्य यज
१२१ ति उपांशु। सोमस्य यजेत् स्रुक्के त्वं सोम पितृभिः संविदान इत्यनया अनादिश्य यजति उच्चैः। पुनर्घृतस्य य
जेत् स्रुक्के उरु विष्णो विक्रमस्वेत्यनया अनादिश्य यजेत् उपांशु। अन्यतरस्मिन्नेव चेत् घृतयागं कुर्वीत अथ ध्
127 र्युवः तदग्नाविष्णू महिधाम प्रियं वामित्यनया अनादिश्य यजेत् उपांशु। आहृतं घृतसिक्तं सोमं च
-उद्गातृभ्यः पूर्वमादाय तत्रात्मानमवेक्षते। यत्ते चक्षुर्दिवि यत्सुपर्णो इति मंत्रेणादधातीति मंत्रांतः।
ततः सोमस्य स्थ नाऽस्येनां गुष्ठोपकनिष्ठिकाभ्यामसिपी अज्या छंदोगेभ्यः प्रदातुमध्वर्यवे प्रयच्छेत्। घृ
तस्यात्यल्पतायां घृतात्मानेन पश्येत् तदा। तद्दिस्य कृकत्तुस्य गवर्चो। अस्मासु धारय। मसि इत्यादिकं म
द्रं कर्णेभिः शृणुयाम देवा इत्येतामृचं जपेत्। अथ चात्वाले अग्निविहरणानंतरं आग्नीध्रः पालिव र म०
तस्य यजति। ऐभिरग्ने सरथमित्यनया अनादिश्य उपांशु यजति। यद्यु उच्चैः संप्रैष्येत्युः। तदापि उपां १२०

ने

श्वेव याज्यां ब्रूयात्। उपांश्वेवैतस्य वषट्कारः। आग्नीध्रो नेष्टुर्हविःसंस्थितसंचरेण नेष्टारमनु
प्रपद्यतस्योपस्थ आसीनो ग्रहं भक्षयति। नोपस्थ आसीन इति शाल्यांतरप्रतिषेधात्तस्मी पए वभक्षये
दिति केचित्। अध्वर्युमुपहूय भक्षयित्वा यथेतं निष्क्रामत्याग्नीध्रः॥ ॥अथ होताग्निमारुतसंज्ञकं सतरि
तं शंसेत्॥ ॥स्तोत्रोपाकरणकालादारभ्य प्राकृतशिरस्को भवेत्। अभिहिंकृत्याहूय वैश्वानराय पृथु
पाजसे विप इति वैश्वानरीयमेकादर्चं सूक्तं अस्य सूक्तस्याद्यां पच्छःस्गावानं त्रिः शंसेत्। तृतीयेन वचनेन
उत्तरां संतनुयात्। दशशस्त्वाहूय अग्निर्वैश्वानर इति पञ्चदशपदां निविदं दध्यात्। शोंसा३ओं नः करत्यर्वत
इत्येकाधाय्याहूय प्रत्वक्षस इति मारुतं सूक्तं षड्ऋचं पञ्चशस्त्वाहूय मरुतो देवा इति चतुर्दशपदां निविदं द
ध्यात्। यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ ककुभुत्तरा कारे शस्यो। शोंसा
वों ३ प्रतव्यसीं नव्यसीं धीतिमग्नय इति जातवेदस्यं सूक्तं अष्टर्चं सप्तशस्त्वाहूयाग्निर्जातवेदा इति षोड

मं॰ टी॰ ५ त्रा पदं शंनिविदं दध्यात्। आहूय आपो हि ष्ठेति तिसृभिः। आपो हि ष्ठा यानां शंसने अथ विशेषः। अन्वारब्धे वधूक्र
१२९ तधुः। अपावृतशिरस्को भूत्वा अपउपस्थानं विकं बितया वृत्त्या शंसेत्। ततऊर्ध्वं द्रुततरं एव शंसेत्। उत नो
हिर्बुध्न्यः शृणोत्विति त्र्येकाधाय्या। देवानां पत्नीरिति द्वे। राकामहमिति द्वे। पावीरवी कन्या। इमं यमप्रस्तरं मा ह
128 वी कव्यैः। उदीरतां। आहं पितृन्। इदं पितृभ्यो नमो अस्त्वद्येति षट् धाय्याः। स्वादुष्किलायमिति च तसृभिः। आ
सां मध्ये आहावः। यथो रे जसेति कल्पजा। विष्णोर्नु कं तं तुं तन्त्वन्निति धाय्याः। एवा न इन्द्रो मघवेत्यनया भूमि
मुपस्पृश्य अन्यं रिदध्यात्। अस्य ऋचो मध्यमे वचने उत्तम पादम वशिष्य विरमेत्। यावत् ध्रुवावनयनं भव
ति। तस्मिन्नुन्नीते शेषं समापयेत्। केचिन्नतीयवचने त्रीन्पादाननुक्त्वा विरम्य ध्रुवावनयनानन्तरं पादेन प्र
णुवंति। यदि तु प्रागेव ध्रुवो वनीतस्तथा सति ध्रुवावनयनं न कांक्षितव्यं। असितृ आस्वे प्रति प्रतीकमाहावः ए म॰
निविदं चाद्देः स्वादुष्किलायीनां मध्ये च। एषा निमारुतस्य कृप्तिः। अथ ब्रह्मन्त्रो याम सः प्रशास्तरिति सु १२९

त्वाग्रुल्लार्भ वपवमानवदतिसृजेत्। मैत्रावरुणः पूर्ववत्॥ ॥अभिहिंकृत्याध्वर्यो शो शों ३ सा वो ३ वै श्वा
नरस्य पृथु पाजस इति सूक्तमेकादशर्चं पठ्यः। अग्ने ता विश्वा परिभूरसि त्मनो ३ ञों सा वो ३ मग्नि र्वै श्वा
नरः सोमस्य मत्सत्। विश्वेषां देवानां समित्। अजस्रं दैव्यं ज्योतिः। यो विड्भो मानुषीभ्यो अदीदेत्। घृतपृ
ष्ठो सुदिघुतानः। अजर उषसामनीकं। आ यो द्यां भात्या पृथिवीं। आ उर्वन्तरिक्षं। ज्योतिषा यज्ञाय शर्म यंसत्।
अग्नि र्वैश्वानर इह श्रवदिह सोमस्य मत्सत्। प्रेमां देवो देवहूतिमवतु देव्याधिया। प्रेदं ब्रह्म प्रेदं क्षत्रं। प्रे
मं सुन्वन्तं यजमानमवतु। चित्रश्चित्राभिरूतिभिः। श्रवद् ब्रह्माण्यावसागमो ३ वैश्वानरस्य दंसनाभ्य इत्यादि
शों सा वों ३ ञों नः करत्यर्वत इत्येकादर्चशः। शोंसा वो ३ म प्रत्नवद्भस इति सूक्तं षड्वृचं पठ्यः। आदित्यानामानि यद्धि
पा० सो यानि दधिरें ३ ञों सा वो ३ म मरुतो देमस्य मत्सन्। सुष्टुभः स्वर्काः। अर्कस्तुभो बृहद्वयसः। शुभ्र अनाधृष्टरथाः
त्वेषासः पृश्निमातरः। शुभ्राहिरण्यखादयः। तवसो मंदिष्टयः। नमस्यावर्षनिर्णिजः। मरुतो देवा इह श्रव

मं॰ ८॰ ५ न्निहसोमस्यमत्सनः। प्रेमांदेवादेवहूतिमवंतुदेव्याधिया। प्रेदंब्रह्मप्रेदंक्षत्रं। प्रेमंसुन्वंतंयजमानमवंतु।
१२९ चित्रश्चित्राभिरूतिभिः। श्रवब्रह्माण्यावसागमोंऽ३ श्रियसेकंभानुभिःसंमिमिक्षिरइत्यादि। श्रौंसावौंऽ३ यज्ञा
यज्ञावोअग्नयइतिस्तोत्रियःप्रगाथः। ककुबुत्तरएकारः। ज्ञास्यः। उनत्रातातनूनोंऽ३ श्रौंसावोऽ३न् देवोवोद्रविणो
129 दाइतिप्रगाथोनुरूपःककुबुत्तरएकारः। अग्निर्जनायदाशुषोंऽ३ श्रौंसावोऽ३मप्रतत्वसीमित्सष्टंर्च्यपछ्यःस्रुक्
वर्णामुदुनोयंसतेधियोंऽ३ श्रौंसावोऽ३मग्निर्जातवेदाःसोमस्यमत्सतु। स्वनीकश्चित्रभानुः। अप्रोषिवान्गृह
पतिः। तिरस्तमांसिदर्शतः। घृताहवनईड्यः। वहुत्वमसित्वतयज्वा। प्रतीत्याशत्रूंजेतापराजितः। अग्नेजा
तवेदोभिद्युम्नमभिसहआयछस्वातुरो। अमुत्राःसमेद्वारंस्तोताररमेहसस्याहि। अग्निर्जातवेदाइहस्र
वदिहसोमस्यमत्सत्। प्रेमांदेवोदेवहूतिमवतुदेव्याधिया। प्रेदंब्रह्मप्रेदंक्षत्रं॥ प्रेमंसुन्वंतंयजमानमवतु। ८ मं॰
चित्रश्चित्राभिरूतिभिः। श्रवब्रह्माण्यावसागमोऽ३म प्रगुघ्नप्रगुघद्भिरित्यादि। श्रौंसावोऽ३मापोहिष्ठेति १२९

तिस्रो दैर्च्चरा॥ शोंसावो३ मुत नो हिर्बुध्न्यः शृणोत्वित्येका प छ॥ शोंसावो३ न्देवानां पत्नीरुशतीरवन्तु न इति
द्वे प छ॥ शोंसावों३ एकाम हमिति द्वे प छ॥ शोंसावो३ मूपावीरवी कन्या चित्रायुरित्येका प छ॥ शोंसावो३ मिमं
यम प्रस्तरमा हि सीद इत्येका प छ॥ शोंसावों३ मातली कव्यैर्यमो अङ्गिरोभिरित्येका प छ॥ शोंसावो३ मुदीरता
मवर उत्परास इत्येका प छ॥ शोंसावो३ माहं पितॄन्त्सुविदत्राँ अवित्सीत्येका प छ॥ शोंसावो३ मिदं पितृभ्य इत्ये
का प छ॥ शोंसावों३ स्वादुष्किलायं मधुमाँ उतायमिति द्वे प छ॥ शोंसावों३ मयं मे पीत उदियर्त्ति वाचमिति द्वे प छ॥
शोंसावो३ यथो रोजसा स्कभिता रजांसि वीर्येभिर्वरतमा शविष्ठा३ या पत्येते अप्रतीता सहोभिर्विष्णू अग
न्वरुणा पूर्वहूतौ३ शोंसावो३ विष्णोर्नु कं वीर्याणि प्रवोचमित्येका प छ॥ शोंसावो३ न्तंतुं तन्वन्रजसो भानुम
न्विहीत्येका प छ॥ शोंसावो३ मेवा न इन्द्रो मघवा विरप्शीति परिधानीया प छ॥ भूमिमुपस्पृश्य शं नो मे नवच
नेन ध्रुवावनयनं कांस्ये॥ उक्थं वाचीन्द्राय देवेभ्य आश्रुताय त्वेति शास्त्राजपेन्॥ ये३ यजामहे ग्ने मरुद्भिः शु

मं॰टी॰५ मयद्भिर्ऋक्वभिः सोमं पिब मंदसानो गणश्रिभिः। पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना
१३॰ सजूः ३ वौ ३ षट्॥ सोमस्याग्ने वीहि ३ वौ ३ षट्॥ मेत्रावरुणवद्भ्यः॥ अस्य शस्त्रस्य प्रतिगरे विशेषः। प्र
थमायामृचि अर्धावसानद्वये ऽरंगते ओथामोदैवोमिति प्रतिगरः प्रणवान्तः। स्वादुष्किलायं मधुमाँ उ
130 तायमिति तासु मदामो दैव मोदामो दैवोमिति प्रतिप्रगरे। स्तुता घस्तुताद् प्रतिगरयोः स्थाने प्रणवे प्र
णव आहावो न रइत्यस्याप्ययमपवादः। अथाग्निमारुतान्ते मगतीयं सर्पणं। यस्मिन्काले अध्वर्यु
र्नतिसृजेत्तदा अनतिसृष्टा एव सर्पेयुः। अथानूयाजादिसूक्तवाकप्रैषे विशेषः। अपप्रैषसमाम्ना
ये द्वितीयसूक्तवाकप्रैषस्तमत्र ब्रूयात्। तत्र यथादैवतं निगमनं कर्तव्यं। अग्निमद्य होतारमवृणीता
यं सुन्वन्यजमानः ॰ग्राहं॰ अग्नय आज्यं ग्राहं सोमायाज्यं बध्नन्नग्नये छागं सुन्वन्निन्द्राय सोमं स्रज्ञन् ए म॰
हविर्भ्यो धानाः सूपस्यात्र घदेवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनाग्नये छागेनेन्द्राय सोमे १३॰

नहरिभ्यांधानाभिरघतंमेदस्तइत्यादि।हारियोजनांतेपत्नीसंयाजांतेवा।अध्वर्युर्यदाब्रूयान्नदाप्रशस्ता
तिसर्जनमेवकुर्यात्।पुनःसर्पणं।पुनःसदःप्रवेशनेनच।प्रयोजनाभावात्।मरगतीर्थसर्पणस्यसदःप्र
वेशंगतत्वात्।हारियोजनादियज्ञपुच्छमुत्तरत्रवक्ष्यते॥ ॥संतिष्ठतेग्निष्टोमः इतिमंचनाचार्यविरचितायां
आश्वलायनसूत्रेप्रयोगदीपिकायांपञ्चमोध्यायसमाप्तः॥ ॥श्रीगणेशायनमः॥अथात्यग्निष्टोमउ
च्यते।सर्वमग्निष्टोमउच्यते।सर्वमग्निष्टोमवत्।अयंतुविशेषः।आग्निमारुतादूर्ध्वंषोडशिनंग्रहंगृहं
त्यध्वर्यवः।तस्यतुशस्त्रंषोडशिवद्भवति।तच्चषोडशिशस्त्रंषोडशिव्याख्यानसमयेवक्ष्यते।ततोमरगतीर्थ
सर्पणेततोनूयाजादियज्ञपुच्छं॥ ॥समाप्तोत्यग्निष्टोमः॥ ॥अथोक्थ्यसंज्ञोज्योतिष्टोमोवक्ष्यते॥ ॥
तस्यसवनीयपशोःप्रागग्निष्टोमवत्।इत्यन्विशेषः।प्रवर्ग्योत्रनास्ति।उपसन्मात्रमेवकुर्वंति।सवनीयेद्वौ
पशूछागौ।आग्नेयऐन्द्राग्नश्च।ऐन्द्राग्नउक्थ्येद्वितीयइतिवचनात्।आवाहनेवैकल्पिकावाज्यभागावाँघ्रा।अ
वा१

मं॰टी॰०५ ग्निमा३वह । इन्द्राग्नी आ३वह । वनस्पतिमा३वह । इन्द्रं वसुमन्तमावहेत्यादि । अधिगोविशेषः । मेधप
१३१ तिभ्यो मेधौ । प्राभ्यामग्निं भरत । अन्वेनौ माता । उदीचीनामनयोः पदो निधत्तात् । पृथिवीं शरीरे । एक
धैकधानयोस्त्वचावाद्यतात् पुरा पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरं तरेवोष्माणं वारयध्वा
त् । श्येनमनयोर्वक्षः कृणुतात् प्रशसा बाहू छला दोषणी कश्यपेवांसा नच्छिद्राः श्रोणीः कवषोरू
(131) स्रेकपर्णाष्ठीवन्तः षड्विंशतिः षड्विंशतिरनयोर्वंक्रयः । गात्रं गात्रमनयोरनूनं । वनिष्ठुमनयोर्मा रवि
ष्टेत्यूहः । आग्नेयस्य पशोः प्रदानत्र यस्य याज्यानुवाक्याप्रैषा अग्निष्टोम उक्ताः । ऐन्द्राग्नस्य निरूढ
पशावुक्ताः । अत्र वनस्पतियागे विशेषः । वनस्पतिमभि हि पिष्टं॰ तत्रैतौ प्रस्तुत्ये॰ रभीयसा विवहन्ती
त्यादि समानं । स्विष्टकृते अयाडग्निरिति विशेषः । यदि पूर्वकारिणो ऐन्द्राग्नमेव कुर्वन्ति तदा अधि एम॰
गुप्रभृति सर्वं निरूढपशुवत् । नूहत्यष्ठनिबंधनो विशेषः पूर्वमेवोक्तः । अन्यत्सर्वं माग्निमारुतान्तम १३१

ग्निष्टोमवत्। आग्निमारुतान्ते होत्रकाणामुक्थ्य प्रभृतीनि शस्त्राणि त्रीणि भवंति तानि चतुरर हावानि भ
वंति। स्तोत्रियेभ्योनुरूपेभ्योनुरूपानेनतरं परिधानीयाभ्य इत्याहावुस्थानानि॥ ॥तत्र मैत्रावरुणस्य
रो शस्त्रं॥ ॥हिं भूर्भुवस्स्वरो३म ध्वर्यो शोंसावो३मेत्युघुष्व्रवाणित इति स्तोत्रियतृचोर्द्धर्चशः। शोंसावो
३ माग्निरगाभिभारत इत्यनुरूपतृचोर्द्धर्चशः। शोंसावो३ चर्षणीधृतमस्तम्माघ्यामसुर इतितृ
चोपछः शस्यो। इन्द्रावरुणायुवमिति सूक्तं द्व्यर्चं पछः शस्यं। आवां राजानाविति सूक्तं पंचर्चं पछः
शस्यं। तत्राहूयोन्नमापरिदध्यात्। उक्थं वाचीन्द्राय देवेभ्य इति शस्त्वा जपः। इन्द्रावरुणा मधुमत्तम
स्येति याज्या। उक्थेनुवषट्कारः। स्वेन प्रातःसवनिकेननुत्योमस्य विधिः॥ ॥अथ ब्राह्मणाच्छंसी
शस्त्रं अभिहिंकृत्य। अध्वर्यो शोशोंसावो३ वयमुत्वामपूर्व्य इति प्रगाथः। स्तोत्रियः। शोंसावो३ अयोन
इद्रमिदं पुरेति प्रगाथोनुरूपः। एतौ प्रगाथौ ककुबुत्तराकारौ शस्यौ। तृतीयपंचमौ पादौ पुनर

म०टी०६ ध्यासित्वोत्तरयोः पादयोरवसाने क्रियमाणोः सर्वाः ककुभो भवंति। शोंसावों३ प्रमंहिष्ठायेति सूक्तं षड्चं
१३२ पच्छःशस्यं॥ उदप्रुत इति द्वादशर्चं सूक्तं पच्छः। अच्छा म इन्द्रमिति सूक्तं एकादशर्चं पच्छः। अस्य सूक्त
स्योत्तमामाहूय परिदध्यात्। उक्थं वाचीन्द्राय देवेभ्य इति शस्त्वा जपः। बृहस्पते युवमिन्द्रश्च वस्व इ
ति याज्या। उक्तो वषट्कारः॥ ॥प्रातःसवनिकेनमस्त्रविधिः॥ ॥अथाच्छावाकस्य। अभिहिंकृत्याध्व
132 र्यो शो शोंसावो३ मधा हीन्द्र गिर्वण इति स्तोत्रियस्तृचो ऽर्धर्चशः। शोंसावो मिपंत इन्द्र गिर्वण इत्यनुरू
पो ऽर्धर्चशः। शोंसावो३ म तुजे नित्री। तिसूक्तं त्रयोदशर्चं पच्छः। नूमर्त इति सूक्तं सप्तर्चं पच्छः। भवा मित्र
इति सूक्तं पञ्चर्चं पच्छः। संवां कर्मणेति सूक्तमष्टर्चं पच्छः। अस्योत्तमामाहूय परिदध्यात्। उक्थं वाचीन्द्रा
य देवेभ्य इति शस्त्वा जपः। इन्द्राविष्णू मदपती मदानामिति याज्या॥ स्वेन प्रातःसवनिकेनमस्त्रविधिः। रम०
ततो मगातीर्थसर्पणं। ततो नुयाजादि सूक्तवाकप्रैषे। अग्निमद्येत्यादि० गृहानागनय आज्यं गृहाणो। १३२

मायाऽऽज्यंव धन्नग्नय इन्द्राग्निभ्यां छागोसुत्वंनिन्द्राय सोमं॰ देवो वनस्पति॰ दग्नय आज्येन सोमायाज्येना
ग्नय इंद्राग्निभ्यां छागाभ्यामिन्द्राय सोमेन हरिभ्यां धानाभिरघत्तंमे दस्तः प्रतिपचताग्रभी ष्टामवीवृधे
तां पुरोळाशैरपादिन्द्र इत्यादि। देवताश्चैवेकपशुका इति वचनात्। शंयुवाकादियज्ञपुछं समाने॥ ॥
उक्थ्यसंज्ञोग्निष्टोमः। अपषोळशीसोग्निष्टोमेन व्याख्यातः। विशेषो वक्ष्यते। तत्र सवनीयाः त्रयः पशवः
आग्नेय ऐन्द्राग्न इन्द्रश्चेति। तत्र द्वौ छागौ। तृतीयो मेषः। ऐन्द्रो वृष्णिः षोळशिनि तृतीय इति वचनात्।
आवाहने वैकल्पिकावाज्यभागावावाह्य। अग्निमा३वह। इन्द्राग्नी आ३वह। इन्द्रमा३वह। वनस्पति
मा३वह। इन्द्रं वसुमंतमावहेत्यादि। अधिगुप्रैषः सौत्रामण्यां बहुवचनेनैव ऊहः कर्त्तव्यः। आग्नेयेन्द्रा
ग्नस्य याज्यानुवाक्याप्रैषाः पूर्वमेवोक्ताः। ऐन्द्रस्य वपायाः इन्द्रं नरो नेमधिते त्यनुवाक्या॥ इन्द्रं मेषस्य
वपाया मेदसो जुषतामिति प्रैषः। उरुं नो लोकमनुनेषि विद्वानिति याज्या। पुरोळाशस्याय इन्द्र शुष्म

म०टी०६ इत्यनुवाक्या। इन्द्रं पुरो व्याघ्रस्येति प्रैषः। प्र ससाहिष इति याज्या। हविषः। इन्द्रो राजा जगत इति अनुवा

१३३ क्या। इन्द्रं मेषस्य हविषः आददद्घ०। घसं नूनं० करत एवेन्द्रो जुषतामिति प्रैषः। स्वस्तये वाजिभिश्चेति या

ज्या। वनस्पतियागः।। होता० द्वनस्पति० यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्या० यत्राग्नेः छाग

133 स्य हविषः० यत्रेन्द्राग्न्योः छागस्य हविषः० यत्रेन्द्रस्य मेषस्य हविषः० यत्र वनस्पतेः प्रिया पाथांसि यत्र दे

वा० तत्रैतान्प्रस्तुत्ये०रभीयस इव कृत्वी करेत्यादि। स्विष्टकृते अयाडग्निरग्नेराज्यस्य हविष इति विशेषः।

इत्यादि। यद्यध्वर्यव ऐन्द्रमेव कुर्वंति। तदा तदनुसारेण प्रयोगः कर्तव्यः। अन्यन्सर्वं मग्निष्टोमवत्।

आग्निमारुतानंतरं त्रीण्युक्थ्यशस्त्राणि। ततो होता षोळशी संज्ञकं शस्त्रं शंसेत्। षोळशी द्विविधा।

अविहृतो विहृतश्च। तत्र यद्दिसामगानां नानदं षोळशिनं साम तदा अविहृतः षोळशि शंसितव्यः। यदा गौरिवी ए.म०

तं षोळशिसाम भवति तदा विहृतः षोळशिशंसितव्य इति ब्राह्मणे। तद्यदि नानदं कुर्युरित्यादिना विहिता सुस्तुव १३३

तेः। अथाविहृतस्य कृप्तिरुच्यते। अस्मिंश्शस्त्रे त्रय आहावाः स्तोत्रियायां निविदि परिधानीयायामिति। केचित्तु वि
हृत एव षोडशी आहावो नाविहृत इत्याचक्षते। तेषां मते विहृतः पञ्चाहावो भवंति। स्तोत्रियानुरूपाभ्यां
तदनंतरं निविदि परिधानीयायामित्याहावस्थानानि॥ ॥अभिहिंकृत्याध्वर्यो शोंसावोमित्याहूय। असावि
सोम इन्द्र ते इति स्तोत्रियोऽर्द्धर्चशः। पंचाहावपक्षे शोंसावो३ मिममिंद्र सुतं पिबेत्यनुरूपस्तच्चोर्द्धर्चशः। उपो
षु शृणुही गिर इत्येकापङ्क्तिः। सुसंदृशं त्वामिति द्वे एव पाङ्क्तस्तचः। पङ्क्तिशस्यः पङ्क्तिबुद्धिरेव स्येताद्वयोर्द्वयोः
पादयोरुन्नमे प्रणयात्प्रायदिन्द्र त्वं नाज्य इत्यौष्णिहस्तच्चोर्द्धर्चशः। अयं ते अस्तु हर्यत इति बार्हतस्तच्चो
र्द्धर्चशः। आ धूर्ष्वस्मा इति द्विपदा सकृपादद्वयं पच्छः। ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप् पच्छः। एष ब्र
ह्माय ऋत्विय इति तिस्रो द्विपदाः पच्छः। प्र ते महे विदथे शंसिषं हरी इति जागतस्तचः पच्छः। त्रिकद्रुकेषु म
हिषो यवाशिरमिति तचः पच्छः। तत्र प्रथमा अष्टिर्द्वितीयतृतीये उष्णिक्कृत्यौ। प्रो ष्वस्मै पुरोरथमिति

म॰टी॰६ ष्णाक्षरत्वेऽनुष्टुप् गायत्रीकारः शस्यः। चतुर्भिः पादैः प्रथमां त्रिभिरुत्तमामित्यर्थः। तेनैताः तिस्रः षड्वं
१३४ ति। प्रचेतने त्वनुष्टुब्वदर्द्धर्चशः शस्यो। प्रप्रवस्त्रिष्टुभमिषमर्चत प्राचेतायोऽन्तीं रफ्कायदिति त्रयस्त्वा च त्र
नुष्टुभा अर्द्धर्चशः। उत्तमे त्वविद्वेशास्त्वा हृय अस्य मदे जरित इन्द्रोतो निविदं शस्त्वा हृयो घ इ अस्य विष्टपमि
न्द्रोतां परिदध्यात्। इयं चार्द्धर्चशः। उक्थं वाचीन्द्राय देवेभ्य इति शस्त्वा जपः। एवा स्वेवैवाहीन्द्रं एवाहि शक्रो व
शीहि धक्र इति जपित्वा संप्रेषितः। आपाः पूर्वेषां हरिवः सुतानामिति यजति। उक्तोऽनुवषट्कारः। विस्हते
म क्षविधिर्वक्ष्यते। अथ विस्हतषोडशिनः पाठः प्रदर्श्यते॥ ॥अभि हिं हृत्स त्र ध्वर्यो शोंसा वोमित्याहृय॥
इं द्रजुषस्व प्रवहा याहि शूर हरी इह। पिबा सुतस्य मतिर्न मध्वश्चकमानश्चारुर्मदायोरमिन्द्र जठरंनव्यंनपृणस्वम कारश्या
धोर्दिंवो न॥ अस्य सुतस्य स्वर्णोप त्वा मदाः सुवाचो अस्थोरमिन्द्र सुरपाणिमत्रो न जघान वृत्रं यतिर्न। बिभे सम॰
द वलं भृगुर्न ससाहे शत्रून्मदे सोमस्योरत्रुधी हवं नइन्द्रो न गिरो जुषस्व वज्रीना। इन्द्र सयुग्भिर्द्दिघुंनम॰ १३४

त्वामद्ययमहेरणायो३ मात्वाविशंतुकविर्नसुतासइन्द्र त्वष्टानापणस्वकुक्षीसोमोनाविद्धिशूरधि
या हियानो३ साधुर्नगृध्नुर्स्तेभुर्नोस्तेवञ्शूरस्थमसोनयातेवभीमोविष्णुर्नत्वेषः समस्तुक्रतुर्नो३मात्वाव
हंतुहरयउपोषुष्वपत्तुहर्मिगिरःपवृषणंसोमपीतयेमघवन्मातथाइवो३मिन्द्रत्वासूरचक्षसोयदानःस्तनता
वतः।करआरप्र्येयासइद्योजान्विंद्रुतेहरी३मिमाधानाघृतस्नुवःसुसंदृशंतावयो।हरीइहोपवक्षतोम
घवन्त्वंदिषीमहो३मिन्द्रंसुखतमेरथेप्रत्नूनंपूर्णवंधुरःस्तुतोयाहिवशांअनुयोजान्विद्रुतेहरी३मिन्द्रंआ
तर्हिंवामहेसघातेष्टषपारपा।इन्द्रंप्रयत्यध्वरेषितिष्ठातिगोविदो३मिन्द्रंसोमस्यपीतयेयःपात्रंहा
रियोजनं।पूर्णमिन्द्रचिकेततियोजान्विंद्रुतेहरी३यदिन्द्रपतनाङ्येयेतेअस्तुहर्यतः।देवास्त्वाद
धिरेपुरःसोमस्त्राहरिभिःसुतो३मादितेहनुषाणइन्द्रहरिभिर्नआगहिपिताहरीववक्षतुराति
ष्ठहरितंरथी३यदावृत्रंनदीष्टतंहर्यन्तुषसमर्चयः।शावसावजिन्नवधीःसूर्यंहर्यनरोचयो३

न्या·प॰ मादिन्ते हविर्द्धांश्रिकिलानूहर्यश्ववर्द्धसे । यत्ता हरी ववक्षतुरिन्द्रविश्वा अभिश्रियों २ स्यदाने विपन्युसे जुष्मा
१३५ —भिन्द्रो हरिधायसं । त्रीणि पदा विचक्रमे पद्यपि वो हरिवर्पसो २ मादिन्ते हाधारयद्धरितो भूरि भोजनं । यं
ता हरी ववक्षतुर्ययो रन्त हरिस्त्वरो २ माधूर्वे सैम ब्रह्मन्वीर ब्रह्म कृतिं जुषाणः । दधाता श्वान वीचीनो हरिभि
र्याहि तूयो २ भिन्द्रो नव ज्ञास्मिंनू षु स्तवनेमा द्यस्वाहि रण्य बाहु रूप ब्रह्माणि श्रृणव इमानो २ मे षब्रह्मा
135
प्र ते महे विदथे शंसिषं हरी । प्र ते वन्वे वनुषो हर्यतं मदो २ मिन्द्रो नाम घृतं न यो हरिभिश्चारु
सेचते । आ त्वा विशंतु हरिवर्पसं गिरो २ विस्तुतयो हरिं हि योनिमभि ये समस्वरन् । यथा पयो हि
न्वतो हरी दिव्यं यथा सदो २ मिं इत्वधायं पृणंति हरिभिर्न धेनव । नूतिरततय इन्द्राय शूषं हरिवंतमर्चतो २
न्तामिष्टवसो अस्य वज्रो हरितो य आयसः । वसस्यते हरिर्निकामो हरिरा गभस्त्यों २ यंतिगिरो द्युम्नीसु राम
शिप्रो हरिमन्युसायक । न संयत इन्द्रे नि रूपा हरिता मिमिक्षिरे २ त्रिकद्रुकेषु महिषो यवाशिरं तुवि १३५

शुष्मः॥ तत्प सोममपिबद्विष्णुनासुतं यथावशं॥२॥ स ईं ममाद महि कर्म कर्तवे महामुरुं। सेनं सश्चद्देवो देवं सत्य

मिन्दुं सत्य इन्द्रः॥३॥ अधाक्षिणीमां अभ्योजसा कृविं युधाभवत्। आ रोदसी अपृणदस्य मज्मना प्रवावृधे॥३॥

धत्तान्यं जठरे प्रेमरिच्यत प्रचेतन। सेनं सश्चद्देवो देवं सत्यमिन्दुं सत्य इन्द्रः॥३॥ साकं जातः क्रतुना साकमोजसा

ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः॥२॥ दाता राध स्तुवते काम्यं वसु प्रचेतय। सेनं सश्चद्देवो देवं सत्य

मिन्दुं सत्य इन्द्रः॥३॥ प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीके चिदु लोककृत्संगे समत्सु वृत्रहा॥३॥ अस्माकं

बोधि चोदिता याहि पिब मत्स्व॥ नभन्तामन्यकेषां ज्याका अधि धन्वसो॥३॥ त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिं। अ

शत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं। तं त्वा परि षजामहे क्रतुघं दस्रतं वृहता। नभन्तामन्यकेषां ज्याका अ+२॥

धि धन्वसो॥२॥ वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः। अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति॥ नो॥३॥ या ते रातिर्ददि

र्वसु सुम्न आ धेहि नो वसो। नभन्तामन्यकेषां ज्याका अधि धन्वसो॥३॥ प्र प्र वस्त्रिष्टुभमिषमिति स्तो द्वे चैकाः॥ ॥

अर्चलग्नार्चेतितिस्रोर्द्धर्चराः ॥ १

मं॰ ८।०६ ४ यो व्यतीँर फाणयद्विति तिस्रोर्द्धर्चराः ॥ मिनक्तनीन ओदनं पच्यमानं परो गिरेः ॥ २ ॥ झेंसावो ३ म अस्य मदे जरितरि
१३६ न्द्रः सोमस्य मत्सत् । अस्य मदे जरितरिन्द्रो हिमहन्नू ॥ अस्य मदे जरितरिन्द्रो वृत्रमहन् । अस्य मदे जरितरि
न्द्रो पां वेगमैरयत् । अस्य मदे जरितरिन्द्रो जिन्वद्दनु वो पिन्वद्पितः । अस्य मदे जरितरिन्द्र उदार्यं वर्णमतिर
द्व दासीद्विशो अस्तभ्नात् । अस्य मदे जरितरिन्द्र उ द्यामस्तभ्नाद प्रथयत्पृथिवीं । अस्य मदे जरितरिन्द्रो द्वि
136 सर्थमैरयद्यं तरिक्षमतिरत् । अस्य मदे जरितरिन्द्रः समुद्रं मकुपितमरम्णात् । अस्य मदे जरितरिन्द्र इश्यं
इव पं फणतः पर्वतान्प्रकुपितां अरम्णात् । अस्य मदे जरितरिन्द्र इदन्स्य वदिद्व सोमस्य मत्सत् । प्रेमो देवो दे
व हूतिं श्रव द्रूलाण्या व साग मो ३ मर्भको न कुमारकः इत्येका अर्द्धर्चशः ॥ झेंसावो ३ मु घ द्रू भस्य विष्टपमि स्वेषा
पं रिधानीया ॥ इयं चार्द्धर्चशः ॥ उक्थं वाचीन्द्राय देवेभ्य इति चास्त्वाजपः ॥ एवा त्वे वापाः पूर्वेषां हरिवः सुतानामेवा पम॰
हीन्द्रं अथो इदं सवनं केवलं त इति याज्या ॥ उक्तो नु वषट्कारः ॥ अत्र केचिदेवा त्वे वै वेत्यादेर्ज प शा द्वा च्च स्यो १३६

पांशुत्वमिच्छंति। तदप्युक्तं। तथासति महानाम्न्युपसर्गाणामृक्पदानां च संततिर्न स्यात्। प्राणसंतति श्चाप्युक्तास्त

त्वे संततपाठदर्शनान्। तस्मादेकस्वरत्वमेव। ननु तर्हि जपावप्युपांशु किं न स्यादिति चेत् न॥ अनेकास्वरबा

धप्रसंगात्। तस्माज्जपस्तादित्सायाज्याउच्चैस्तूष्णीमेवप्युक्तं। तथाहुतं षोळशिपात्रं समुपहूवं भक्षयंति। घर्मे च

भक्षिणो मैत्रावरुणस्त्वयप्रच्छंदोगाः प्रथमं होता भक्षयति। स्वव्यतिरिक्ता न्भक्षिण उपहूय इन्द्र षोळशिनो ऽज्

क्षिमिति मंत्रेण। भक्षयामीति मंत्रांतः। मैत्रावरुणोप्यनेन मंत्रेण भक्षयति। स्वव्यतिरिक्तान्भक्षिण उपहूयाऽइ

तरेतु स्वशाखोक्तविधिना भक्षयंति। अस्य प्रतिगरे विशेषः। आत्वावहं तु हर्य इत्यास्थ्यप्रप्रवस्त्रिष्टुभमित्ये

तदंतं अवसाने प्रणवे च यथाक्रमं ॐ थामोदैवमदोमदामोदैवोमथा। इति प्रतिगरौ भवतः। अन्यत्समानं।

ततो मरुत्वतीर्यस ... र्पणं॥ ततोऽनुयाजादि॥ सूक्तवाकप्रैषे। अग्निमद्य होतारमवृणीथ। अहनन्नग्ने आज्येन।

इन्द्रो मायाज्येन वर्धमानग्ने यइन्द्राग्निभ्यां छागो वधनिन्द्राय मेषं सुन्वंतं निन्द्राय सोमं मरुज्जन् हरिभ्यां धानाः स्तप

मं॰दा॰६ स्यात्। अथ देवो वनस्पतिरभवदग्नयेऽत्स्याज्येन सोमायाज्येनाग्नय इन्द्राग्निभ्यां छागाभ्यामिन्द्राय मेषेणेन्द्राय सो
१३७ मेन हरिभ्यां धानाभिरघत्तं मेदस्तः प्रतिपचताग्रभीदुरवीवृधंत पुरोळाशैरपादिन्द्रः सोमं गवाशिरं यवाशि
रं॰ सक्तुवाकाय सूक्ता ब्रूहि॥ ततो यज्ञपुच्छादि समानं। संतिष्ठते षोडशी संस्थो ज्योतिष्टोमः॥ श्रीगणेशाय नमः॥
ग्निष्टोम अथ वाजपेयस्य प्रयोग उच्यते। सर्वमेवं तत्। केचिदग्नीषोमीयेण पशुपुरोडाशेन देवसूनां हविषामन्वाय
तनं कुर्वंति। तस्मिन्पक्षे तत्पैव प्रचरितव्यं। अनुयाजप्रभृति हिरण्यमालिन ऋत्विजः। होतुः स्रगेवं विधा भ
137 वति। हिरण्मयशतपुष्करैः कृता वज्राकिंजल्काश्च। उपाकरणकाले। आग्नेयादीन्पशूनुपाकृत्य मारुतीं
गो वशामुपाकरोति सप्तदश प्राजापत्यान्। अथ सारस्वतीं मेषीं च। एवं द्वाविंशतिरेवमुपाकरणं इति केचित्।
अपरे अन्यथा कुर्वंति। आग्नेयादीन्पशूनुपाकृत्य मारुतीं सारस्वतीं सारस्वतं प्राजापत्यान्। परिव्ययण एम॰
मेदः। परिव्ययणमेषां तूपवासुवासा इत्यावर्तनं इति केचित्। अपरे रशना परिव्ययणे प्रैषं तंत्रमिच्छंति। १३७

तस्मिन्यज्ञे स हृदेवा। अध्वर्युवशान्निर्णयः। सप्तदश सामिधेन्यः। आवह देवान्सुन्वते यं० आवाहनका
ले। आज्यभागावा वात्स्या। अग्निमा३वह। इन्द्राग्नी आ३वह। इन्द्रामा३वह। मरुत आ३वह। सरस्वतीमा३व
ह। स[illegible]रस्वंतमा३वह। प्रजापतिं आ३वह। वनस्पतिमा३वह। इन्द्रं वसुमंतं इत्यादि[illegible]। एषां पशूनां पर्यग्निस्तो
के तं त्रौ प्रकृतौ समर्थ निगमाः सर्वे यथार्थ मूह्याः। अध्रिगौ ऊह्यानि पदानि वक्ष्यामः। आशासाना मेधपति
भ्यो मेधान्। प्रैभ्यो ग्निं भरत स्तृणीत बर्हिः। अन्वेनान्माता० उदीचीनामेषां पदो निधत्तात्। पृथिवीं शरीराणि। एक
धैकधैषां त्वचमाच्छ्यता[illegible] पुरा नाभ्या अपिशसो वपा उत्खिदता दंतरे वोष्माणं वारयध्वात्। श्येनमेषां वक्षां
सि कृणुतात् प्रशसा बाहूः शला दोषाणि कश्यपेवांसा न छिद्राः श्रोणीः कवषोरून् स्रेकपर्णा ष्ठीवंतः षड्विंशतिः
अ षड्विंशतिरेषां वंक्रयस्तां[illegible] अनुष्ठ्योच्यावयतात्। एषामनूनं कृणुतात्। वनिष्ठूनेषां मा राविष्ट उरूकं० इत्यादि
समानं॥ ॥अग्नेर्वपाप्रचारः। अग्नेन येस्यनुवाक्या। होता यक्षदग्निं छागस्य वपाया इति प्रैषः। प्रवः शुक्राये

मं०टी०६ ति याज्या। ऐंद्राग्नस्य। आ वृत्रहणा। होता यक्षदिंद्राग्नी छागस्य वपाया इति प्रेषः। शुचिं नु स्तोममिति याज्या।
१३८ इंद्रस्य। इन्द्रं नरो नेमधिता। होता यक्षदिन्द्रं वृष्णो वपाया मेदस इति प्रेषः। उरुं नो लोकमिति याज्या। अथ मरु
तः। शुची वो हव्या मरुत इत्यनुवाक्या। होता यक्षन्मरुत उस्राया वपाया मेदसो जुषंतां इति प्रेषः। प्र चित्रमर्कं गृ
णत इति याज्या। अथ सरस्वत्याः। एका चेतत्सरस्वती। होता यक्षत्सरस्वतीं मेष्या वपाया इति प्रेषः। प्र क्षोदसा
138 धायसा सस्र एषेति याज्या। अथ सरस्वतः। जनीयंतो न्वग्रव इत्यनुवाक्या। होता यक्षत्सरस्वंतं मेषस्य वपाया
इति प्रेषः। दिव्यं सुपर्णमिति याज्या। अथ प्राजापत्यानां। तंत्रेण यागः॥ हिरण्यगर्भः समवर्त्तताग्र इत्यनुवा
क्या। होता यक्षत्प्रजापतिं छागानां वपानां जुषंतामिति प्रेषः। यस्येमे हिमवंत इति याज्या। प्रजापतिश्चाब्दप्र
योगे मंत्रे चोपांशुत्वं। आगूः प्रणववषट्कारप्रैषादीनामुच्चैष्ट्वं। आदद्वसत्करज्जुषतामघदस्म मीढ्वी द्व धते सेते स्म०
षामुपांशुत्वं चात्वाले मार्जयित्वेत्यादि। अथाज्यशस्त्रे विशेषः। प्र वो देवायाग्नय इत्येतस्य स्थाने अग्निं नर १३९

इति सूक्तं पंचविंशकं शंसेत्। अर्द्धर्चशः प्राकृती याज्या। सर्वत्र विकृतिष्वपि शस्त्रयाज्याः प्राकृता एव भवंति।
एतच्च वैश्वदेवशस्त्रब्राह्मणेभिहितं। मूलं वा एतद्यज्ञस्य यद्धाय्याश्चैत्येवमादिना। तस्मात्ताः समान्य एव स्युरि
त्येवमंतेन। प्राकृतमेव प्रउगं माधुच्छंदसं। अथ होत्रकाणां मैत्रावरुणस्य। ता नः शक्रं पार्थिवस्य ता वां सम्यग
द्रुह्वाणेति स्तोत्रियानुरूपौ। शेषमैकाहिकमेव। अथ ब्राह्मणाच्छंसिनः। सुरूपकृत्नुमूतये ऽयमु ते समतसीति स्तो
त्रियानुरूपौ। शेषमैकाहिकमेव। अच्छावाकस्य। तमीळिष्व यो अर्चिषा। आ सु ते सिंचत श्रियमिति स्तोत्रियानुरू
पौ। शेषमैकाहिकमेव। एतेन चातुर्णां यथासंख्यं स्तोत्रियानुरूपा इति वदंति। अन्यस्मिन्पक्षे मैत्रावरुणाच्छावा
कयोः पूर्वोक्ताः स्तोत्रियानुरूपाः। ब्राह्मणाच्छंसिनस्तु। स्तुष्विं तमं न ऊतय इति तृचोनुरूपो भवतीति वदंति। तद्विवार
णीयं। उभयस्मिन्पक्षेनुरूपाः प्राकृता एवेति सिद्धांतिनो मतिः। माध्यंदिने सवने दधिघर्मेण प्रचर्य आसांपु
रोळाशैश्चरंति। प्रथममग्नेः। अग्ने त्वं पारया नव्यो अस्मानित्यनुवाक्या। होता यक्षदग्निं पुरोळाशस्येति प्रैषः। यथा

म॰ ८।०६ विप्रस्येति याज्या। ऐंद्राग्नस्य। आ भरतमित्यनुवाक्या। होता यक्षदिन्द्राग्नी पुरोडाशस्ये[illegible]
१३९ [illegible] रवीति याज्या। अथ स[illegible]गीर्भिर्विप्र इति याज्या। इ
न्द्रस्याथ इन्द्र शुष्म इत्यनुवाक्या। होता यक्षदिन्द्रं पुरोडाशस्येति प्रैषः। प्रससा॰ ति प्रैषः॰ हिष इति याज्या।
अथ मरुतां। नूष्ठिरं मरुत इत्यनुवाक्या। होता यक्षन्मरुतः पुरोडाशस्य जुषंतामिति प्रैषः। अरा इवेदच
रमा अहेवेति याज्या। अथ सरस्वत्याः। उत स्या नः सरस्वतीत्यनुवाक्या। होता यक्षत्सरस्वतीं पुरोडाशस्ये
ति प्रैषः। पावीरवीति याज्या। अथ सरस्वतः। ये ते सरस्व ऊर्मय इत्यनुवाक्या। होता यक्षत्सरस्वंतं पुरोडाश
स्येति प्रैषः। स वावृधे नर्य इति याज्या। अथ प्राजापत्यानां तंत्रेण यागः उपांशु। य आत्मदा बलदा इत्यनुवा
क्या। होता यक्षत्प्रजापतिं पुरोडाशानां जुषंतामिति प्रैषः। येन द्यौरुग्रेति याज्या॥ सवनीयपुरोडाशादि म॰म॰
मरुत्वतीयप्रगाथांतं शस्त्वा हूयकयाशुभा सवयसः सनीळा इति सूक्तं पंचदशकं। अस्य सूक्तस्य सुग १३९

अनुत्तमाते॰

अन्यत्राप्यतावाहनं दृश्यते तत्स्वत्र मच स्मर्त्तव्यं। संप्रैषपक्षे मैत्रा॰ होताय क्षद्बृहस्प
तिं चरोर्जुषतां हविः॰ स्विष्टकृति॰ होताय क्षदग्निं चरोर्जुषतां॰

अपश्चकरवज्रबाहुरित्येवमंतेनाश्लाहूय इंद्रो मरुत्वानिति निविदं चाश्लाहूय एकस्य चिन्म इत्यादि सूक्तं चो
षं शस्त्वा आहूय न वं मया परिदध्यात्। पच्छः शंसेत्। नित्या याज्या। नाराशंसमस्य पानं तरं बार्हस्पत्येष्टिः। आ
ज्यभागप्रभृतीक्तां तां भवति। अत्र बृहस्पते या देशोन कर्ज्ञ व्यः वार्त्रघ्नो अनुवाक्ये भवतः। प्रधानस्विष्टकृ
तः बृहस्पतिः प्रथममित्यादि सूत्रपठितप्रकारेणैव बार्हस्पत्येष्टिः। केचिदेतामिष्टिं न कुर्वंति। अथ निष्केवल्य
शंसनं। अभित्वा शूर नोनुम इति धाय्यां तेनाश्लाहूय त्वामिद्धि हवामह इति द्वृचः बृहतो योनिमर्द्धर्चे शः शस्त्वा
हूय पिबा सुतस्येति सामप्रगाथं स्त्वाहूय तदिदास भुवनेषु ज्येष्ठमिति सूक्तं नववर्चं पच्छः शंसेत्। पंच नाश्लानिवि
त्। आहूयोनं मया परिदध्यात्। मैत्रावरुणशस्त्र मैकाहिकमेव। अस्य शस्त्रस्यांते सारस्वतपुरोडाशप्रचारः
येते सरस्व इत्यनुवाक्या। होताय क्षत्सरस्वतं पुरोडाशस्येति प्रैषः। सवावृध इति याज्या। प्रजापतेः पुरोडाशस्था
ने बार्हस्पत्यं चरुं निर्वपंत ध्वर्यवः। बृहस्पतिः प्रथमं जायमानो बृहस्पतिः समजयद्वसूनीति याज्यानुवाक्ये। इ

एवा महान्बृह॰

इहस्तुष्टेः अभि प्र वः सुराधसं प्र सुश्रुतं सुराधसमिति प्रगाथौ स्तोत्रियानुरूपौ

मं॰ टी॰ ६ छागमग्ने होता यक्षदग्निं पुरोळाशानामिति प्रैषः स्वदस्व हव्येति याज्या। एवं केचित्कुर्वंति। आग्नेयादीनां
१४० सारस्वतपर्यंतानां स्विष्टकृतं कृत्वा उन्नीयमानसूक्तानि कुर्युः केचित्सौविष्टकृतीनां पाशुकानां च कृत्वा प्र
धानगुणत्वाद्वपोरोळशिका एव कर्तव्याः अथ सारस्वतबार्हस्पत्यसौविष्टकृतीनां ऊर्ध्वं हविषां प्रचारः सू
140 त्रकारपठितसंयाज्ये। कृष्णकाले प्रयोगपक्षे। ब्राह्मणाछंस्यछावाकस्तोत्रे ऐकाहिके। अस्मिन्सवने आ
ज्जिधावनादि वैशेषिकधर्मा उक्ताः अध्वर्युभिः अथ तृतीयसवनं। आदित्यग्रहादिपशुकालेतं त्रेऽध्वर्युव
शान्निर्णयः मनोतां प्रति पशुश्रावर्तयेत् नवा। अथाग्नेयस्य। पाहि नो अग्न इत्यनुवाक्या। होता यक्षदग्निं छा
गस्य हविष आददघेति। घसं नूनं करद्देवाग्निर्जुषतामिति प्रैषः। प्रकारव इति याज्या। अथैंद्राग्न्योः उभा
वामिंद्राग्नी इत्यनुवाक्या। होता यक्षदिन्द्राग्नी छागस्य हविष आत्तामद्य मध्यतो घस्तां नूनं करत एवेन्द्रा राम॰
ग्नी जुषेतामिति प्रैषः प्रचर्षणिभ्यः पृतनाहवेष्विति याज्या। अथैंद्रस्य। इन्द्र एजा जगत इत्यनुवाक्या। होता १४०

यक्षदिन्द्रं वृष्णो हविष आदद घेति। घसंनूनं॰ करदेवेन्द्रो जुषतामिति प्रेषः। स्वस्तये वाजिभिश्चेति याज्या। अथम
रुतां। आवो होता जोहवीति सत्त इत्यनुवाक्या। होता यक्षन्मरुत उस्राया हविष आदन्न घ॰। घसन्नूनं। करन्नेवमरु
तो जुषंतामिति प्रेषः। या वः शर्म शशमानाय संतीति याज्या। अथ सरस्वत्याः सरस्वत्यभिनो नेषीत्यनुवाक्या। हो
ता यक्षत्सरस्वतीमेष्या हविष आदद घेति॰ घसंनूनं॰ करदेव सरस्वती जुषतामिति प्रेषः। यस्ते स्तन इति याज्या।
अथ सरस्वतः। पीपिवांसं सरस्वत इत्यनुवाक्या। होता यक्षत्सरस्वंतं मेषस्य हविष आदद घेति। घसंनूनं॰ करदे
व सरस्वान् जुषतामिति प्रेषः। यस्य व्रतं पशव इति याज्या। अथ प्रजापतेः। स स दशा हविषां तं त्रेण्या गः। यः प्रा
णतो निमिषत इत्यनुवाक्या। होता यक्षत्प्रजापतिं छागानां हविष आदद घेति। घसंनूनं॰ करदेव प्रजापतिर्जुषता
मिति प्रेषः। यं क्रंदसी इति याज्या। आगूर्वषट्कारप्रेषवर्जं सर्वं यथोक्तं पशुषु। अथ वनस्पतियागः। देवेभ्यो वनस्प
ते॰। होता यक्षद्वनस्पतिमिति त्यादि यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः॰ नियत्राग्नेः छागस्य

मं॰ टी॰ ६ हविषःप्रियाधामानियत्रेन्द्राग्न्योः छागस्य हविषःप्रियाधामानियत्रेंद्रस्य वृष्णो हविषःप्रि॰ नियत्र मरु
१४१ तामुस्राया हविषःप्रि॰ नियत्र सरस्वत्या मेष्या हविषःप्रि॰ नियत्र सरस्वतो मेषस्य हविषःप्रि॰ नियत्र प्रजा
पतेः छागानां हविषःप्रियाधामानियत्र वनस्पतेःप्रियापाथांसियत्र देवानामित्यादि॰ तत्रैतान् प्रस्तु
141 त्य॰ इन्द्रमीपस्य हव्यकृत्तीकरदेवं देव इत्यादिः। स्विष्टकृत्येषः होता यक्ष॰ मयाव्यग्निरग्नेराज्यस्य हविषःप्रि
याधामान्ययाट् सोमस्याज्यस्य हविषःप्रियाधामान्ययाड् अग्नेः छागस्य हविषःप्रियाधामान्ययाडिंद्राग्न्योः
छागस्य हविषःप्रि॰ न्ययाडिंद्रस्य सर्वं वृष्णो हविषःप्रि॰ न्ययाण्मरुतामुस्राया हविषःप्रि॰ न्ययाट् सरस्वत्या मे
ष्या हविषःप्रि॰ न्ययाट् सरस्वतो मेषस्य हविषःप्रि॰ न्ययाट् प्रजापतेः छागानां हविषःप्रि॰ न्ययाड् वनस्पतेः
प्रियापाथांस्ययाट् देवानामित्यादिः। पश्चिव्योपाल्हानादिः। वैश्वदेवत्वात्स्नेप्रतिपदनुचरौ त्वास्तत्वा हूयत देवुस्ये राम॰
ति सूक्तं सप्तर्चं निविद्धानीयं पच्छः एकां त्रिः द्वानि वितृ। उपांशु आहूय एकया चेति धाय्या आहूय घृतेन द्यावा १४१

पृथिवी अभी वृतेति तच्चं द्यावापृथिवीनि विज्ञानीयं पृच्छः। एकां शिष्टा निवित्। सुरूपकृत्नुमूतय इति धाय्या। आ
हूय अग्नेश्योजात इत्यार्भवं निविज्ञानीयं नवर्चं पृच्छः। अस्यं एकां शिष्टा निवित्। अयं वेन श्चोदयत् पृश्निगर्भा इति
श्लो धाय्याः॥ परावतो ये दिधिषन्त आप्यमिति सप्तदशार्चं वैश्वदेवं निविज्ञानीयं सूक्तं पृच्छः। अस्यं एकां शिष्टा नि
वित्। अदितिर्द्यौरदितिरन्तरिक्षमिति परिधानीया। सर्वत्र वैश्वदेव इति वचनात्। अथाग्निमारुते। वैश्वानराय
धिषणामिति सूक्तं पंचदशार्चं वैश्वानरीयं निविज्ञानं पृच्छः। अस्यमेकां शिष्टा निवित्। शं नः करतीति धाय्या
। धाय्या एवा मरुत इति मारुतं पंचदशार्चं सूक्तं पृच्छः। एकां शिष्टा निवित्। त्वं नश्चित्र ऊत्या वसो विवस्व उषस इति
स्तोत्रियानुरूपौ कुर्वन्नेकारं शास्त्वा आहूय यज्ञायज्ञा वो अग्नये आहूय देवो वो द्रविणोदा इति प्रगाथावर्धर्च
शः शंसेत्। यज्ञायज्ञीयस्य त्वक्रियमाणस्यापि सानुरूपं योनिं व्याहावं शंसेत्। त्वमग्ने प्रथमो अंगिरा इत्यष्टाद
शार्चं सूक्तं जातवेदस्यं पृच्छः। एकां शिष्टा निवित्। आपो हि ष्ठेत्यादि समानं। उक्थ्ये तु मैत्रावरुणब्राह्मणाच्छंसिनो

मं॰ २१०६ प्राकृते एव। अथाछावाकस्य। गायंति त्वा गायत्रिण आत्वा गिरे रथीरिवेति स्तोत्रियानुरूपौ। ऋतुर्जनित्री इ
१४२ त्यादि। अथ यदि न षोडशी। अथातिरिक्तोक्थशस्त्रं। प्रतत्ते अद्य शिपिविष्टनाम प्रतद्विष्णुस्तवते वीर्येणे
ति स्तोत्रियानुरूपौ सूत्रकारेणोक्तौ तथापि छंदोगानुसारेण वक्तव्यं। अभिहिंकृत्य किमित्ते विष्णो परिचक्ष्यं
ध भूत् प्रतत्ते अद्य शिपिविष्टनाम वषट्ते विष्णवास आ कृणोमि एतास्ति स्तोत्रियः। ओं३ सावों प्रतद्विष्णु
142 स्तवते वीर्येणेत्यनुरूपत्वेः। आहूय त्वजज्ञानमित्येका पच्छः। यत्ते दिक्षु प्रराध्यमित्येका अर्द्धर्चशः। ता
मिच्छ वससस्पते इत्येकार्द्धर्चशः। तं प्रत्नथेति द्वादशकं पच्छः। आहूय हंसः शुचिषदित्येतां पच्छोऽर्द्धर्च
शस्त्रिपदा चतुर्थमनवानस्सुकृता प्रणुत्यावस्येन्त्रिपदार्द्धर्चशः पच्छः सप्तविधं दूरेहणा धर्मे पाशा
स्तां सुतं भरो यजमानस्येत्येतां पच्छः। आहूय बृहस्पते युवमिन्द्रश्च वस्व इति परिधानीया पच्छः। उक्थं रा॰म॰
वाचीति आहूय जपः। विभ्राड् बृहत्पिबतु सोम्यं मध्विति याज्या॥ ॥ अनूयाजादि सूक्तवाकप्रैषे विशेषो १४२

षः। अग्निमद्येत्यादि पुरोक्ता ज्ञान् गृहं नेनग्नय आज्यं गृह्णं सोमायाज्यं बध्नन्नग्नये छागं बध्नन्निंद्राग्निभ्यां छा
गं बध्नन्निंद्राय वृष्णिं बध्नन्मरुद्भ्य उस्रां बध्नन्सरस्वत्यै मेषीं बध्नंत्सरस्वते मेषं बध्नन्प्रजापतये छागांस्तु
न्वंनिंद्राय सोमं प्रज्ञान्हरिभ्यां धाना इत्यादि॥ अग्नय आज्येन सोमायाज्येनाग्नये छागेनेन्द्राग्निभ्यां छागेनेन्द्र
य वृष्णिनामरुद्भ्य उस्रयासरस्वत्यै मेष्यासरस्वते मेषेण प्रजापतये छागैरिन्द्राय सोमेन हरिभ्यां धानाभिरथै
नान्मेदसः प्रतिपचताग्नीभ्रुरवीवृधं न्नपुरोक्ता ज्ञोरपादिंदुः सोमं गवाशिरं यवाशिरं तीव्रांते बकुरमध्यमुपोस्या
मद्र श्रोऽद्यमरं आनवसु वीवृधं तां गृषे स्त्वा मघस्य आर्षेय ऋषीणां नपादित्यादि समानमुदवसानीयांतं॥ ॥
समाप्तो वाजपेयः॥ ॥तस्य गवादिदक्षिणा उक्ताः। एवमेको वाजपेय उक्तः। सपरं छंदोगाज्योतिर्वाजपेयोज्योतिष्टो
मस्य संस्कारक इत्यामनंति॥ तस्यैषो वशयं तमविकारेण कृत्वा यातिरिक्तो वश्यं कुर्वंति शेषं प्रकृतिवत्॥ पूर्वोक्तेन स
मानमित्यर्थः। वाजपेयेनेष्ट्वा ब्राह्मणः श्चेदनंतरं स्वारस्यात्ते वसंत एव वा बृहस्पतिसवेन यजेत। राजा चेत् राज

मं॰टी॰६ रूपेण यजेत केचित्त्वत्यवरे हृणीयं नाम सोमयागं अग्निष्टोमसंस्थं कुर्वन्ति। तेन वा यजेत वाजपेयेन वा
१४३ एतत्कर्म शरत्काल एव कर्त्तव्यं॥ ॥समाप्तो वाजपेयः॥ ॥अथातिरात्रस्य प्रयोग उच्यते। अथातिरात्रस्य
प्रयोगः॥ स षोडशिसंस्थेन व्याख्यातः। विशेष उच्यते। चत्वारः सवनीयाः पशवः षोडशशुक्रास्त्रयः सा
143 रस्वतीमेषा चतुर्थी। आवाहने आज्यभागावावाह्य अग्निम् आवह। इन्द्राग्नी आवह। इन्द्रमावह। सरस्व
तीमावह। वनस्पतिमावह। इन्द्रं वसुमन्तं इत्यादि। यदा सारस्वतीमेषामेव कुर्वन्त्यध्वर्यवः। तदा अधि
गवाद्येकवचनेनोहः कर्त्तव्यः। अयं तु विशेषः। स्त्रीपशुत्वात् पशुवाचकानि पदानि स्त्रीवन्निर्दिश्ये
त्। यथा। मेधपतये मेधां। प्रास्या अग्निं भरत। अन्वेनां माता। अस्याः पदः। एकधास्यास्त्वचः। श्येनम
स्या नक्षः। षड्विंशतिरस्या वंक्रयः। अस्या अनूनं। वनिष्ठुमस्या मा राविष्टा इत्यादि। यथापठितमेव वा रा॰म॰
ब्रूयात्। मेधायां विकल्प इत्युक्तत्वात्। अन्यत्सर्वं षोडशिसंस्थावत्। अविस्तृतषोडशी इह वैकल्पिकः क १४३

रणपक्षे षोडशिनाश्चस्त्वामग्नेतीर्थसर्पणं भवति। संस्थितेपि सवने षोडशिनि चातिरात्र इति वचनात्। अ
करणपक्षे तु न भवति। ततः पर्यायसंज्ञानि द्वादशशस्त्राणि भवंति। तत्राद्यानि चत्वारि शस्त्राणि प्रथमपर्यायः।
मध्यमानि चत्वारि शस्त्राणि मध्यमपर्यायः। उत्तमानि चत्वार्युत्तमः पर्यायः। त्रिष्वपि पर्यायेषु होतृशस्त्राण्यु
त्तमानि त्रीणि त्रयाणां होत्रकाणां यथाक्रमेण भवंति। प्रथमे पर्याये होतुराद्याम् चं वर्जयित्वा प्रस्तुतं स्तोत्रियानुरूपे
षु प्रथमानि पदानि द्विरुक्त्वावस्यंति। शिष्टो पादो समस्य प्रणुवंति। तद्यथा। पुरुहूतं पुरुष्टुतं पुरुहूतं पुरुष्टुतं॥ गा
थान्यं सनश्रुतमिन्द्र इति ब्रवीतनो३म्। मध्यमे पर्याये सर्वत्र प्रस्तुतं स्तोत्रियानुरूपेषु मध्यमैः पादैरवसाय पुन
स्तानेव पादानत्याद्यमुत्तमैः पादैः सह समस्य प्रणुवंति। तद्यथा। अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। निपूतो अ
धि बर्हिष्येहीमस्य द्रवा पिबो३म्। उत्तमे पर्याये सर्वत्र प्रस्तुतं स्तोत्रियानुरूपेषु। उत्तमैः पादैरवसाय पुनस्तानेव
पादानत्याद्यमुत्तमैः पादैरवसाय प्रणुवंति। तद्यथा। इदं त्यन्वोजसा सुतं राधानां पते॥ पिबा त्वस्य गिर्वणः। पिबा त्वस्य

मं०टी०६ गिर्वणोमिति। अच्छावाकसूक्तमे पर्याये अंसाभि चतुरक्षरत्येवाभ्यस्य प्रणौति। तस्यापि गायत्रौ चेत्स्तोत्रियानु
१४४ रूपौ भवतस्तद्दापादाभ्यासमेव कुर्यात्। पर्यायेषु शोंसावोमिति शस्त्रादिर्घाहावो भवति। एष आहावः प्रातःस
वने शस्त्रादिषु पर्यायप्रभृतीनां चेति वचनात्। एतानि शस्त्राणि चतुराहावानि भवंति। चतुराहावानि शस्त्रा
155 णि प्रातःसवने तृतीयसवने पर्याये षतिरिक्तेषु चेति वचनात्। स्तोत्रियानुरूपेभ्यः तदनंतरं परिधानीयाया
इत्याहावस्थानानि भवंति। उक्थं वाचि। इति शस्त्रजपः। उर्ध्वं च षोडशिन इति वचनात्। अत्र शंसनप्रकार
निर्दिश्यते। अथ होतुरग्रं शस्त्रं। शोंसावों३ पांतमा वो अंधस इन्द्रमभि प्रगायत। विश्वासाहं शतक्रतुं मंहिष्ठं च
र्षणीनों३त्रिः। पुरुहूतं पुरुष्टुतं पुरुहूतं पुरुष्टुतं। गाथान्यं सनश्रुतमिन्द्र इति ब्रवीतनो३मिन्द्र इन्नो महानामि
न्द्र इन्नो महानां। दाता वाजानां नृतुर्महां अभिज्ञायमों३ शोंसावो३म पाद्धिष्यं धस इत्यनुरूपः। अत्रापि पूर्वव एम०
त् प्रथमपादाभ्यासः। शोंसावों३ त्यमुवः सत्रासाहमिति सूक्तं चोषः। सपृतविंशत्यृचो ईर्चं शः। अभित्वं मेषमि १४४

तिसृक्तं पञ्चदशार्चं पच्छः। उत्तमा परिधानीया। अध्वर्यवो भरतेन्द्राय सोममिति याज्या। उक्तोनुवषट्कारः। सं
वैषां मैत्रावरुणवद्भक्षविधिः। अथ मैत्रावरुणस्य॥ ॥हिं भूर्भुवः स्वरों ३ शोंसावों ३ प्रव इन्द्राय मादनं प्रव इ
न्द्राय मादनं। हर्यश्वाय गायत सखायः सोमपाव्नों ३ ष्टिः। शंसेदुक्थं सुदानवे शंसेदुक्थं सुदानवे। उत द्युक्षं यथान
रः श्वकृमा सत्यराधसें ३ त्वन्न इन्द्र वाजयुस्त्वन्न इन्द्र वाजयुः। त्वं गव्युः शतक्रतो त्वं हिरण्ययुर्वसों ३ शोंसावों ३ प्र
कृतान्यृजीषिणः प्रकृतान्यृजीषिणः। कण्वा इन्द्रस्य गाथया मदे सोमस्य वोचतों ३ यः सबिंदमनर्शनिं यः सबिं
दमनर्शनिं। पिप्रुं दासमहीभुवं वधीदुग्रो रिणं। न पों ३ न्यर्बुदस्य विष्टपं न्यर्बुदस्य विष्टपं। वर्ष्माणं बृहत
स्तिर कृषेतदिन्द्र पौंस्यों ३ शोंसावों ३ प्रतिश्रुताय वो धृषदिति पञ्चदशर्चं सूक्तं अर्धर्चशः। दिवश्चिद्दस्येति चं
सूक्तं अष्टर्चं पच्छः। स नो नव्येभिरित्येका पच्छः। एषा परिधानीया। अस्य मदे पुरुवर्पांसि विद्वानिति याज्या। उ
क्तोनुवषट्कारः। मैत्रावरुणवद्भक्षः॥ ॥अथ ब्राह्मणाच्छंसिनः॥ ॥हिं भूर्भुवः स्वरों ३ शोंसावों ३ वयमुत्वा तदि

मं॰ टी॰ ६ दर्भावयमुत्वानदिदर्भाः॥ इन्द्रात्वायंतः सखायः कएवाउक्थेभिर्जरंतो ३त्रिः॥ नघेमन्यदापपननघेम
१४५ न्यदापपन [illegible] वज्रिंनपसोनविष्टौनवेदुस्तोमंचिकेतो ३मिछंतिदेवाः सुन्वंतमिछंतिदे
वाः सुन्वंतं॥ नस्वप्नायस्पृहयंतियंतिप्रमादमतंद्रें २ त्रोंसावों ३ वयमिन्द्रत्वायवोवयमिन्द्रत्वायवः॥ अभि
145 प्रणोनुमोवृषन्विद्धीत्वस्यनोवसों ३ मानोनिदेचवक्तवेमानोनिदेचवक्तवे॥ अर्योरंधीररावोत्वेअपिक्रतुर्मे
मों ३ त्वंवर्मासिसप्रथस्त्वंवर्मासिसप्रथः॥ पुरोयोधश्चवृत्रहंस्त्वयाप्रतिब्रुवेयुजोंर २ शोंसावों ३ वात्रेहत्वायश्रावस
इतिदशार्चंसूक्तं॥ अर्द्धर्चशः॥ इन्द्रोअंगमहद्भयमितिनितिसः॥ अर्द्धर्चशः॥ नूषुवावमितिएकादशार्चंसूक्तंपच्छः॥
उत्तमापरिधानीया॥ अप्सुधूतस्यहरिवः पिबेतियाज्या॥ उक्तोनुवषट्कारोमैत्रावरुणवद्भसः॥ अपाच्छा
वाकस्य॥ ॥हिंभूर्भुवस्वरों २ शोंसावो ३ मिन्द्रायमदनेसुतमिन्द्रायमदनेसुतं॥ परिष्टोभंतुनोगिरोर्कमर्चंतु राम॰
कारवों ३ त्रि ४॥ यस्मिन्विश्वाअधिश्रियोयस्मिन्विश्वाअधिश्रियः॥ रणंतिसप्तसंसद इन्द्रंसुतेहवामहो ३ त्रि १४५

कद्रुकेषु चेतनं त्रिकद्रुकेषु चेतनं। देवासो यज्ञमत्नत तमिद्वर्द्धंतु नो गिरो३ ओं सा वो३मिन्द्रमिद्गाथिनो बृह
दिंद्रमिद्गाथिनो बृहत्। इन्द्रमर्केभिरर्किण इन्द्रं वाणीरनूषतो३मिन्द्र इद्धर्योः सचेंद्र इद्धर्योः सचा। संमिम्ल
आ वचोयुजे न्द्रो वज्री हिरण्ययो३मिन्द्रो दीर्घाय चक्षस इन्द्रो दीर्घाय चक्षसे। आ सूर्यं रोहयद्दिवि वि गोभिरद्रि
मेरयो३ ओं सा वो३मेन्द्र सानसिं रयिमिति द्व्यृचं स्तृक्षमर्द्धर्चशः। एतो न्विंद्रं स्तवामेशानमिति स्तोर्द्धर्चशः। मा ति
नो अस्मिन्मघवन्निति स्तृक्षमेकाद्व्यृचं पदशः। उत्तमा परिधानीया॥ इन्द्र पिब तुभ्यं सुतो मदायेति याज्या। उक्तो नु
वषट्कारः। मैत्रावरुणवद्ध्रुसः॥ इति प्रथमः पर्यायः॥ ॥अथ द्वितीया॥ ॥होतुः प्रथमं। हिं भूर्भुवः स्वरों३ ओं सा
वो३ मयं त इन्द्र सोमो निपूतो अधि बर्हिषि। निपूतो अधि बर्हिष्येहीमस्य द्रवा पिबो३ शा३ विगो३ शाचि पूजनायं रणा
य ते सुतः। अयं रणाय ते सुत आखंडल प्रहूयसो३ यस्ते शृंगवृषो नपात्प्रणपात्कुंडपाय्यः। प्रणपात्कुंडपाय्यो
न्यस्मिं३ ध्र आम नों३ ओं मा वो३ मयं ते मानुषे जने सोमः पूरुषु सूयते। सोमः पूरुषु सूयते न्यस्याहि प्र द्रवा पि

मं॰रा॰६ बोऽ३मयंतेऽ२ार्यणावतिसुषोमायामधिप्रियः॥सुषोमायामधिप्रियआजीकीयेमदिन्तमों३नमयएधसेमहे
१४६ चाऽ२रूंमदायघषये॥चाऽ२रूंमदायघषयएहीमिन्द्रद्रवापिबोंऽ३ऽ२शोंसावोऽ३प्रद्वदभीतिचतुस्त्रिंशद्दर्चंसूक्तंअई
र्चेऽ२ाः॥अस्यउन्नमामुद्धरेतन्॥अहंभुवमितिसूक्तं॥एकादर्चंपञ्चः॥आहूयउत्तमापरिधानीया॥अपाय्यस्यांध
सोमदायेतियाज्या॥उत्केतुवपट्कारः॥मैत्रावरुणवद्गुस्तः॥अथमैत्राव रुणस्य॥ ॥हिंभूर्भुवःस्वऽ२रोंऽ२शोंं
सावोऽ३मानूनइन्द्रस्तुमंतंचित्रंग्रामंसंगभाय॥चित्रंग्रामंसंगभायमहाहस्तीदक्षिणेनोंऽ३श्रिः॥विद्माहित्वातु
विकूर्मिंतुविदेष्णंतुवीमघं॥तुविदेष्णंतुवीमघंतुविमात्रमवोभोंऽ३नहित्वाशूरदेवानमर्तासोदित्संतं॥नमर्ता
सोदित्संतंभीमंनगांवारयंतोंऽ२शोंसा॥वोऽ३माप्रद्रवपरावतोर्वावतश्चवृत्रहन्॥अर्वावतश्चवृत्रहन्मध्वःप्रतिप्र
भर्मणोंऽ३ती॥आः॥सोमासआगहिसुतासोमादधिष्णवः॥सुतासोमादधिष्णवःपिबादधृग्यथोचिषेऽ३मिषा एम॰
मं॥इन्द्रस्त्वादुतेरंवरायमन्यवे॥अरंवरायमन्यवेभुवनइन्द्रशंहृदेंऽ२नत्वम्यंबब्धाकरमिमि॥अष्टावर्द्धर्चेऽ२ाः॥ १४६

146

ईंखयंतामिति सूक्तं पञ्चर्चं अर्द्धर्चशः। अहं दां गृणत इति सूक्तमेकादशर्चं पच्छः। आहूयो न माप परिधा
नीया। पाता सुतमिन्द्रो अस्तु सोमं हंता वृत्रमिति याज्या॥ ॥अथ ब्राह्मणाच्छंसिनः॥ ॥हिं भूर्भुवः स्वरों३ ओं
सावो३ मभित्वा वृषभा सुते सुतं सृजामि पीतये। सुतं सृजामि पीतये तृंपा व्यश्नुही मदं ओ३ त्रिः। मा त्वा मूरा अविष्य
वो मोपहस्वान आदभन्। मोपहस्वान आदभन् माकीं ब्रह्मद्विषो वनो३ मिहत्वा गोपरीणसा मदे मंदंतु राध
से। मदे मंदंतु राधसे सरो गौरो यथा पिबो३ ओंसावो३ मभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। इन्द्रमर्च यथा वि
दे सूनुं सत्यस्य सत्पतो३ मा हरयः ससृज्रिरे रुषी रधि बर्हिषि। अरुषीरधि बर्हिषि यत्राभि संनवामहो३ मिन्द्राय
गाव आशिरं दुदुह्रे वज्रिणे मधु। दुदुह्रे वज्रिणे मधु यत्सीमुपह्वरे विदो३ ओंसावो३ मा नून इन्द्रमद्युमिति सूक्ते
नवर्चे अर्द्धर्चशः त्र्यस्ये। अभ्यावर्ति प्रथम इति सूक्तं षड्ऋचं पच्छः। आहूयो न माप परिधानीया। प्रो ग्मां पीतिं वृष्ण
इयर्मि सत्यामिति याज्या। उक्तोऽनुवषट्कारः। मैत्रावरुणवद्भस्मः॥ ॥अथाच्छावाकस्य॥ ॥हिं भूर्भुवः स्वरों३ ओं

मं॰ री॰ ६ सावो३मिदं व सोसुतमंधः।पिबासुपूर्णमुदरं।पिबासुपूर्णमुदरमनोंथिनू२रिमातोंइ३न्द्रभिर्धूतः सुतो अश्वै भ
१४७ रव्योवारैः परिपूतः।अव्योवारैः परिपूतो श्वो न निक्तो नदीषों२ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणंतः।स्वा
दुमकर्म श्रीणंत इं२त्वास्मिन्त्सधमादें२ ओं।सा वो३मिन्द्रेहि मत्स्यं धसो विश्वेभिः सोमपर्वभिः।विश्वेभिः सोम
147 पर्वभिर्महं अभिष्टिरोजसो३।मेमेनं सृजता सुते मंदिमिन्द्राय मंदिने।मंदिमिन्द्राय मंदिने चक्रिं विश्वानि
चक्रयें३ मत्स्वा सुशिप्र मंदिभिः स्तोमेभिर्विश्वचर्षणे।स्तोमेभिर्विश्वचर्षणे सचैषु सवनेष्वों२ ओं।सावो३प्र
सम्राजं इति सूक्तं द्वदशार्चमर्द्धर्चशः।उपक्रमस्साभरेमिति स्तोर्द्धर्चशः।न दस्येन व्यमिति सूक्तं नवर्चं पच्छः।
आ हूयो त्तमा परिधानीया।अस्य पिब यस्य जज्ञान इन्द्रेति याज्या।उक्तोनुवषट्कारः।मैत्रावरुणवद्ब्रूसः
॥ ॥इति मध्यमाः पर्यायाः।अथन्तीयाः पर्यायाः॥ ॥अथ होतुः प्रथमं॥ ॥हिं भूर्भुवः स्वरें३ ओं एम॰
सा वो३मिदं त्वन्नोज सासुतं राधानां पते।पिबा त्वस्य गिर्वणः।पिबा त्वस्य गिर्वणों३ त्रिः।यस्ते अनुस्वधा १४७

मससुतेनियघतन्वं।सत्वाममनुसोम्यं।सत्वाममनुसोम्यं।२प्रतेअश्नोतुकुक्ष्योः प्रेन्द्रब्रह्मणाशिरः।प्रवा
हूस्पूरराधसेप्रवाहूश्रूरराधसोंं२३ोंसावोंं३महाँ इंद्रोयओजसापर्जन्योवृष्टिमाँ इव।स्तोमैर्वत्सस्यवा
वृधो३म्प्रजामृतस्यपिप्रतःयदिंद्रमवह्नयः।विप्राऋतस्यवाहसाविप्राऋतस्यवाहसोंं२कण्वाइन्द्रंयदक्र
तस्तोमैर्यज्ञस्यसाधनं॥जामिब्रुवतआयुधंजामिब्रुवआयुधोंं२३ोंसावोंं२समस्यमन्यवेविशः इतिद्विचत्वारिंशत्
चोर्द्ध्वं३ः।विश्वजितेधनजितइतिषष्ठंपषः।आहूयोन्नमापरिधानीया।तिष्ठाहरीरथआयुज्यमानेतियाज्या।
उक्तोनुवषट्कारः॥ ॥अथमैत्रावरुणस्य॥ ॥हिंभूर्भुवःस्वरोंं२३ोंं२सावो३मात्वेतानिषीदतेन्द्रमभिप्रगायत।
सखायःस्तोमवाहसःसखायःस्तोमवाहसोंं३त्रिः।पुरूतमंपुरूणामीशानंवार्याणां।इन्द्रंसोमेसचासुतइन्द्रंसोमे
सचासुतोंं३सघानोयोगआभुवत्सरायेसपुरंध्यां।गमद्वाजेभिरासनोगमद्वाजेभिरासनोंं२३ोंसावो३मात्वरा
त्रवागहिरसु।कयानिवहूयसे।उपमेरोचनेदिवउपमेरोचनेदिवो३नुष्यायमद्भिभिःसुनोगोभिःश्रीतोमदायकं।

मे॰ ८।०६ प्रसोमइन्द्रहूयतेप्रसोमइन्द्रहूयतोंइमिन्द्रश्रुधिसुमेहवमस्मेसुतस्यगोमतः। विपीतिंतृप्तिमश्नुहिवि
१४८ पीतिंतृप्तिमश्नुहोंइशोंसावोइन्नकिरिन्द्रत्वदुत्तरइतिचतुर्विंशतितृचंसूक्तंअर्द्धर्चशः। अस्योनमा
मुद्धरेतृ। अजेदधामीतिसूक्तंपञ्चर्चंपछः। आहूयोनमापरिधानीया। इदंत्यस्यात्रमिंद्रपानमितियाज्या। उक्तो
148 जवृषक्कारः। मैत्रावरुणपूर्ववद्भक्षः॥ ॥अथब्राह्मणछंसिनः॥ ॥हिंभूर्भुवःस्वःहोंसावोंइयोगेयोगेतव २३४
स्तरंवाजेवाजेहवामहे। सखायइन्द्रमूतयेसखायइन्द्रमूतयोंइत्रिःमाघागमघद्रिप्ववत्सहस्रिणीभिरू
तिभिः। वाजेभिरुपनोहवंवाजेभिरुपनोहवोंइमत्रप्रत्नस्योकसोहुवेतुविप्रतिंनरं। यंतेपूर्वंपिताहुवेयंतेपू
र्वंपिताहुवोंइशोंसावोंइयुंजंतिब्रध्नमरुषंचरंतंपरितस्थुषः। रोचंतेरोचनादिविरोचंतेरोचनादिवोंइयुंजंत्य
स्यकाम्याहरीविपक्षसारथे। शोणाधृष्णूनृवाहसाशोणाधृष्णूनृवाहसोंइकेतुंकृण्वंनकेतवेपेशोमर्याअ राम०
पेशसे। समुषद्भिरजायथाःसमुषद्भिरजायथोंइशोंसावोंइयदिन्द्राहमितिसूक्तंपंचदशर्चंअर्द्धर्चशः। प्रतेमहे १४९

विदथ इति सूक्तं त्रयोदशर्चं पच्छः। आहूयोत्तमा परिधानीया। ऊती शचीवस्तव वीर्येणेति याज्या। उक्तो नुव
षट्कारः। मैत्रावरुणवद्ग्रहः॥ ॥अथाच्छावाकस्य॥ ॥हिं भूर्भुवस्वरों ३ शोंसावो ३ मिन्द्रः सुतेषु सोमेषु क्रतुं पुनीत
उक्थ्यम्। विदे वृधस्य दक्षसो महान्हि षो ३ त्रिः। स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रव
स्तमः समप्सुजित्समप्सुजों ३ तमह्वे वाजसातय इन्द्रं भराय शुष्मिणं। भवानः सुम्ने अंतमः सखा वृधे सखा वृ
धों ३ शोंसावों ३ य इन्द्र सोमपातमो मदः शविष्ठ चेतति। येना हंसि न्यत्रिणं तमीमहे तमीमहों ३ येना दशग्वमध्रि
गुं वेपयंतं स्वर्णरं। येना समुद्रमाविथा तमीमहे तमीमहों ३ येन सिंधुं महीरपो रथां इव प्रचोदयः। पंथामृतस्य
यातवे तमीमहे तमीमहों ३ इत्योम्। त्रिणि हो स्तोत्रियानुरूपौ। अनेन प्रकारेण शंसनीयौ। उत्तमे चतुरक्षराणि
त्वच्छावाक इति वचनात्। गायत्रौ चेत्स्तोत्रियानुरूपौ तदा पादस्थ्यांसरं वेति वृत्तिकाः। अथ प्रयोगः। शोंसावो ३
माघाये अग्निमिंधत इति सप्तदशर्चा अर्द्धर्चशः। य इन्द्र चमसे ष्वा सोम इति तिस्रो अर्द्धर्चशः। प्रवः सतां ज्येष्ठ

मं०टी०६ तमायेति सूक्तं नवर्चं पच्छः। आहूयोत्तमा परिधानीया। प्रोद्रे वो हरयः कर्मा समन्विति याज्या। उक्तो नुवषट्का
१४९ रः। मैत्रावरुणवद्ग्रहः॥ ॥इति पर्यायाः समाप्ताः॥ ॥प्रसंगादच्छावाकस्य। अहीनरात्रे। पन्यं पन्यमि
त्सोतारः। पन्यइदुपगायत इति प्रथमपर्याया द्यौ स्तोत्रियानुरूपौ तयोरेव पादस्याभ्यासः। प्रथमपर्या
149 यस्यान्त्ये। उत्तमे पर्याये उत्तमस्य पादस्याभ्यासः। आ त्वा विशन्त्विन्दवः। आ त्वा शं वृ इति उत्तमे पर्याये। इति अ
हीनसत्रे प्रथमोत्तमयोः पर्याययोः अच्छावाकस्य स्तोत्रियानुरूपाः। छंदोगानुसारेण आवापे कर्तव्ये गायत्रा पा
मेव आवापः कर्तव्यः। एते पर्यायाः पर्यास्तवर्जं गायत्राः॥ ॥अथ समाप्तेषु पर्यायेषु। होता आश्विनं शस्त्रं संशि
ष्यन् विसंस्थितसंचरेण निष्क्रम्य आग्नीध्रीये दक्षिणं जान्वाच्य स्थाल्याः स्रुवेणादाय षट्कृत्वो जुहोति। अ
ग्निरज्जीत्यनेन प्रथमां। उषा अजिनीत्यनेन द्वितीयां। अश्विना वज्रिनौ इत्यनेन तृतीयां। बण्महाँ एम०
असीति चतुर्थीं। बट् सूर्य श्रवसेति पञ्चमीं। इन्द्रं वो विश्वतस्परि इति षष्ठीं। अत्राधानां त्रयाणांलिं १४९

गोक्तदेवताः। चतुर्थपञ्चमयोः सूर्यः। अंत्यस्येन्द्रः। एवं षड्वार्हुतीर्हुत्वा। शिष्टमाज्यशेषं तत्रैव प्राश्याचमन
मकृत्वैव आज्यस्थलेपात्रक्षाल्यानाचम्य सदः प्रविश्य। पश्चात्स्वस्वधिष्ण्यस्य निरसनं कृत्वा। समस्तजंघोरूरस्ति
भ्यां जानुभ्यां चोपस्थं कृत्वोपविशेत्। उत्पतिष्यं छकुनिर्यथा एवमुपविष्टः। अग्निं हिंकृत्य शोंसावो३मित्याहूय
प्राकृतमेवोपस्थं कृत्वा। अग्निर्होता गृहपतिः स राजेति एकपातिनामृचमाश्विनस्य पच्छस्त्रिः शंसेत्। उत्तमेन व
चनेनोपप्रयंतो अध्वरमित्यादि प्रातरनुवाकार्थे निर्दिष्टं समाम्नायं। उपसंतनुयात्। उपप्रयंत इति सूक्तेन व
र्चपञ्चर्चैः। अवा नो अ[illegible]ग्न इति षड्चः। अग्निमीळे नव। अग्निं दूतमिति द्वादशर्चं सूक्तं। वसिष्ठाहीति द्वाविंश
तिः। त्वमग्ने व्रतपा इति नवर्चाः। त्वं नो अग्ने महोभिरिति नवर्चाः। इमे विप्रस्येति द्विः सूक्तयोर्ऋचः त्रिषष्टिः।
पुरुष्वाहि देवहूतमानिति सूक्तं षोडशर्चं। प्रेष्ठं वो अतिथिमिति नवर्चं। त्वमग्ने बृहद्वय इत्यष्टादशर्चाः। अर्चं
तस्त्वा हवामह इति सूक्ते षड्ढे। अग्ने पावक इति नवर्चं। दूतं वो विश्ववेदसमिति सूक्ते अष्टकौ। अग्निर्होता नो अ

मं॰ २।०६ ध्वर इति तिस्रः। अग्निर्होता पुरोहित इति नवर्चं। अग्न इध्वा समिध्यस इति चतस्रः। प्र वो वाजा अभिद्यव इति प
१५० ञ्चदशर्चं। उप सद्याय मीळ्हुष इति पञ्चदशर्चं। त्वमग्ने यज्ञानामिति पञ्च चत्वारिंशत्। अग्ने हंसि न्यत्रिणमि
ति नवर्चं। अग्निं हिन्वंतु नो धिय इति पञ्चर्चं। प्राग्नये वाचमिति सूक्तेयं चत्रिके। इमां मे अग्ने समिधमित्येकोनविंश
150 तिर्ऋचा इति गायत्रमर्द्धर्चं त्र्यास्यं। त्रयाणां उत्तमा समुद्रे तु। इति सर्वं गायत्रमर्द्धर्चं त्र्याःसस्यं। त्वमग्ने वसूनिति द्वा
र्चं। त्वं हि क्षैतवद्यश इत्येकादशर्चं। अग्ने यो मर्त्य इति षडर्चं। होताजनिष्ट इत्यष्टर्चं।। प्र वो देवायाग्नय इति सप्तर्चं। अग्ने
कदा त आनुषगिति पंचर्चं। सखायः सं व इति दशर्चं। त्वामग्ने हविष्मंत इति सूक्ते सप्तर्चे। त्रूह हृदय इति त्रीणि सू
क्तानि पंचर्चानि। यमग्ने वाजसातम इति चत्वारि सूक्तानि चतुष्कानि। अच्छा वो अग्निमवस इति नवर्चं। उप प्रयंत इ
त्येतत्सार्द्धिः। एतदन्तमर्द्धर्चं त्र्याः। अबोध्यग्निः समिधेति त्रीणि सूक्तानि षट्कः। आ सोम धेनुविन्त्रीवे इत्येतासु एम॰
द्धरेत्। अगन्म महा नमसेति त्रैष्टुभं षट्कः। एना वो अग्निमिति द्वादशर्चं। अस्य घा प्रगाय पस्तोत्रियः ककुभन् १५०

एकारः। एस्य॥ प्र वो यह्वमिति विंशकं। अग्ने विवस्वदुषस इति चतुर्दशकं। सखायस्त्वा ववृमह इति नवर्चं।
अयमग्निः सुवीर्यस्येति षडृचं। अग्न आयाह्यग्निभिरिति विंशतिः। अच्छा नः शीरशोचिषमिति षडृचः॥
अदर्शि गातुवित्तम इति सप्तर्चं। इति वा ईन्नमर्द्धर्चशः शस्यं। अग्ने वाजस्येति तिस्रः। पुरु त्वा दाश्वानिति तृचं।
त्वामग्ने मनीषिण इति नवर्चं। ईळिष्वा हि प्रतीव्यमिति त्रिंशदृचः। इत्यौष्णिहमर्द्धर्चशः। जनस्य गोपा इति षडृ-
चं॥ त्वामग्न ऋतायव इति सप्तकं पञ्चः। अग्निं तं मन्य इति दशर्चं। इति पाङ्क्तं शस्यं। अर्द्धर्चशो वा शस्यमित्याग्ने-
यः क्रतुः॥ ॥ प्रति ष्या सूनरी जनीति सप्तर्चं। कस्त उष इति गायत्रः तृचः। अर्द्धर्चशः शस्यः। उषो भद्रेभिरानुष्टु-
भं चतुष्कमर्द्धर्चशः शस्यं। इदं श्रेष्ठं ज्योतिषां ज्योतिरागादिति विंशत्यृचं। प पूर्व्य इति सूक्ते त्रयोदशके। प्रत्यर्चि-
रित्यष्टावृचः। द्युतद्यामानमिति षडृचः। उषो वाजेनेति सप्तर्चं। इदमु त्यत्पुरुतमं पुरस्तादिति एकादशर्चं। उदु-
श्रिय इति सूक्ते द्वे षट्के। व्युषा आवो दिविजा इति षट् सूक्तानि। प्रथममष्टकं। द्वितीयं सप्तकं। तृतीयं षट्कं। चतुर्थं प-

मं·८·६ ऋचमेपञ्चके। षष्ठत्रिकं। इतित्रैष्टुभं पच्छः त्रास्यं। प्रत्यु अदर्श्यायतीतिषड्वं। अस्यचाघघ्रचः स्तोत्रिपः क
१५१ कुब्जत्तरकारः त्रास्यः। मह्रुवामेनेतिसूक्तं षोळ्वर्चं। उषसश्चित्रमाभरेतितिस्र औष्णिह्मर्द्धर्चं त्राः त्रास्यं।
एताउत्याइतिचतस्रः पच्छः। महेनो अघबोधयेतिदशार्चं। इतिपाङ्क्तं पङ्क्ति त्रास्यं। अर्द्धर्चं त्रास्यमितिवा। इत्यु
षस्यः क्रतुः॥ ॥एषोउषाइतिपञ्चदशार्चं। प्रातर्युजाविबोधयेतिचतस्रः। अश्विनायज्वरीरिषइतितिस्रः।
151 आश्विनावश्वावत्येतितिस्रः। गोमदूषुनासत्येतितिस्रः। इतिनवऋचा गायत्रीषं रात्मका अर्द्धर्चं त्राः। दूर
दिहेवेतिसूक्तं एकोनचत्वारिंशदृचात्मकं॥ अस्यसूक्तस्य उत्तमास्तिस्रऋचउद्देरता। वाहिष्ठो वां हवानामि
तिचतस्रः। उदीरथामित्यष्टादशार्चं॥ आमेहवंनासत्येतिनवर्चं इतिगायत्रं अर्द्धर्चं शः त्रास्यं। यदद्यस्थ
इतिसूक्तेदशार्चं। आनोविश्वाभिरितित्रयोविंशकं। सेचिदत्रिमत्तज्जुरमितिषड्वर्चं। इत्यानुष्टुभमर्द्धर्चं शास्यं॥ आ रम०
भात्यग्निरितिद्वेसूक्तेपञ्चर्चं। ग्नावाणेवेत्यष्टर्चं। नासत्याभ्यामितित्रीणिसूक्तानि। द्वेपञ्चविंशके। ततीयमेका १५१

दशकं। धेनुः प्रत्नस्येति नवकं। कदु प्र वदिति द्वे सूक्ते सप्तके। स्तुषे नरेति द्वे सूक्ते एकादशार्चे। द्वितीयस्यान्
मा एकपदामुपसमस्य प्रणयात्। युवो रजांसीति पंचानां सूक्तानां तृतीयं सूक्तमुद्धरेत्। तेषु प्रथमं दशकं कदु प्रे
ष्ठाविति नव।। तं युंजाथामिति द्वे सूक्ते षट्के। अनारिश्चेति सूक्तं पञ्चकं। आ भात्यग्निरित्याधेतदन्तं पच्छः। इमा उ
वां दिविष्टय इति षडृचं। अस्या घः प्रगाथः ककुबुत्तरः कारः। अयं वां मधुमत्तम इति दशार्चं। ओ त्यमह्व आ रथमि
ति सप्तर्चः। द्युम्नी वां स्तोमो अश्विनेति षडृचं। यस्थो दीर्घप्रसद्मनीति षडृचं च वा ईलमर्द्धं चं शस्यं। अश्विनावर्त्तिरस्म
देति तिस्रः। अश्विना वेह गच्छतमिति तिस्रः। युवो रुषू रथं हुव इति पञ्चदशर्चं। आ वो ध्यन्विज्म जदेति षट्कं। एष
स्य भानुरिति सप्तकं। आ वां रथं पुरुमायमिति दशकं। अभूदिदं वयुनमित्यष्टकं। यो वां परिज्मेति त्रीणि सूक्तानि।
द्वे चतुर्दशके। तृतीयं त्रिकं। त्रिश्चिन्नो अद्येति द्वादशकं। ईळे द्यावापृथिवी इति पञ्चविंशकं। अबोध्यग्निरित्याधेत
दन्तं पच्छः। प्रति प्रियतममिति नवर्चं पांक्तं। अर्द्धर्चशः शस्यं। पङ्क्तिः शस्यं वा।। इत्याश्विनः क्रतुः।। ।। सूर्योनोदि

मं॰टी॰६ वस्यात्विति पंच र्चे। उदुत्यंजातवेदसमिति नव र्चे। इति गायत्रमर्द्धर्चशः। चित्रं देवानामिति त्रैष्टुभं प
१५२ छः। नमो मित्रस्येति द्वादशा र्चं जागतं पच्छः॥ इति सौर्याणि। इन्द्र क्रतुं न आभर। अभि त्वा शूर नोनुमो ब्रह्मवः
सः स्वब्रह्मसहस इति प्रगाथा ऐन्द्रा अर्द्धर्चशः। शस्याः। मही द्यौः पृथिवी च न इत्येका अर्द्धर्चशः शस्या। ते हि द्यावापृथि
वी विश्वशंभुवेति एका पच्छः शस्या। विश्वस्य देवी मृचयस्य जन्मन इति द्विपदा अर्द्धर्चशः शस्या। आ हूयमह
152 हस्यते आतिथयर्यो अहोदिति परिधानीया पच्छः परिदध्यात्। अस्मिं छस्त्रे आहावद्वयं। प्रतिपदि परिधानीया
यां च। प्रतिपदे परिधानीयायामाहाव इति वचनात्॥ ॥एषाश्विनस्य क्लृप्तिः॥ ॥अथ प्रयोगकर्तॄणां सौक
र्यार्थमाश्विनस्य सूक्तानां आद्यंतानि संगृह्यंते॥ ॥हिं भूर्भुवस्वरों ३ शोंसावो ३ मग्निर्होता गृहपतिः स राजा।
विश्वा वेद जनिमा जातवेदो ३ देवानामुत यो मर्त्यानां। यजिष्ठः स प्रयजतामृतावो ३ त्रिः। मुप प्रयंतो अध्वरं। ए.म॰
अग्नये यक्षि स्वं द मो ३ म वा नो अग्न ऊतिभिः॰ होता गृणीत उक्थ्यो ३ मग्निमीळे पुरोहितं॰ स च स्वानः स्वस्तयो ३ १५२

मे०प्र०६ मर्त्यो दुवः॥ रयिं वाजे घवृतो ३ होता जनिष्ट चेतनः। यं यज्ञं चकृमा वयों ३ प्र वो देवायाग्नये। वर्षिष्ठमस्तु पृस्थितो ३
१५३ मग्ने कस्तत आनुषक्। सुवेदं कृचिदर्थिनों ३ सखायः संवः सम्यंचं। इषं सासत्याग्नों ३ त्वामग्ने हविष्मंतः। स्तो
तम्यस्त्व वसे चनउतै धिप स्तुनोवृधों ३ हृद्वयो हि भानवे। नव दमत तनन्दणों ३ यमग्ने वाजसातम। घुमत्या वक
153 दीहिहो ३ मघ्णावो अग्निमवसे। पर्षन्नावेव सुक्रतो ३ मैं वो ध्यग्निः समिधा जनानां। स्वर्वती रप एनाजयेमों ३ पछ्छः
त्वमग्ने वरुणो जायसे यत्। गोमंतेरयिं न ञ्शते स्वस्तो ३ मगन्म महा नमसा यविष्ठं। यूयं पात स्वस्तिभिः सदानो ३
मेना वो अग्निं नमसा। अग्निर्जनाय दाशुषों ३ प्र वो यह्वुपुरूणां। विश्वं स मन्त्रियां दहो ३ मग्ने विवस्वदुषसः। अ
श्विभ्यामुषसा सजों ३ सखायस्त्वा ववृमहे। आदिहोतारं न्यसादयंतो ३ मयमग्निः सुवीर्यस्य। मयो भुना त्वविष्ठ
म्नयवत्रा स्वतो ३ मग्न आयाह्यग्निभिः। अग्ने सेधर स्वस्विनो ३ मछा नः शीरशोचिषं। भुवद्वसुर्द्द यूपो ३ मद एम०
र्त्री गातुवित्तमः। पर्षि रायो मघोनो ३ मग्ने वाजस्य गोमतः। सतिम्मजंभ रसो दह प्रतों ३ प्रुरुत्वाम्यान्वो चे। १५३

प्र प्रेते अग्ने वनुषः स्यामों ३ त्वामग्ने मनीषिणः ॰ हव्यवाहममर्त्यं सहो वृधो ३ मीळिषाहि प्रतीव्यं ॰ स्त ना
२ पृच्छः वानासम्राजाषूत दक्षसों ३ जनस्य गोपा अजनिष्ट जागृविः ॰ त्वामाऊः सहसस्पुत्र मंगिरें ३ त्वामग्न स्व
३ पृच्छः नाय वः समीधिरें ॰ अभि त्वयांसि पार्थिवा विति ष्ठसो ३ मग्निं तं मन्ये यो वसुः ॰ इषं स्तोत म्य आभरें ३ प्रति पंङ्क्तिः ऽशंसनों
व्या सूनरी जनी ॰ व्युषः शुक्रेण शोचिषां ३ कस्त उषः कधप्रिये ॰ अस्मे रयिं निधारयों ३ सुषोमक्षेभिरागहि ॰
गीर्भिः कएवा अहृषतों ३ मिदं श्रेष्ठं ज्योतिषां ज्योतिरागात् ॰ अदितिः सिंधुः पृथिवी उत द्यौं ३ प्र पूर्वो द
४ पृच्छः क्षिणाया अयोजि ॰ सहस्त्रिणश्च शातिनश्च वाजों ३ प्रत्यची रुशादस्या अदर्शि ॰ सूर्यस्य चेतिर श्मिभि ईज्ञा
नों ३ द्युत घामानं दृहतीमृते न ॰ पुनर्ज्योतिर्युवतिः पूर्वथाकों ३ सुषो वाजेन वाजिनि प्रचेताः ॰ चन्द्रेव मा
नुं विदधे पुरुत्रों ३ मिदमुत्त्सु रूतमं पुरस्तात् ॰ तत्त घोष धत्तां पृथिवी च देवों ३ सुदुश्रिय उषसो रोचमा
५ पृच्छः नाः ॰ उरुगायमधिधेहि श्रवो नों ३ व्युषा अश्रावो दिविजा ऋतेन ॰ पृं संपानस्वस्तिभिः सदा नों ३ प्रैतु अरदर्श्या पृच्छः

मं० रि० ६ यतो० उषाउछद्पस्त्रिधों३सहवामेन न उषः० संवाजै वाजिनीवतो३सुषस्तच्चित्रमाभर० अथानोविश्वासौ

१५४ भगान्यावहं३मेनाउत्याउषसः केतुमक्रत० गावोनव्रजं व्युषा आवर्तमो३स्महेनोअद्यबोधय० सुजातेअश्व पंक्तिरोरार्थं

सूनृतो३मेषोउषा अपूर्व्या० अविद्वियाभिरूतिभों३प्रातर्युजाविबोधय० अश्विनासोमिनो रथं हो३मश्विनायज्व

रीरिषः० आयातं रुद्रवर्त्तनो३माश्विनावश्वावत्या० परिद्यामन्यदीयनों३गोमद्‌षुनासत्या० धिषण्यावरिवोवि

155 दों३दूरादिहेवयस्तनो० नानः पङ्क्ति इषारथों३वाहिष्ठोवां हवानां० वहेथेशुभ्रयावानों३मुद्रीरथामत्तायते०

अंतिषद्भूतुवामवो३मामेहवंनासत्या० मध्वः सोमस्यपीतयों३यदद्यस्थः परावति० यच्चिन्निसुवांपचो३मानो

विश्वाभिरूतिभिः० अर्वाग्जीवेभ्यस्परें३त्वंविदन्निमत्तजुरं० उत्संनपिप्युषीरिषों३माभात्यग्निरुषसामनी

कं० आविश्वान्यमत्तासौभगानों३गावावापोवनादिदृर्धेजरेथे० बृहद्वदेमविदथेसुवीरों३नासत्याभ्यां बर्हिरिवा॥प ऋग्०

छः शश्वन्तमा ... याउषसोव्युष्टौ३धेनुः प्रत्नस्य० पच्छः स्तुतावतोनि कृतमागमिष्ठों३कउश्रवत्कतमोयज्ञि १५४

या नां॥० श्रितः कामो नासत्या युवद्रिं ३ स्तुषे नरा दिवो अस्य प्रसंता० आ वां सुम्नैर्वरिमन्त्सूरिभिः ष्यां ३ मता रिषम्
तमसस्पारमस्य० यूयं पात स्वस्तिभिः सदा नो मिमातु वां दिविष्टयः० उत त्रिसियंति सुक्षितो ३ मयं वां मधुमन
मः० सोमं प पथुरश्विनो ३ मोत्य मह आरुपं० महे क्षत्राय जिन्वथो ३ घुम्नी वां स्तोमो अश्विना० अश्विनाश्च
घाग तो ३ यत्स्यो दीर्घप्रसद्मनि० अत आयातमश्विनो ३ मश्विना वर्ति रस्मदा० उषर्बुधो वहं तु सोम
पीतये ३ मश्विना वेहगच्छतं० हंसाविव पततमा सुतां उपो ३ युवोरु षू रथं हुवे० विषु द्रुह्देवयन्तमूरु
१२स: ५७: प्रुर्गि रो ३ मबोध्यग्निर्ज्म उदेति सूर्यः० यो वां हविष्मान्मनसा ददाशे ३ मे षस्य मानुरुद्दियर्ति युज्यते०
हविष्मंतं तरणिं भोजमच्छां ३ युवो रजांसि सुयमासो अश्वाः पच्छः॥ जीरदानो ३ कद्रुप्रेष्ठाविषां रयीणां०
दानो ३ तं युंजाथां मनसो यो जवीयान्० विधामेषं वृजनं जीरदानो ३ मा वां रथं पुरुमायं मनोजुवं० च हि
सपिं द्रुमिव चर्षणीसहो ३ म भू दिदं वयुन मो षु भूषत० विधामेषं वृजनं जीरदानो ३ यो वां परिज्मा सुवृ

मे॰री॰६ दृभ्विनारपः॰ आत आयातं मधुपेयमश्विनोत्रिश्चिन्तो आ घाम वतंन वेदसा॰ वृधे च नो भवतं वा
१५५ जेसा तो॰२ मी ळे घावापृथिवी पूर्वचित्तये॰ अदितिःसिंधुःपृथिवी उत घौं॰२ प्रतिप्रियतमं रथं॰ मा ध्वीम एतदंतं पठः
मश्वुतं हुवों॰२ सूर्यो नोदिवस्पातु॰ विपश्येम नृचक्षसो॰२ मुदुत्यं जातवेदसं॰ ताभिर्यासि स्वयुक्तिभों॰२
चित्रं देवानामुदगादनीकं॰ अदितिःसिंधुःपृथिवी उत घौं॰२ नमो मित्रस्य वरुणस्य चक्षसे॰ तस्मिन्त पठः
155 देनो वसवो निधेतनो॰२ मिन्द्र क्रतुं न आभर॰ अति शूरत एमसो॰२ ममभित्वा शूरनोनुमः॰ गाव्यं तत्स्वा
हवामहों॰२ बहवः स्वरचक्षसः॰ सत्त्रं राजानमाशातो॰२ मही घौःपृथिवी च नः॰ पिपृतां नो भरीमभों॰२
१८२ ते हि घावापृथिवी विश्वशंभुवों॰ देवो देवी धर्मणा सूर्यः शुचों॰२ विश्वस्य देवी मृचयस्य जन्मनः॰ न
यारो घाति नग्मों॰२ शोंसा वों॰२ बृहस्पते अतियदर्यो अर्हाता घुमद्विभाति क्रतुमज्जनेषों॰२ यद्दीदय एम॰
छवसत्त्रत प्रजात तदस्मासु द्रविणं धेहि चित्रों॰२ त्रि॰। इति परिधानीया। उक्थं वाचि। इति शस्त्वाज १५५

पः। आश्विनो ग्रहोऽस्ति। तिरोअह्न्यसंज्ञकः पुरोडाशः। तस्य इमे सोमासस्तिरोअह्न्यास इति याज्या पुरो

ऽनुवाक्या। हे तायस्य दश्विना सोमानां तिरोअह्न्यानां [illegible] त्रिवर्तिर्यातं त्रिरश्मा द्यायेथा सुनोऽनुरू

पं नासत्यावाजिना ययाधेनूः सजूरग्नी रोहिदश्वो घृतस्नुः सजूरुषा अरु[illegible]णीभिः सजूः सूर्य एतशेन स

जोषावश्विना दंसोभिः करत एवाश्विनाजुषेतां मदेतां वीतां पिबतां सोमं होतर्यज। इति प्रैषः। प्रवामंधांसि

मद्यान्यस्थुरुभा पिबतमश्विनेति याज्या। अध्वर्युमनकानमुक्त्वा अवसाय शिष्टेनार्द्धर्चेन वषट्कुर्यात्।

यदि तैरोअह्न्यस्य पुरोडाशस्य स्विष्टकृताचरेयुः। पुरोडाशमग्ने पचत इत्यनुवाक्या। अग्ने वृधान आहुति

मिति याज्या। अत्रादेशेन कर्तव्यः। पर्यायवद्भक्षविधिः। समाप्तमाश्विनं। ततोमगतीर्थसर्पणं। ततोऽनुयाजादि

सूक्तवाकप्रैषे। अग्निमद्य होतारमवृणीथ्ययं हन्नग्नय आज्यं गृहन्सोमायाज्यं बध्नंनग्नय इन्द्राग्निभ्यां छागो

व धन्निन्द्राय सरस्वत्यै मेषो सुन्वन्निन्द्राय सोमं भक्षं। अग्नय आज्येन सोमायाज्येनाग्नय इन्द्राग्निभ्यां छा

मं॰दी॰६ गाभ्यामिन्द्राय स्तरस्वत्स्यै मेषाभ्यामिति कथं। एवंवन्मित्रुनेत्युक्तत्वात् इंद्राय सोमेन हरिभ्यां॰ग्न भीक्षुरवी

१५६ वृषंतपुरोळाशेरित्यादि ततोयज्ञपुच्छादिसमानं॥ ॥संतिष्ठतेतिसत्रः॥ ॥सकृदेव प्रपंनायतवास्मान्निचया

चते। अभयंभक्षणं प्रादाघस्तंसर्वे स्वरंभजे।१०॥ ॥अथ प्रायश्चित्तानि॥ ॥यदि पर्यायानभिव्युच्छेत्स

156 र्वेभ्य एकंसंभरेयुः। यदा पर्याये यजनारभ्येभ्युदस्त्रिर्गच्छेतितदा सर्वेभ्यः पर्यायेभ्य एकंपर्यायं संभरत्य कुर्या

त्। तद्यथा। प्रथमपर्यायाद्धोतास्वीयं शास्त्रमाददीत। द्वितीयपर्यायान्मैत्रावरुणब्राह्मणाच्छंसिनौ स्वेशास्त्रे

आददीत। उत्तमादच्छावाकः स्वीयंशास्त्रमाददीत। इत्येकःपक्षः। द्वौ चेद्वै प्रथमाद्वा उत्तमात्। होतमैत्राव

रुणौ प्रथमपर्यायात्स्वेशास्त्रे आददीत। उत्तमपर्यायाद्ब्राह्मणाच्छंस्यच्छावाकश्च स्वेशास्त्रे आददीत। इति

द्वितीयः पक्षः। अपिवा सर्वे होत्रकाः सोमनिर्हृत्स्तास्युः। तद्यथा स्तोत्रियानुरूपाः सा व[illegible]था३ पूर्वं भवंति। तेभ्यः ध्व राम॰

र्ध्वं यत १ छः शास्यमस्तितस्यादितस्तच ४ शस्यः। अंतिमास्तत्वाः शंसेयुः। ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथ १५६

मोन्नमांस्तच्चानूं ४ ऋंसेपुष्यिति वचनात्। त्रिषपिपर्यायेषु होतुःशस्त्रेविकल्पः॥ ॥अथछं दोगानुसारे
णक्रमनिरूप्यते। तत्रत्रिषपिपर्यायेषु स्तोमनिर्हासपक्षे होतुःशस्त्रमविकृतंभवति॥ मैत्रावरुणस्या
भिहिंकृत्याहूयसवइन्द्रायमादनमितिस्तोत्रियस्तृचः। शोंसावों३प्रकृतान्यजीषिणइत्यनुरूपस्तृचः। शोंं
सावों३प्रतिश्रुतायवोधृषद्दितितृचः। दानायमनःसोमपावंनितिद्वे ऋचौपच्छः। शोंसावों३सनोनव्येभि
रितिपरिदध्यात्सपच्छः। अस्यमदेपुरुवर्पोसीतियाज्या। अथब्राह्मणाछंसिनः। अभिहिंकृत्यवयमुत्वात
द्दिदर्था इतिस्तोत्रियस्तृचः। शोंसावों३वयमिन्द्रत्वायवोभीत्यनुरूपस्तृचः। शोंसावों३वार्त्रहत्यायशवस
इतितृचोर्द्धर्चशः। तंमेतांजनराज्ञइतितृचःपच्छः। अंत्यापरिधानीया। अपाःपूतस्यहरिवःपिबेहेतियाज्या।
अथाच्छावाकस्य॥ अभिहिंकृत्यइन्द्रायमद्वनेसुतमितिस्तोत्रियस्तृचः। अर्द्धर्चशः। शोंसावो३भिन्द्रमिद्गाथि
नोबृहदित्यनुरूपस्तृचः। पन्यंपन्यमितिस्तोतारःपन्यइदुपगायतेतिस्तोत्रियानुरूपौ। अहीनरात्रिपक्षे॥

मं॰ टी॰ ६ शोंसावो ३ मेन्द्र सानसिं रयिमिति त्रचं। तुभ्येदेते बहुला इति त्रचः पच्छः। अंत्या परिधानीया। इन्द्र पि
१५७ बतुभ्यमिति याज्या। अस्मिन्पर्याये स्तोत्रियानुरूपत्रचेषु प्रथमपदाभ्यासः पूर्ववत्॥ इति प्रथमः प
र्यायः॥ ॥अथ द्वितीयः पर्यायः। अस्मिन्पर्याये स्तोत्रियानुरूपत्रचेषु मध्यमपादाभ्यासः। मैत्रावरु
णस्य। अभिहिंकृत्य। कूयानूनमिन्द्र स्तुमन्तमिति स्तोत्रियः। शोंसावो ३ मा प्र द्रव परावत इत्यनुरूपः।
शोंसावो ३ न त्वां न्यं बव्याकरमिति त्रचः। अहं स सस्य वतो धारयमिति त्रचः पच्छः। अंत्या परिधानी
या। पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रमिति याज्या। अथ ब्राह्मणाच्छंसिनः। शोंसावो ३ मभि त्वा वृषभा
सुत इति स्तोत्रियस्त्रचः। शोंसावो ३ मभि प्र गोपतिं गिरेत्यनुरूपस्त्रचः। शोंसावो ३ मा नून इन्द्रमस्प
गिति त्रचः। आ दं गिरः प्रथमं दधिरे वय इति त्रचः पच्छः। अंत्या परिधानीया। प्रोग्नां पीतिमिति या राम॰
ज्या। अच्छावाकस्य। अभिहिंकृत्य। शोंसावो ३ मिदं वसो सुतमंध इति स्तोत्रियः। शोंसावो ३ मिन्द्रेहि मत्स्य १५७

157

धस इत्यनुरूपः। ओंसावो३ प्रसम्राजं चर्षणीनामिति तृचः। अमाजुरिव पित्रोः सचेति तृचः। प छः। अं
त्या परिधानीया। अस्य पिब यस्य जज्ञान इन्द्रेति याज्या। इति द्वितीयः पर्यायः॥ ॥अथ तृतीयः पर्यायः॥
॥अस्मिन्पर्याये उत्तमपादाभ्यासः। मैत्रावरुणस्य। अभिहिंकृत्य शोंसावो३ मा त्वेता नि षीदतेति स्तोत्रि
यः। आ त्वा द्यात्र वा गहीत्यनुरूपः। न कि रिन्द्र त्वदुत्तर इति तृचः। ऐभुचा कं धिपुरुहूतेति तृचः। प छः।
अं त्या परिधानीया। इदं त्यत्पात्रमिति याज्या। अथ ब्राह्मणाच्छंसिनः। अभिहिंकृत्य शोंसावो३ योगे
योगे तवस्तरमिति स्तोत्रियः। युञ्जन्ति ब्रध्नमरुषमित्यनुरूपः। यदिन्द्राहं यथा त्वमिति तृचः। ता वज्रि
णं मंदिनं स्तोम्यमिति तृचः। प छः। अं त्या परिधानीया। इती शाचीव स्तव वीर्येणेति याज्या। अथाच्छावा
कस्य। अभिहिंकृत्य शोंसावो३ मिन्द्रः सुतेषु सोमेषु इति स्तोत्रिया। य इन्द्र सोमपातम इत्यनुरूपः। अ
प वा आ त्वा विशंत्विंदवः। आ त्वा विशंत्वाशव इति स्तोत्रियानुरूपौ। अहीनरात्रिपक्षे छंदोगवशान्नि

मं॰टी॰६ र्णयः। अनुरूपानंनरमाहुय आघाये अग्निमिंधत इति तचः। प्रनेनाकंनसमनेवचस्तुवमिति तचः। प
१५८ छः। अंस्यापरिधानीया॥ प्रो द्रोणो हरस्य इति याज्या॥ ॥अथ निहस्ताश्विनस्य कृप्तिः॥ ॥उपदेक्षो
नोच्यते। अभिहिंकृत्यशोंसावो३मग्निर्होतागृहपतिः सराजेति पच्छः। यजिष्ठः सप्रथजनामन्तावों३मु
पप्रयंतो अध्वरां। अग्नेयस्मिस्त्वं दमो३मवानो अग्नजूतिभिः। होतागणी तउक्थ्यो३मग्निमीळे पुरोहि

158

तं। सचस्वानः स्वस्तयो३मग्निं दूतं वृणीमहे। इमं स्तोमं जुषस्वनों३ वसिष्ठा हि मियेध्या। उक्थैरग्निर्बृह
द्भानों३ त्वमग्ने ब्रतपा असि। वाजे शुचिव्रराधसों३ त्वं नो अग्नेमहोभिः। सखेवसोजरित्भ्यो३मिमेवि
प्रस्यवेधसः। प्रण आयुर्वसोति रें३ त्वमग्ने वसूंरिह। वर्हिरासाद्यावसो३मबोध्यग्निः समिधाजना
नां। पच्छः। दिवीव रुक्ममुरुव्यंचमश्वो३मगान्म महा नमसायविष्ठं। पच्छः। यूयं पात स्वस्तिभिः सदानो३ रम॰
मग्नेविवस्वदुषस इति प्रगाथं ककुबुत्तरं कारं। असेमधेहि अवो बृहो३मेनावो अग्निं नमसा। अग्निर्ज १५९

नायद्गस्युषों ३ प्रवोयह्वं पुरूणां विश्वंसमत्रिणं दहे २ मग्ने वाजस्य गोमतः सतिग्मजंरक्षसो दह प्रतीं ३
पुरूत्वा दाश्वान्वोचे। प्र प्रे ते अग्ने वनुषः स्यामों ३ जनस्य गोपा अजनिष्टजागृविः प छः। तामाहुः सहस
स्पुत्रमंगिरो ३ मृग्निं तमन्ये यो वृसुः इति पङ्क्ति ञः सनं। इ यं स्तोत्रमप्य आभरे ३ प्रति ष्या सूनरी जनी। उ
षः शुक्रेण शोचिषोमुषो भद्रेभिरागहि। गीर्भिः कण्वा अहूषतो ३ मिदं श्रेष्ठं ज्योतिषां ज्योतिरागात्। अदितिः
सिंधुः पृथिवी उत द्यौं ३ प्रत्यु अदर्श्यायती। उषा उछन्द पस्त्रियों ३ मुषस्तच्चित्रमाभर॥ अथा नो विश्वा सौ
उ(सा) भगान्या वहों ३ मे तौ उषः स के तुम क्रत इति प छः। गावो न व्रजं व्युषा आवर्त्तमों ३ म हे नो अद्य बोधये ति प
द्भिः। सुजाते अश्वसूनृतो ३ मे षो उषा अपूर्व्या। अविद्रिया भिरूतिभों ३ यद्य दघस्यःपसा वति। अवोचाम नमहे
नमो ३ मा भात्यग्नि रुषसामनीकं। आ विश्वान्यस्तां सोमगानो ३ मतारिष्मतमस ०प छः। यूयं पात स्वस्तिभिः स
दा नो ३ भिमा उ वां दिविष्टयः। उतस्त्रियं ति सुस्रितो ३ मश्विना वर्त्तिरस्म दा गोमद्दस्रा हिरण्यवत्। उप र्ब्बु धो व ह न्तु सो

मं॰ टी॰ ६ मपीतयो ३ मबोध्यग्निर्ज्म उदेति सूर्यः। यो वां हविष्मान्मनसा ददाशो ३ मीळे द्यावापृथिवी पूर्वचित्तये। अदि
१५९ तिः सिंधुः पृथिवी उत द्यौः ३ प्रति प्रियतममिति पंक्तिः। माध्वी मम श्रुतं हवं ३ सूर्यो नो दिवस्पातु। विप्रस्येमन्त
चक्षसो ३ मुदुत्यं जातवेदसं। ताभिर्याति स्वयुक्तिभिः ३ चित्रं देवानामुदगादनीकं पद्घः। अदितिः सिंधुः पृ
३५॥ थिवी उत द्यौः ३ नमो मित्रस्य वरुणस्येति पद्घः। तस्मिं तदेनो वसवो नि धेतनो ३ मिन्द्र क्रतुं न आभर। अ
159 ति स्पूरतरा ममसो ३ मभि त्वा शूरनोनुमः। गव्यंतस्त्वा हवामहे ३ बृहद्बः सूर च सुसः। स त्वं राजान आश्रा
तो ३ मसौ द्यौः पृथिवी च नः। पिपृतां नो भरीमभिः ३ ते हि द्यावापृथिवी पद्घः। देवो देवी धर्मणा सूर्यः शुचो ३
विश्वस्य देवी मृचयस्य जन्मनः। न या रोषाति न ग्रभोः ३ शो सा वां ३ बृहस्पते अति यदर्यो अर्हादिति परि
धानीया। आश्विने नग्रहेणेत्यादि समाने॥ ॥अथ षष्ठं रोगानुसारेण अतिरिक्तमुक्थमभिष्टु ष्टोयदा॥ राम॰
॥त्रिकद्रुकेषु महिषो यवाशिरं तुविं तिघ्नं रोगाः तस्य शास्त्रस्य स्वरूपमुच्यते॥ ॥अभिहि कृत्यशों सा वो ३ १५९

त्रिकद्रुकेषु महिष इति स्तोत्रियस्तृचः। प्रो घस्मै पुरोरथमित्यनुरूपस्तृचः। अर्द्धर्चशः। अपवा ऐन्द्रयास्तु
पनः पस्यवत इत्येका। इंद्रमहि घोर सुरो अनम्नते त्येका। प्रो घस्मै पुरोरथमित्येका। एतास्तिस्रोनुरूपः
सा स्तोत्रियानुरूपौ। अर्द्धर्चशः शस्यौ। शो वो अमहां इन्द्रो नवदाचर्षणिप्रा इति सूक्तं त्रयोदशार्चं पच्छः शस्तु
र्जनित्रीति सूक्तं त्रयोदशार्चं पच्छः। अंत्या परिधानीया॥ त्वेषमित्थासमरणं शिमीवतोरिति याज्या। आश्विन
विमानानां वङ्गसः॥ ॥अथ समसुत्यायां प्रायश्चित्तं॥ नद्यावापर्वतेन वा अव्यवधाने कृते सति। इदं प्रायश्चित्तं। सव
ग्रस्तवसंनि नदेवतावाहनपर्यन्तलयः कर्त्तव्या। लघवश्चो पायाः शतप्रभृत्यादयः। मरुत्वतीयशस्त्रे विशेषः। प्रति
पातेसंस पदनुचरः सरभ्य मरुत्वतीय प्रगाथान्तं शस्त्वाहूय कया शुभा सवयसः सनीळा इति सूक्तं पञ्चदशार्चं प
वोभर्ववलि च्छः शस्त्वा ऽनाहूय जनिष्ठा उग्र इति सूक्ते निविदादि समानं। निष्केवल्ये विशेषः। स्तोत्रियानुरूपादारभ्य
साम प्रगाथान्तं शस्त्वाहूय यो जात एव प्रथमो मनस्वानिति सूक्तं पञ्चदशार्चं पच्छः शस्त्वा ऽनाहूय इन्द्रस्य

मं॰प्रा॰६ नुवीर्याणीतिसूक्तेनिविदादिसमानं।वैश्वदेवशस्त्रेविशेषः।प्रतिपदनुचरौदशरश्म्यएवापित्रेविश्वदेवाय
२६० वृष्णइतिएतदंतंशस्त्राहूयममाग्नेवर्चइतिसूक्तंनवर्चपच्छःशस्त्वानाहूयआनोभद्राइतिसूक्तेनिवि
दादिसमानं।जनिष्ठाउग्रइत्यस्यनुवीर्याण्यानोभद्राइत्येतेषुसूक्तेषुनाहावः।अग्नेकंचेत्प्रथमेघाव
इतिवचनात्।अपिवा।कयाशुभायोजातएवप्रथमोममाग्नेवर्चइतिसूक्तेषुनिविदस्थानेषुनिविदोदध्या
160
त्।अस्मिन्पक्षेइतराणिसूक्तान्युद्धरेत्॥ ॥इतिसमस्तुत्याविषयकंप्रायश्चित्तं॥अथनिविदातिक्रमेप्रायश्चि यि
त्तं।यत्रनिविदस्थानंविहितंतदतिक्रम्यअवसानेयद्यवसानंभवति।तदाइदंप्रायश्चित्तं।यस्मिन्सूक्तेनि
विदतिपद्यतेनतत्पुनःपठनीयंकिंतुतत्सूक्तशेषंसमाप्यानाहूयमाप्रगामपथोवयमितिषड्चंसूक्तंअ
र्द्धर्चशःशस्त्वानाहूयतन्निविदंदैवत्यंसूक्तंअन्यदाहृत्यतस्मिन्सूक्तेनिविदस्थानेनिविदंदध्यात्।तत्रो प्रम॰
दाहरणं।मरुत्वतीयशस्त्रेजनिष्ठाउग्रइत्यस्मिंसूक्तेनिविदमतिपद्येततत्सूक्तशेषंसमाप्यअनाहूय २६०

पंचदशार्चं

मा प्रगाम पथो वयमिति षड्ढं सूक्तं अर्द्धर्चशः शस्त्वाहूय कया शुभीयं सवयसः सनीळा इति सूक्ते नि
विदं दधीत समानं [illegible] पच्छः। एवं निविद्धानीयसूक्तेषु सर्वत्र द्रष्टव्यं। सूक्तग्रहणं बृहस्प
तिसवादिषड्हीनस्तोमेषु मा प्रगाम पथो वयमित्यखंडितं शंसनीयं। निष्केवल्ये चेत्। यो जात एव प्रथ
मो मनस्वानिति पञ्चदशार्चं ऐंद्रं पच्छः। वैश्वदेवशस्त्रे चेत्। तद्देवस्य सवितुरिति सावित्रं सप्तर्चं नि
विद्धानीयं पच्छः। ते हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीयं पंचर्चं निविद्धानीयं पच्छः। अनश्वो
जातो अनभीशुरुक्थ्य इत्यार्भवं निविद्धानीयं नवर्चं पच्छः। परावतो ये दिधिषंत आप्यमिति सप्तदशार्चं वै
श्वदेवं निविद्धानीयं पच्छः। आग्निमारुतशस्त्रे चेत्। वैश्वानराय धिषणामृतावृध इति पंचदशार्चं वैश्वा
नरीयं निविद्धानीयं पच्छः। धारावरा मरुत इति मारुतं पञ्चदशार्चं पच्छः। त्वमग्ने प्रथमो अंगिरा इति जा
तवेदसं अष्टादशार्चं पच्छः। एवं सर्वेषु क्रतुषु द्रष्टव्यं॥ ॥इति निविद्धानीयातिक्रमे प्रायश्चित्तं॥ ॥अथ सो

मातिरेके प्रायश्चित्तं ॥ सोमातिरेके स्तुतशस्त्रोपजन इत्यादि प्रातःसवने अच्छावाकशस्त्रादूर्ध्वं सोमाति
रेकस्तदा होतुः शस्त्रं । अभि हिं कृत्वा हूय अस्ति सोमो अयं सुत इति स्तोत्रियस्तृचः । गौर्धयति मरुतामिति त
चोनुरूपः । महां इन्द्रो नृवदा चर्षणिप्रा इति सूक्तं त्रयोदशर्चं पच्छः । विष्णोर्नु कमिति षळृचं सूक्तं पच्छः ॥
अस्यांतत्यापरिधानीया । ऐं आयज्ञेता इन्द्रदेवत्या याज्या वैष्णव्या वा विष्णुदेवत्यया वा । ऐंद्रवैष्णव्य ऋचा वा इ
ति गाणगारिः । संवां कर्मणा समिषा हिनोमीति याज्या ॥ माध्यंदिने सवने । अभि हिं कृत्य बलमहां असि सू
र्य इति स्तोत्रियस्तृचः । आहूय उदुत्यद्दर्शतं वपुरिति अनुरूपस्तृचः । महां इन्द्रो नृवदा चर्षणिप्रा इति सू
क्तं त्रयोदशर्चं पच्छः । विष्णोर्नु कमिति सूक्तं षळृचं पच्छः ॥ उत्तमा परिधानीया । याविश्वासां जनितारा मती
नामिति याज्या ॥ तृतीयसवने चेद्रिच्यते । तदा उक्थ्यसंस्थं कुर्वंति । यदि षोडशिन्यतिरिच्यते वदा अतिरात्रसं एम॰
स्थं कुर्वंति । अतिरात्रे रिच्यते चेत्तदा द्विरात्रं कुर्वंति ॥ द्विरात्रे चेद्रिच्यते तदा । आहूय प्रतत्ने अघशिविवि २६१

ष्टनामेति स्तोत्रियस्तृचः। आहूय प्रतद्विष्णुस्तवते वीर्येणेति तृचोऽनुरूपः। महां इन्द्रो नृवदा चर्षणिप्रा इति स
मानं। त्वेषमित्था समरणं शिमीवतोरिति वा याज्या। माध्यंदिनोक्तो वा आश्विनवद्वस्य विधिः। अत्यग्नि
ष्टोमवाजपेयाप्तोर्यामेषु तृतीयसवनेषु सोमातिरेके इदमेव शास्त्रं भवति॥ ॥इति सोमातिरेकप्रायश्चि
त्तं॥ ॥क्रीते राजनि नष्टे दग्धे वा सोमे दग्धानि सदो हविर्धानानि यदि भवंति। पुनः समंत्रकाणि अमंत्रका
णि वा क्रियेरन्। यथापूर्वं समंत्रकाणि अमंत्रकाणि वा कृतानि तथा कुर्युः। विगमे सोमे पूतीकान् फाल्गुनानि
च संसृष्टाभिः अभिषुणुयुः। पूतीकाश्चाभेये सोमसदृशास्ते वा फाल्गुनानि वागत्कं ति। फाल्गुनानामभावे अ
न्या वा ओषधयः कुशा दूर्वाघाः पूतीकैः सहाभिषुणुयुः। पूतीकाभावे। अन्या ओषधयः सोममिश्रिताभिरभिषु
तव्यं सद्योदुग्धक्षीरं प्रातःसवने पूतीनां अभिषवार्थं मिश्रणं भवति। शृतं क्षीरं माध्यंदिने मिश्रणं॥ दधि तृती
यसवने मिश्रणं॥ श्रायंतीयं ब्रह्मसाम भवति यदि फाल्गुनानि अभिषवनानि वारवंतीयं यज्ञायज्ञीयस्य स्थाने

ब्रह्म

मं॰टी॰६ सामभवति आयंती यमेके। अस्मिन्पक्षे अस्य साम प्राकृतमेव भवति। अनुरूपोत्तरं आहूय यज्ञायज्ञीय इति
२६२ प्रगाथं यथासमाम्नायं शंस्ता हूयदेवो३ यज्ञायज्ञीयस्य त्वक्रियमाणस्यापि सानुरूपां योनिं व्याहावं शंसेत्।
ऊर्ध्वमितरस्यानुरूपात्ततः स्तोत्रियानुरूपौ तु घं हेगव श्रा इद्दितयोः। विशेषस्तु वोद्रविणोदा इति प्रगाथं यथा
162 समाम्नायं शंसेत्। प्रगाथपनेन कर्त्तव्यमिति विशेषः। एवं प्रतिनिधिनाक्रियमाणं प्रयोगं॥ एकदक्षिणं यज्ञं समा
प्य। उदवसायपुनर्यजेत तेनैव यज्ञेन तस्मिन्यज्ञे पूर्वस्य यज्ञस्य या दक्षिणा विहितास्ता दद्यात्। इदमेकाहेषु
प्रायश्चित्तं। समनियमे प्रत्यासन्नेषु गृहेषु च॥ ॥दीक्षितानामुपतापे॥ ॥तान्यवक्षितो। परिहिते प्रातर
नुवाके। अनुपाकृते वा। पुष्टिपत इत्यनेन मंत्रेण ब्रह्माहवनीये स्रुवेणाज्याहुतिं जुहुयात्। हुतान्शीतोष्णा
अपः समानीय। एकविंशतिमासु यवाङ्कुशाधिं जूलान्यवधाय। ताभिरद्भिरवर्षं कृत्वा। न तत आचमनवर्जं एम॰
ताभिरेव व्याधिनं आप्लावयेत्। स ब्रह्मा जीवानामस्यनेसेव मादिमंत्रे। अभिसेचतस्य स्थाने द्वितीययाविभक् २६२

सा व्याधितस्य नामग्रहणी यात्। औषधिसूक्तेन चाप्ला व्याधितं विसृजेत्। तत्र ब्रह्मा उपांशुं तर्यामेन प्राणा
पानौ पातामित्येवमादिमंत्रैर्यथालिंगमंगानि संमृशेत्। असावेतस्य स्थाने आमंत्र्य पाविभक्त्या व्याधितस्य
नामग्रहणीयात्। यथा समानक्रमणं सर्वेषां त्रातारमिन्द्रमवितारमिन्द्रमिति ताक्ष्यो दिरष्टिका द्वयमभ्य भव
ति। यदि अन्यदेकाहिकाद्वैश्वदेवसूक्तं भवति। तत्तु स्वस्त्यात्रेये सक्तिनो मिमीतामश्विना भग इति तचेनिविर्दद
ध्यात्। एवमहरहः प्रकृत्या गदे॥ ॥संस्थिते व्याधिते मृते तीर्थेन निर्हृत्य। अवभृथदेशं प्रक्षाल्यालंकारं कु
र्वंति। केशरमश्रूणि। अग्नीनस्य प्रेतस्य समारोप्य दक्षिण दक्षिणतो बहिर्वेदि दहेयुः। संस्थिते भूमिभागे भया
दितस्य दहनं कुर्युः। आहार्येण नाहिताग्निं प्रेतं दहेत्। पत्नी चेत्। आहिताग्नेः पत्नी किमपि आसार्ये णैव प्र
ते य प्रकारांतरेण महस्समापयेयुः। प्रातरनभ्यास मनभिहिंकृत्या निराश्नादीनि सामिधेनीषु प्रथमाया
आमजं इति बहूरूचो धाय्या। अथ वेकल्पानि स्वयामातरूपाणि। पुराग्रहणा तीर्थेन निष्क्रम्य त्रिः प्रदक्षिण

मं·रि·६ मा[?]श्मानं परीत्य। उपर्युपरि चरंति। तस्य श्मशानस्य पश्चात्। होतोत्तरो ध्वर्युः। अध्वर्योः पश्चात् छंदोगा
१६३ अ[illegible]न्येषामनियमः। आयं गौः पृश्निरक्रमीदित्युपांश्वनुवते। छंदोगास्तु तस्मिन्नेव पुनर्होता। अप्र
दक्षिणं श्मशानं कुर्वंति। स्तोत्रियमनुद्रवेयुः अप्रदक्षिणं। आयं गौः पृश्निरक्रमीदित्येतत्त्रियंयमी
163 स्यानद्रवेत्। प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति। एवमाघाउरूणसावसुतपाउदुंबलाविति एवमंताय थाम्ना
यसमाम्नाताः। अनुदुत्य ततः संचयनं कुर्वंति। संचित्य तनीर्थेन उछ्रीमिप्राप्य यथासुमनसो देयुः। सोमस्ये
षु प्राणभक्षान्भक्षयित्वा दक्षिणे मार्जालीये निनयेयुः। सप्तदशस्तोममहर्भवति। त्रिवृत्स्तोमा रथंतरपृष्ठोग्नि
ष्टोमसंस्थो भवति। एष एव च अधिके भवति। संस्थिते वभृथमेके गमयंति। अस्थीनि षायततः समं समा
पयेयुः। समाप्य संवत्सरादेनं प्रेतमग्निष्टोमेन याजयेत्। अनंतरमुक्तेन अपथअपथविधिर्भवति। नेकल्प एम०
तो तस्य निर्मथ्येत दस्य ये अग्नयास्तेषु नीदिष्टा दासयितव्यः। अपसमारोपपार्थं अग्निष्टोमेन सह विकल्पः। १६३

अनंतरेणेति। अपि वोत्थानं गृहपतिरमणे प्रवृत्तमहः समापयित्वा उत्थानं वा कुर्युः। उत्थानपक्षे प्रवृत्तं कर्म
कृत्वा इतरे यजमाना मुखी समुखी समारोप्या उद्दिवयजनान्मथित्वेत्येवमादिकर्म कुर्वंति। गृहपतिस्तु ने
ष्वेवाग्निदहनं कर्तव्यं। पूर्ववत्क्रेतास्थे प्रदक्षिणक्रमश्रानं परीत्य एवमादि उक्तं। अतः शास्त्रविकार इति व
चनात्। एककाहेषु मृतः यजमानः समे सपीन संस्थिते। एकाहे अहीने वा। आवाहनो अस्तु अवभृथं गमयेयुः।
इत्यालेखन आचार्यसंततेन अग्निमभिश्च अथवा पूर्वे णास दो दहेयुः इत्याश्मरथ्य आचार्ये पूर्ववत्। ए
ष एवावभृथ इति॥ ॥समाप्तानि सौमिकानि प्रायश्चित्तानि॥ ॥अथाप्तोर्यामस्य प्रयोग उच्यते। अयमेकाहि
को नित्य इति वैदिका वदंति। सप्तानां सोमसंस्थानामंतर्भूतत्वात्। अपरे अन्यथा वदंति। अथ ज्योतिरप्तोर्याम इ
ति। अप्तोर्यामांतरं छंदोगाश्चामनंति। सनित्यः। अयं तु कामनाश्रवणात्काम्य इति वदंति आप्तोर्याम इति। अ
यमर्थो विद्वद्भिर्विचारणीयः॥ अथ सर्वस्तोमस्य सर्वपृष्ठाप्तोर्यामस्य प्रयोग उच्यते। तस्य प्रागाज्यशस्त्राद्दनिर

मं॰ दी॰ ६ त्ववत्। आज्यशस्त्रे। सोऽअध्वरा करति जातवेदो मित्रसंतं प्रहुतिव ष्ट्वा अग्निं नरो दीधितिभिरिति सूक्तं पञ्च

१६४ विंशतिऋचं अर्द्धर्चशः शंसेत्। अस्याघोंसविता हुं शंसेत्। उत्तमा परिधानीया। सर्वत्र याज्या प्राकृता एवा ए

काहिकमेव प्रउगं। अथ होत्रकाणां शस्त्राणि। तत्र छंदोगा गार्भकारं चेत्स्तुवंति तदा स्तोत्रियानुरूपा अपि गर्भ

164 कारं भवंति॥ ॥मैत्रावरुणस्य शस्त्रे॥ अभिहिं कृत्वा हूयन्ते आ नो मित्रावरुणेति तृचः। ता नः शक्तं पार्थिवस्येति तृ

चो गर्भः। पुनरा नो मित्रावरुणेति तृचः स्तोत्रियः। शों॰ मा नो गंतं तन्वेमिति चैं। तान क्षिपेतिति तृचो गर्भः। पुनरा नो गंतं रि

शादसेति तृचोऽनुरूपः। शों॰ स सुपः परिषस्वज इति नाभाकस्तृचो गायत्रीकारः शस्यः। षड्गायत्रीकृत्वे सर्वशः। यः

ककुभो निधारय इति वा तृचः। मित्रं वयं हवामहे मित्रं हुवे पूतदक्षं। अयं वां मित्रावरुणा पुरूरूणा चित्यस्तीति

तृचावास्तुतारः। एतेषां तृचानां षड्हस्तोत्रिय इति संज्ञा। परिशिष्टा वाप इति च। काव्येभिरदाभ्येत्या वापस्तृचः पत ए म॰

द्वेवनमन्यं पूर्वस्यस्याने कुरुतेति वचनात्। नेकासनेद्भिः शंसेत्। प्रतिवां सूर उदित इति द्वे शस्त्वा हूयते स्ना १६४

मदेववरुणेति परिदध्यात्। अर्द्धर्चशः शस्यं। अथवा मित्रं वयं हवामह इति स्तोत्रियः॥ ॥अथब्राह्मणाच्छंसिनः
॥ ॥अभिहिं कृत्स आयाहि त इति स्तः। पुनरायाहि सुषुमाहित इति तिस्रः। इन्द्रमिद्गाथिनो बृहदिति द्वे। इन्द्र वाजेषु
नो व इत्येका गर्भः स्तोत्रियः। ओं। मा नो याहि सुतावत इति तिस्रः। आ घा गमद्यदि श्रवदिति तिस्रः। गर्भः पुनरा नो या
हि सुतावत इत्यनुरूपः। ओं। पूर्वीष्ट इन्द्रोपमातय इति नाभाकस्तृचो गायत्रीकारः शस्यः। आयाहि सुषुमाहित इ
ति तृचः। इन्द्रेण संहि दृक्षस इत्येका। आरं हस्व धामन्निति द्वे। इन्द्रो दधीचो अस्थभिरुनिष्ठन्नोजसा सहभिंधि विश्वा
अप द्विष इति त्रयस्तृचाः। एते पञ्च तृचाः षड्ह स्तोत्रियाः। उद्धेदभि श्रुतामघमिति द्वे। ऋा स्त्वा हूयसन इन्द्र। शिवः स
खेति परिदध्यात्। अयं ऐकाहिकस्तृचः। उक्थं वा चाति शस्त्वा जपः॥ इन्द्र क्रतुविदं सुतमिति याज्या। केचिद्योगे यो
गे तवस्तरमित्येनं तृचमनुरूपमिच्छंति। केचिदायाहि सुषुमाहित इति प्रगाथं स्तोत्रियमिच्छंति। छंदोगवशान्निर्ण
यः॥ ॥अथाच्छावाकस्य॥ ॥इन्द्राग्नी आगतं सुतमिति स्तोत्रियस्तृचः। तमीळिष्व यो अर्चिषेति तिस्रः। गर्भः। पुन

मं॰टी॰६ रिन्द्राग्नी आगतं सुतमिति तिस्रः स्तोत्रियः। ओं॰ मिन्द्राग्नी अपसस्परीति तिस्रः। आ सुते सिंचत श्रियमिति ति
१६५ स्रः। पुनरिन्द्राग्नी अपसस्परीति तिस्रः इत्यनुरूपः। ओं॰ ताहि मध्यं भराणामिति नाभाकस्तृचो गायत्रीका
रः शस्यः। इन्द्रे अग्ना नमो बृहन्नाकुवेयथो रिद्मियं कामस्य मन्मन इन्द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्वि
165 जा इति पञ्च तृचाः षष्ठः स्तोत्रियाः। इन्द्राग्नी अवसागतमिति द्वे शस्त्वा हूयमानो मह्निरएवच द्वितिपरिदध्यात्।
इति ऐकाहिकस्तृचः। सर्वमर्द्धर्चशः शस्यं। तृतीयसवने महावालभिदं चेन्मैत्रावरुणस्तदा पूर्वोक्तप्रका
रेणैव होत्रकाणां शस्त्राणि। तयोरन्यतरं चेछंसेत्तदा नाभाकस्तृचा न भवंति स्तोत्रियानुरूपानंतरं ष
ळहः स्तोत्रिया एव। अन्यत्समानं॥ ॥अथ माध्यंदिने होतुर्मरुत्वतीये॥ अभि हिंकारा हावो। आला ए म॰
रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरौ। ओं॰ मिन्द्र नेदीय एदिहि प्रैतु ब्र १६५
ह्मणस्पतिरुत्तिष्ठ ब्रह्मणस्पते प्र नूनं ब्रह्मणस्पतिः इति चत्वारो द्वृचा ब्राह्मणस्पत्याः प्रगाथा बृहतीका

रः शंस्याः। बृहतीकारमितरेषु षष्ठेष्विति वचनात्। चतुर्थषष्ठौ पादौ द्विरभ्यस्य तत्रैवावसाय उत्तरौ पादौ
समस्य प्रणुयात्। एतद् बृहतीकारशंसनं। एषां प्रगाथानां सकृत्स्वयग्वाह्वानं कर्तव्यं। अनेकानंतर्ये सकृत्स्व
यग्वाह्वानमित्युक्तत्वात्। शों३ऽमग्निर्नेता॰ शों३ त्वं सोम क्रतुभिः। शों३ पिन्वंत्यप इति तिस्रो धाय्याः प
च्छः। शों३ प्रव इन्द्राय बृहते बृहदिन्द्राय गायत नकिः सुदासो रथमिति त्रयः प्रगाथा अर्धर्चशः शंस्याः।
एतेषामपि सकृत्स्वयग्वाह्वानं। शोंसावों३ कया शुभेति पञ्चदशर्चं सूक्तं पच्छः शंस्यं। जनिष्ठा उग्र इति से
कादशर्चं निविद्धानीयं पच्छः शंस्या निविदत् उत्तमा परिधानीया॥ ॥अथ यज्ञस्त्र याज्यर्चो॥ अस्मिन्श
स्त्रे बृहतीकारमित्युक्तं न तत्संबद्धं। ककुबुत्तराकारमेव॥ ॥निष्केवल्ये॥ ॥त्वामिद्धि हवामहे त्वं ह्ये
हि चेरव इति द्वे बृहतीकारं। पिबा सोममिन्द्र मंदतु त्वेति तिस्रोऽर्धर्चशः। अस्मिन्नृचे मस्य चं मध्यमे षु पा
देषु न्यूंखः। हु षाकपो न्यूंखो रद्धिःष्यते। आसामर्धर्चावसानेषु न्यूंखादि प्रतिगरः। प्रणवेषु प्रतिगरः प्रा

मं॰टी॰६ क्रतः।पुनस्त्वामिद्धिहवामहइतिपूर्ववत्।इतिस्तोत्रियः।शोंसावो३त्वंह्येहिचेरवइतिद्वेह्नहतीकारं।श्रुधीह
१६६ वंविपिपानस्याद्रेरितितिस्रोर्द्धर्चशः।अस्मिन्नपित्वेमध्यमेषुपादेषुन्यूंखः।प्रतिगरश्चपूर्ववत्।पुनस्त्वं
ह्येहिचेरवइतिद्वेपूर्ववत्।इत्यनुरूपः।शोंसावो३सद्यावानेतिधाय्या।शोंसावो३अभित्वाशूरनोनुमउभयंशृण
166 वच्चनस्त्वमिन्द्रप्रतूर्तिषु।इतित्रयःप्रगाथाअर्द्धर्चशःशस्याः।एतेषामपिसकृत्स्वथग्वाह्वानं।शोंसावो३
तदिदासेतिसूक्तंनवर्चंपच्छःशस्यं।इन्द्रस्यनुवीर्याणीतिपंचदशर्चंसूक्तंपच्छोनिविद्धानीयं।अष्टौश
स्त्वानिवित्।उत्तमापरिधानीया॥ ॥अथमैत्रावरुणस्य॥ ॥अभिहिंकारआहावो।कयानश्चित्र
आभुवदितितिस्रोर्द्धर्चशः।विदामघवन्विदेत्यादिनवर्चोमहानाम्न्यस्तिस्त्रिभिरर्द्धर्चैरवसायत्रिभिःप्र रा॰मं॰
णुयात्।एवंकृतेनचतस्रऋचोभवंति।तासामुत्तमेनप्रणवेनएवाह्येवेवाइत्यादीनिनवपुरीषप १६६
दान्युपसंतनुयात्।तानियथापथमेवशस्त्वा।शंसनप्रकारः।विदामघवंनिस्सादिप्रचेतनप्रचेतये

सेवमंतमनवानमुत्क्वावस्येत्। इन्द्रद्युम्नायेत्यादि आरभ्य आयाहि पिबमत्स्वेति प्रणुयात्। विदारा
यइत्यारभ्य चिकित्वो अभिनो नयेत्येतदन्तमनवामुकूलावस्येत्। इन्द्रो विदेतमुस्तु यइत्यारभ्य क्रतु
म्छंदस्ऋतं बृहोमिति प्रणुयात्। इन्द्रं धनस्येत्यादि एहि नो वसविस्यंतमुकूलावस्येत्। पूर्त्तिः त्राविषे
त्यादि सुत्रोवो अद्ध्योमिति प्रणवेन॥ एवात्येवेवाहीत्यादि पुरीषपदान्युपसंतनुयात्। यथापठितं
विदामघवन्विदेंउइति प्रणवेन कयानश्चित्र आभुवदिति तृचमुपसंतनुयात्। इति स्तोत्रियः। शोउक्
यात्वंनऊत्येतिति स्तोत्रीर्द्धर्चशः। स्वादोरित्थाविषूवत उपनो हरिभिः सुतमिन्द्रं विश्वा अवीवृधंनिति तृचपर्यु
चाः। अध्यकारं तिस्रः कुलाशंसेत्। तत्रैवं प्रकारः। स्वादोरित्थेत्यादि सोमं श्रीणंति ष्श्नयइत्येवमंतमन
वानमुकूलावस्येत्। प्रियाइन्द्रस्येत्यादि पूर्वचित्तये वस्वीरनुस्वराज्योमिति प्रणवेन उपसंतनुयात्। उपनो
हरिभिः सुतमित्यारभ्य शानक्रतुरित्यंतमनवानमुकूलावस्येत्। उपनो हरिभिः सुतं त्वं हि ह्वन्त्रहं नित्यादि

मं०टि०६ भिः सुतोमिति प्रणवेन। इन्द्रं विश्वा अवीवृधन्नित्यार भ्यन्त्रा वसस्पत इत्यंतं अनवानमनुकूलावस्येत्। त्वामभि
१६७ प्रणोनुम इत्यार भ्यमंहते मघोमिति प्रणवेन॥ कयात्वं न ऊत्येत्युपसंतनुयात्। पुनः कयात्वं न ऊत्येति पूर्व
वत्। इत्यनुरूपः। ओं ३ कुस्तमिन्द्र त्वावसुमित्येकाहिकः प्रगाथोर्द्ध्वर्चेन्द्राः। मोषुत्वा वाघतश्चनेत्निसहिप
रः सामप्रगाथोर्द्ध्वर्चेन्द्राः। होत्रकाणां सामप्रगाथेभ्य आहावो नास्ति। पंचाहावानि माध्यंदिन इति वचना
त्। एवात्येवैवात्यग्ना उपसमस्येद्धिपदां। रथेन पारमार धुरायस्कामोवज्रहस्तं सुदक्षिणं पुत्रो न पित
रं हुवे ओं ३ शो० सत्रामदास० पंचर्चे पञ्चः सामसूक्तमासत्यो यातिति अहीनसूक्तमेकविंशान्त्यर्चं पञ्चः।
एवात्वामिन्द्रेत्येकाहिकं सूक्तमेकारन्त्यर्चे पञ्चः। अंत्यापरिधानीया। षळ्हस्तोत्रियावापात् अहीनसू
क्तप्राप्तिः॥ अथब्राह्मणाछंसिनः॥ ॥अभिहिंकृत्याहूय अभिप्रवः सुराधसमिति द्वे। यत्द्यावइन्द्र ते श रामं०
तमिति द्वे गर्भः। पुनरभिप्रवः सुराधसमिति द्वे। एते प्रगाथाहृतीकारः त्र्यस्या। एतास्तोत्रियः। शोंसावों १६७

३ प्र सु श्रुतं सुराधसमिति द्वे। यदिंद्र यावतस्त्वमिति द्वे। पुनः प्र सु श्रुतं सुराधसमिति द्वे। एते प्रगा-
थाह्वतीकारः त्रासाः। इत्यनुरूपः। ओंसावो ३ सुद्वस्येम धुमत्तमा इत्यैकाहिकः प्रगाथो र्धर्चन्नाः त्रास्यः।
इन्द्र त्रिधातु शरणमिति साम प्रगाथो र्धर्चन्नाः। ओंसावों ३ यो जात एव यमो मनस्वानिति साम सूक्तं पञ्च-
दशर्चं पञ्चः। अस्मा इदु प्र तवसे तुराय स्पहीन सूक्तं षोडशर्चं पञ्चः। उदु ब्रह्माणीत्यैकाहिकं सूक्तं षड्-
र्चं पञ्चः। अंत्या परिधानीया॥ ॥अथाच्छावाकस्य॥ अभि हिंकाराहावो। तरोभिर्वो विदद्वसुमिति द्वे ह्व-
हतीकारं। रेवतीर्नः सधमाद इति तिस्रो र्धर्चन्नाः। गर्भः पुनस्तरोभिर्वो विदद्वसुमिति द्वे पूर्ववत् स्तो-
त्रियः। ओंसावों ३ तरणिरित्सिषासतीति द्वे ह्व हतीकारं रेवां इद्रेवतस्तोतेति ओं पुनस्तरणिरित्सिषासती-
ति पूर्ववत्। ओं ३ सुदिंन्वस्मरिज्यत इति ऐकाहिकः प्रगाथः। इन्द्रमिद्देवतातय इति द्वृचा साम प्रगाथो र्द्ध-
र्चन्नाः। ओंसावो ३ मम्भूरेको रयिपते रयीणामिति साम सूक्तं पञ्चर्चं पंक्तः। ऋणस द्वि ह्रिदुहितुर्नपुसंगारि

मं॰ शि॰ ६ सहीनसूक्तं द्वाविंशत्यृचं पच्छः। इमामूषुप्रभृतिमिति सैकादशिकं सूक्तमेकादशर्चं पच्छः। उपोत्तमामुद्धरेत्। उत्त
१६८ मा परिधानीया॥ ॥सर्वत्र शस्त्रयाज्याः प्राकृता एव॥ ॥अथ तृतीयसवने वैश्वदेवशस्त्रस्य प्राकृतौ प्रति
पदनुचरौ शस्त्वाहूय तद्देवस्य सवितुरिति सावित्रं निविद्धानीयं समर्चं पच्छः। एकां त्रिः शस्त्वा निवित्। आहूय एकया
च दशभिश्चेति पच्छः। आहूय कतरा पूर्वा कतरापरायोरिति द्यावापृथिवीयं निविद्धानमेकादशर्चं पच्छः। ए
168 कां त्रिः शस्त्वा निवित्। आहूय सुरूपकृत्नुमूतय इति धाय्या अर्धर्चशः। आहूय अनश्वो जात इत्यार्भवं सूक्तं नव
र्चं पच्छः। एकां त्रिः शस्त्वा निवित्। आहूयायं वेनश्चोदयदिति पच्छः। आहूय ये भ्यो माता इति पच्छः। आहूय एवा पित्रे प
च्छः। आहूय इदमित्था रौद्रमिति पञ्चविंशतिकं पूर्वीव गातुर्दशी शस्त्वानन्तापाद्यसंतं पच्छः शस्त्वा। ये यज्ञेन सैका एम॰
दशर्चं सूक्तं उपसंतनुयात्। अस्य सूक्तस्याद्याश्चतस्र ऋचः पच्छः। उत्तमा चार्त्रिः शस्त्वा अर्धर्चशः। यस्मिन्न १६८
श्वांता असन्नाम वाजोमिति प्रणवेन संग्रहणानो अहिर्बुध्न्यवानिति उपसंतनुयात्। द्वे त्र्यृचौ पच्छः शस्त्वा। स्वस्ति

नो मिमीताम अश्विना भगइति वैश्वदेवं निविद्धानीयं पङ्क्तिः शंसेत्। एकां त्रिः स्थूनि विनत्। अदितिर्द्यौरदितिरिति
परिधानीया पूर्ववत्॥ अथाग्निमारुतं॥ ॥अभि हिंकाराह वो वैश्वानराय धिषणामृतावृध इति पञ्चर्च
शार्चं वैश्वानीयं निविद्धानं पङ्क्तिः। अस्याद्यां पङ्क्ति स्तोगावानं शंसेत्। एकां त्रिः स्थूनि वित्। आहूय शंनः करस्यर्व
त इति धाय्या। आहूय प्रयज्यवइति मारुतं दशर्चं पङ्क्तो निविद्धानं। एकां त्रिः स्थूनि वित्। यज्ञायज्ञा वो अग्नय
इति प्रगाथः ककुबुत्तर एकारः शास्यः। त्वमग्ने यज्ञानामिति तिस्रो द्वे चैत्राः। पुनर्यज्ञायज्ञा व इति पूर्ववत्स्तोत्रि
यः। दिवो वो द्रविणोदा इति प्रगाथः ककुबुत्तर एकारः शास्यः। त्वामीळे अघ द्वितेति तिस्रो द्वे चैत्राः। पुनर्देवो वो
द्रविणोदा इति पूर्ववदस्यानुरूपः। इमं स्तोममर्हते जातवेदस इति जातवेदस्यं निविद्धानं षोडशर्चं पङ्क्तिः
एकां त्रिः स्थूनि वित्। आपोहिष्ठेत्यादि शस्त्रं चोपमेकाहिकमेव॥ ॥अथोक्थ्यशस्त्राणि उच्यंते॥ ॥एन्द्रपु
ब्रवाणित इति तिस्रो द्वे चैत्राः। अग्ने त्वं नो अंतम इति द्वे द्विपदे। तं त्वा शोचिष्ठ दीदिव इत्येका। द्विपदा एताः पङ्क्तिः। ए

मं०टि०६ त्यूषुप्रवाणिनइति पूर्ववत्तिस्रः स्तोत्रियः। शोंऽ३ आग्निरगामिभारतइतितिस्रोऽर्द्धर्चशः। अग्नेभवसुषमिधे
१६० तितिस्रो द्विपदापच्छः। पुनराग्निरगामिभारतइतितिस्रः पूर्ववदनुरूपः। अथाहूयाभिप्रवः सुराधसमित्या
द्यावालखिल्याविहरेत्। विहारस्त्रिविधः। हौंऽडोमहावालभिदृश्चेतितेषांत्रयाणांऐकाहिकोविकल्पः। हों
ऽडविहरणंतावदुच्यते। अभिप्रवः सुराधसमित्यादीनिवालखिल्यसंज्ञकान्यष्टौसूक्तानि। तत्र प्रथमद्वि
169 तीयेसूक्ते षोळशिवत्पादानवग्रहायार्द्धर्चशः शंसेत्। तृतीयचतुर्थे अर्द्धर्चशोविहरेत्। सूक्तशः
पञ्चमषष्ठे विहरेत्। अथवाप्रथमद्वितीयेसूक्ते व्यतिमर्शंपच्छो विहरेत्। तृतीयचतुर्थेसूक्ते व्यतिम
र्शमर्द्धर्चशोविहरेत्। पञ्चमषष्ठे व्यतिमर्शं सूक्तशः। व्यतिमर्शंनाम पूर्वस्यप्रथमामुत्तरस्यद्वितीयया। तयो
र्नीनचौप्रथमद्वितीयाभ्यां पादाभ्यामवस्येत्। प्रथमद्वितीयाभ्यां पादाभ्यां प्रणुयात्। तृतीयोत्तमाभ्यामवस्ये राम०
त्तृतीयोत्तमाभ्यां प्रणुयात्। एवंव्यतिमर्शंविहरणं। एतौ विहारौ हौंऽडिनाविसुच्येते॥ ॥अथमहावालभि १६९

संज्ञको विहार उच्यते। एतान्येव षट् सूक्तानि। अतिमर्शं पच्छो विहरेत्। एतानि षट् स्वसूक्तानि अष्टाविंशति
प्रगाथा भवन्ति। इन्द्रो विश्वस्य गोपतिरित्याद्याः पञ्चैकपदाः सूत्रपठिताः। प्रचेतन प्रचेतयेत्येवमाद्याः। त्रयो
विंशतिर्महानाम्नीमष्टाक्षराः पादा एवं अष्टाविंशतिर्भवन्ति। तत्रैकैकस्मिन्प्रगाथे समाप्ते प्रणवेनावसाय एकै
कामेकपदां प्रणवान्तामुद्धरेत्। अर्धर्चसन्ततामुपदध्यात्। एवं षट् सूक्तानि पच्छो विहृत्य पुनरप्येतानि षट् सू
क्तान्यतिमर्शमर्धर्चशो विहरेत्। तत्रापि ताश्चैकपदाः पूर्ववदुपदध्यात्। पुनरपि विहृत्यतानि षट् सूक्ता
न्यतिमर्शमृक्शो विहरेत्। तत्रापि ताश्चैकपदाः पूर्ववत्। तानि चैवाष्टाक्षराणि पदानि पुनरप्येतान्येव षट्
सूक्तानि यथासमाम्नातमर्धर्चशः शंसेत्। नात्रैकपदा अष्टाक्षराणि उपदध्यात्। एवं चतुष्पदं तास्ताः महावाल
भिदित्युच्यते। एवं विविधो विहारः। एषां विहाराणामन्यतमेन विहारेण षट् सूक्तानि विहृत्य सप्तमे अष्टमे सू
क्ते एवं विहरेत्। अष्टमं शस्त्वा सप्तमं शंसेदित्यर्थः। उभे अर्धर्चशः। तदनन्तरं। इमानि वां भागधेयानीति सोप

म॰टि॰६ षीसंज्ञकं सूक्तंस प्तर्चं पच्छः शंसेत्। अस्य सूक्तस्योत्तमां त्रिःष्टूहूय दूरोहणं रोहेत्। हंसः शुचिषदित्यर्चं पच्छः। ए
१७० तांपुनरर्धर्चशः। एतामेव तृतीयं त्रिपदाशस्त्वा। एतामेव चतुर्थं अनवानं शस्त्वा प्रणवेनावस्य। पञ्चमं तामेव
त्रिपदाशस्त्वा। षष्ठं अर्द्धर्चशः शस्त्वा। एतामेव सप्तमं पच्छः शंसेत्। एतद्दूरोहणं शस्त्वा। इन्द्रावरुणा सोमन
170 समिति त्रिःष्टामृचं पच्छः। आवां राजानाविति ऐकाहिकं सूक्तं पञ्चर्चं पच्छः शंसेत्। उत्तमां परिधानीयां हूय इ
यमिंद्रं वरुणमिति। अभिप्रवः सुराधसमिति षट्सूक्तेषु ॐ मदामो दैवेत्यवसानेषु प्रतिगरः। मदामो दैवोम
येति प्रणवेषु सर्वास्वैकपदासु। ओथामोदैवोमिति प्रतिगरः। प्रणवे प्रणवान्तः प्रतिगरः। शिष्टं प्राकृतः प्रति
गरः। शस्त्वा याज्या प्रकृतिवत् अथ ब्राह्मणाच्छंसिनः॥ ॥वयमु त्वामपूर्व्येति द्वे तिस्रस्कारं ककुबुत्तराकारं श
स्त्वा। इमा नु कं भुवना सीषधामेति तिस्रो द्विपदाः पच्छः। गर्भः पुनर्वयमु त्वामपूर्व्येति पूर्ववत् स्तोत्रियः। योन एम॰
इदमिदं पुरेति द्वे तिस्रस्कारं ककुबुत्तराकारं शंसेत्। हत्वाय देवा इति द्वे द्विपदे अया वाजमित्येकाद्विपदा १७०

पञ्चः गर्भः। पुनर्योन इदमिदं पुरेति पूर्ववदनुरूपः। त्रोंसावो ३म पप्राचइन्द्रेतिसुकीर्तिसंज्ञकं पञ्चर्चं पञ्चः
शंसेत्। अस्य सूक्तस्य चतुर्थीमर्द्धर्चशः। विसोतोरस्य सतेतिह्य षाकपिसंज्ञकं सूक्तं त्रयोविंशत्स्वचं सविग्राहं स
न्यूङ्खं सनिनर्दं पङ्क्तिः न्यूङ्खं शंसेत्। प्रत्यचं प्रथमेर्द्धर्चे विग्रहे तृतीये षु पादेषु न्यूङ्खो निनर्द ऋ प्रथमाक्षरमनुदात्त
मुक्त्वा द्वितीयं स्वरं त्रिमात्रमोकारं कृत्वा उदात्तमुक्त्वा तदनंतरं पंचार्द्धौकारानुदात्तानुक्त्वा पुनस्त्रिमात्रमोकारमु
क्त्वा पुनः पञ्चवार्द्धौकाराननुदात्तानुकृत्वा पुनस्त्रिमात्रमोकारमुदात्तमुक्त्वा पुनस्त्रीनर्द्धौकाराननुदात्तानुक्त्वा
उत्तरेणार्द्धौकारेण पादत्रोपसंदध्यात्। एष न्यूङ्खः। निनर्दो नाम पादांत्यस्वरस्त्रिमात्रमोकारं कृत्वा उदात्तमुक्त्वा
पुनर्द्विमात्रमोकारमुदात्ततरं चो कृत्वा पुनर्द्विमात्रमोकारमुदात्तं मकारांतमुक्त्वा तेनोत्तरपादं संदध्यात्। एष
निनर्दः। अस्योदाहरणं। विहिसोतोरस्य सतनेन्द्रन्देवममंसत। यत्रो ३ ओ ओ ओ ओ ओ ओ ३ ओ ओ ओ ओ ओ
। ओ ३ ओ ओ ओ मदद्वृषाकपो ३ ओ ओ ओ मर्यः पुष्टेषु मत्सखा। विश्वस्मादिन्द्र उत्तरो मिति। एवमेवैतत्सूक्तं

ऐन्द्रा

मं०टि०६ ऋग्योऽविंशद्रौरस्त्वाँइदं जनाउपश्रुतेत्यादिकं तापसंज्ञकं यथापठितं शंसेत्। तस्यादितश्चतुर्दश्याविग्राहं निनर्द
१७३ शंसेत्। तृतीयेषु पादेष्वाद्यमक्षरमनुदात्तमुकृत्वाद्वितीयाक्षरमुदात्तं ब्रूयात्। अयमेवात्र निनर्दः पूर्वोक्तः। अ
स्योदाहरणं। इदञ्जनाउपश्रुत। नराशंसस्तविष्यते। ष। षष्टिं सहस्रा नवतिं च कौरम आरुशमेषुदद्महे। मि ३ मि
171 ति। चतुर्दश्यास्तु चः पूर्वार्द्धः सत्रिपदस्तत्रैके न द्वाभ्यां च विग्रहः। एवं चतुर्दश्यास्तु चोर्द्धर्चशः शंसेत्। यः सभे
यो विदथ्य इत्सारभ्य एता अश्वा आप्लवंत इत्यंत अर्द्धर्चशः शस्त्वा। एता अश्वा आप्लवंत इत्यादीनि सप्तप
दानि विग्राहं शंसेत्। अथवा एता अश्वा आप्लवंत इति आदीनि नव पदानि। अलाबुकं निखातकमिति सप्त
। यद्ीह नत्कथं हनत्पर्योकारं पुनः पुनरिति चैते द्विपदे। एवमष्टादश पदानि शंसेत्। उत्तमेन पदेन प्रणुय
वितनोविरणो द्वाविति षळृचस्य चोर्द्धर्चशः शस्त्वा। इहेत्थ प्रागपागुदगिति चतस्रः प्रणवेनावसायार्द्धर्चशः रा०म० १७१
शस्त्वा। भुगित्यभिगत इति त्रीणि पदानि यथापठितं शस्त्वा। वीमे देवा अक्रंसतेत्यर्द्धर्चशः शस्त्वा। आदित्या

हजरित्नरंगिरोभ्योदक्षिणामनयंनिस्यादीनिसप्तपदानियथापठितंविग्राहंशस्त्वा। उत्तमेनपदेनप्रणु
त्यातमिन्द्रंशर्मरिणेतितिस्रोर्द्धर्चशः शस्त्वा यदस्याअंहुभेद्याइत्यस्यैकस्तृचः सन्न्यूंखनिनर्दंसविग्राहंश-
स्त्वाकदन्नरोयद्द्याचीरजगंतेतितृचौसन्न्यूंखनिनर्दंसंविग्राहंशस्त्वा। दधिक्राव्णो अकारिषमितिस्वेना
न्तचंअर्द्धर्चशः शस्त्वा। सुतासोमधुमत्तमाइतितिस्रोर्द्धर्चशः शस्त्वा। अवद्रप्सो अंशुमतीमितिष्टद्विति
स्तस्तृचः पच्छः शस्त्वा। अच्छामइन्द्रंमितयैकाहिकंसूक्तरदर्धर्चपच्छः शंसेत्। उत्तमापरिधानीया॥ ॥अस्मि
न्कुंतापेइदंजनाउपश्रुतेतितिस्रोनाराशंस्यः। वच्यस्वरेभेतितिस्रोरेभ्यः। राज्ञोविश्वजनीनस्येतिचतस्रः पारि-
क्षित्यः। इन्द्रः कारुमबूबुधदितिचतस्रः कारव्याः। यः सभेयोविदथ्यइतिपञ्चदिशांक्लृप्तयः। योनाक्काश्चइतिष
ट्जनकल्पाः। यदिन्द्रोददाद्दाशराज्ञइतिपञ्चेन्द्रगाथाः। एता अश्वा आप्लवंतइत्यादिसप्तपदसंख्यादिसप्तपदसं-
ख्याकामंत्रकांडगोऽनश्चप्रलापः। अयमेवाग्नेरायुरितिचोच्यतेयत्तस्यायातयामतिचा। विततौकिरणौद्वावितिष

मं०टि०६ इत्प्रवल्हिकाः। इहेत्थ प्रागपागुदगिति चतस्र आजिज्ञासेन्याः। भुगित्यभिगत इति त्रीणि प्रतिराधः। वी
१७२ मे देवा अक्रंसतेत्येका अतिवादः। आदित्या ह जरितरंगिरोभ्य इति सप्तदश पदानि देवनीथः। त्वमिन्द्र शर्म
रिणेति तिस्रो भूतेछदः। यदस्या अंहुभेद्या इति द्वे आहनस्याः॥ ॥अथ शस्त्रस्य प्रतिगर उच्यते। विहि
172 सोतोरसृक्षतेत्यार्द्धर्चावसानेषु प्राकृतः प्रतिगरः। यत्रोइत्यत्र न्यूंखे ओं इति त्रिमात्रमोकारमुक्त्वा। न्यूंखेन्यू
खमुक्त्वा। ओं मदइ षाकपोइत्यत्र ओं मदे थमदैवोमित्युक्त्वा। निनर्द्द निनर्द मुकृत्वा ओं मर्यः पुष्टेषु मत्स्वखे
त्यवसाने ओं थामोदैवोमिति ब्रूयात्। सूक्तं तत्प्रणवे प्राकृतः। एवमेवास्मिन्सूक्ते सर्वत्र प्रतिगरः। इदं जना
उपश्रुतेत्यादि चतुर्द्दशर्चस्तु ओं थामोदैवोमिति प्रतिगरः। प्रतिगरे चाद्यमक्षरमुदात्तमुक्त्वा द्वितीयमनुदा
त्तं ब्रूयात्। अवसानेषु प्राकृतः। यः सभेयो विदथ्य इत्यारभ्य विततौ किरणौ इत्येतदंतं प्राकृतः। विततौ कि राम० १७२
रणौ विनिषद इत्यस्तु दुंदुभिमाहननाभ्यां जरितरो थामोदैव। कोशबिले जरितरो थामोदैव। रजनिग्रंथेर्द्धे

नां जरितरो थामो दैव। उपानहि पादं जरितरो थामो दैव। उन्नमां जनीमां जन्यां जरितरो थामो दैव। उत्तरां ज
नीं वर्त्मन्यां जरितरो थामो दैव। इति षट् प्रतिगराः अवसानेषु यथाक्रमेण भवंति॥ प्रणवेषु प्राकृतः। इहे
त्थ प्रागपागुदगिति च तस्त्वस्त्वस्तु। अलाबूनि जरितरो थामो दैवों ३ पृषातकानि जरितरो थामो दैवों ३ अ
श्वत्थपलाशं जरितरो थामो दैवों ३ पिपीलिकावटो जरितरो थामो दैवों ३ इति चत्वारः प्रतिगराः प्रणवेषु य
थाक्रमं भवति। अवसानेषु प्राकृतः। भुगित्यभिगतः इत्यादिषु त्रिषु पदेषु यथाक्रमं। भ्वा जरितरो थामो दै
वों ३ पर्णशदो जरितरो थामो दैवों। गोशफो जरितरो थामो दैवेति प्रतिगरः। वीमे देवा अक्रंसतेत्यस्यामृचि।
पत्नीयीयप्सते जरितरो थामो दैव। अवसाने प्रतिगरः। होता विष्टीमेन जरितरो थामो दैवेति प्रणवे प्रतिग
रः। आदित्या ह जरितरंगिरोभ्यो दक्षिणामनयं इत्यस्मिन्पदे प्राकृतः प्रतिगरः। तां ह जरितरित्यादिषु पंचद
शसु पदेषु ॐ ह जरितरो थामो दैव। तथा ह जरितरो थामो दैवेति प्रतिगरो। व्यत्यासं भवतः। प्रत्येवगृभायत्तो

मं·टि·६ मिस्यस्मिन्प्रणवः प्रतिगरः। त्वमिन्द्रशर्मरिणेति तिस्रः पुरस्स्तु प्राकृतः प्रतिगरः। यदस्या अंहुभेद्यासुदत्रासुर
१७३ स्तुन्मूंखेनिनर्द्दैच। ईडूडूडूडूडूडू। ईडूडूडूडूडू। ईउइडूडू। किमयमिदमाहो ३ ओ ओ ओ मो यामो दैवोमिति प्र
तिगरः। दधिक्राव्णो अकारिषमित्यारभ्यासमाप्तेः प्राकृतः। विहि सोतोरसृक्षतेत्यस्मिन्सूर्वः प्राकृतः प्रतिगरः
॥ ॥अथाच्छावाकस्य॥ ॥शोंसावो३म धाहीन्द्रगिर्वणइति तिस्रोऽर्द्धर्चशः। प्रवइन्द्रायबृहतेऽहं तमायेति तिस्रोऽर्द्धि
173 पदापङ्क्तिः। पुनरधाहीन्द्रगिर्वणइति पूर्ववदिति स्तोत्रियः। आहृयइयं तइन्द्रगिर्वणइति तिस्रोऽर्द्धर्चशः। विश्व
तोदावन्विश्वतो न आभरेति तिस्रोऽर्द्धिपदापङ्क्तिः। पुनरियं तइन्द्रगिर्वणइति पूर्ववदित्यनुरूपः। आहृयमवो
महेमतयो यंतुविष्णावइति नवर्चमेवयामरुत्संज्ञकं सन्मूंखसनिनर्दैसविस्याहं अर्द्धर्चशः शंसेता सूरतुजे रा·मं·
नित्रीतिसूक्तं त्रयोदशर्चं पच्छः। नूमर्त्तइति सूक्तं सप्तर्चं पच्छः। मवामित्रइति सूक्तं पंचर्चं पच्छः। संवांकर्मणेति १७३
सूक्तं अष्टर्चं पच्छः। अंत्या परिधानीया। अस्मिन्शास्त्रे प्रवो महे मतयइत्यस्मिन्सूक्ते प्रतिगरः सन्मूंखः सनि

नर्द्वृषाकपिवत्। इयान्निर्त्रोषः। ॐ मदेथमदेवोमित्यस्यस्थाने ॐ मदेम धोर्मदस्यमदिरस्यमेदेवोमितिप्रण
वांतः प्रतिगरः। अन्यत्रप्राकृतः प्रतिगरः॥ ॥ अथहोतुः षोडशीविहृता अविहृतावाछंदोगानुसारेण।
अथरात्रिपर्यायाः पूर्वमेवोक्ता अतिरात्रे। अहीनरात्रियोमिहिता सापिपूर्वमेवोक्ता। एवमाश्विनपर्यंतं अति
रात्रवत्॥ ॥ अथातिरिक्तोक्थ्यानिचत्वारिशस्त्राणि॥ ॥ तेषांपदाभ्यासवर्जंपर्यावछंसनविधिः। तत्रहो
तुराद्यंशस्त्रं। शोंसावोम् जरांबोधतद्विविड्ढिजरमाणः समिध्यस इतिस्तोत्रियानुरूपौ अर्द्धर्चशः शस्त्वा। अग्निनेन्द्रे
णावरुणेनेतिसूक्तं चतुर्विंशस्तचं अर्वाग्रथंनियच्छतमित्यंतंपच्छः शस्त्वा। नमोवाकेप्रस्थितइत्यर्द्धर्चशः शस्त्वा
स्वाहाकृतस्यतृंपतमितिपंक्तिंशंसेत्। आभास्यग्निरितिसूक्तं पच्छोर्द्धर्चेपच्छः। क्षेत्रस्यपतिनावयमितिपरिद
ध्यात्सक्तः। यथाहोतर्मनुष इतियाज्या मैत्रावरुणस्य॥ ॥ यद्द्यकच्चवृत्रहंतुदेवभिश्रुतामघमितिस्तोत्रि
यानुरूपौ। स्यमुवः सत्रासाहंसत्राते अनुकृत्स्य इतिवास्तोत्रियानुरूपौ। छंदोगवशान्निर्णयः। शोंसावोम् आ

मं.टि.६ आनोविश्वाभिरितिसूक्तंत्रयोविंशार्चं अर्द्धर्चशः। प्रातर्यावाणेतिसूक्तंपञ्चर्चंपच्छः। क्षेत्रस्यपतेमधुमंतमू

१७४ र्मिमितिपरिधानीयापच्छः। अस्मेवयंयद्वावानेतियाज्या॥ ॥अथब्राह्मणाच्छंसिनः। अभिहिंकारएहावोनहोगा

यसुतेसचास्तोत्रमिन्द्रायगायतेतिस्तोत्रियानुरूपावर्द्धर्चशः तमिन्द्रंवाजयामसिश्री महाँइंद्रोयओजसेसारि

सूत्रेपठितौस्तोत्रेपठितौस्तोत्रियानुरूपौवा। छंदोगवशुगांनिर्णयः। आनूनमश्विनायुवमितिसूक्तमेकविंशार्च

174 र्चंअर्द्धर्चशः। अस्मिन्सूक्ते। यद्वांकक्षीवाँउतयद्व्यश्वइत्येतांपच्छः। यातंछर्दिष्पाउतनइत्येतामर्द्धर्चशः। यदि

द्रेणसरथंयाथोअश्विनेत्येतांपच्छः। यद्द्याश्विनावहमित्याघर्द्धर्चशएव। तंवोरथमितिसूक्तंसप्तर्चंपच्छः। त्रोणां

सावोमधुमतीरोषधीर्द्यावआपइतिपच्छः परिदध्यात्। स्तीर्णंबर्हिषिसमिधानेअग्नौसूक्तेनेतियाज्या॥ ॥

अथाच्छावाकस्य॥ ॥अभिहिंकारा। हावोइदंविष्णुर्विचक्रमइतिस्तोत्रियः। तद्विष्णोःपरमंपदमितिद्वे। उत एम०

नोधियोगोअग्राइत्येकाइत्यनुरूपः। स्तोत्रियानुरूपावर्द्धर्चशः। ईळेद्यावापृथिवीइतिसूक्तंपञ्चविंशार्चं १७४

पष्ठः [illegible] । उभाउन्नूनमिस्येकादश्यार्चं पष्ठः । अग्नें ३ दैव्याहोतारा प्रथमा पुरोहिते ति
पष्ठः परिद्युमात् । परो मात्रया तन्वेति याज्या ॥ एतान्यतिरिक्तोक्थ्यानि ॥ आग्नेयैन्द्रवैश्वदेववैष्णवानीति चेत् ।
एवंविधानि शस्त्राणि स्युस्तदोक्ता एताः शस्त्रयाज्यास्सर्वा एव्याश्विनानीति चेत् । तदा युवं देवा क्रतुना पूर्व्ये
ण । युवां देवास्त्रय एकादशासः । पना य्यं तदश्विना कृतं वां । अयं वां भागो निहितो यजत्रेति च तस्मो यथाक्रमे
ण याज्याः । एताश्च वालखिल्यासु समाम्नाताः । यद्येताम्ऋचो नाधीयात् पुराणमोकः सख्यं शिवं वामिति च त
स्मो याज्या यथाक्रमं भवंति । एषाक्लृप्तिः सर्वस्तोमसर्वपृष्ठाप्तोर्यामस्य । यद्यप्तोर्यामः संस्थान्तको भवति ॥
छंदोगानुसारेण तदा आश्विनसहस्रांतोतिरात्रो ऽविकृतो भवति । ऊर्ध्वमाश्विनादतिरिक्तोक्थ्यानीत्येव विशे
षः । यत्तु पृष्ठादि सर्वमतिरात्रवत् । अप्तोर्यामे त्रयस्त्रिंशच्छस्त्राणि भवंति । उक्ताप्तोर्यामे ज्योतिष्टोमातत्क्र
त्वं तरमभिहितं ज्योतिष्टोमसंस्थास्वप्तोर्यामसंस्थाचास्ति सा छंदोगानुसारेणावर्णनीया । तस्य ज्योतिरप्तोर्या

मं.टि.६ मइति संज्ञा।तस्येयं क्लृप्तिः।ज्योतिरतिरात्रमविकारेण कृत्वा आश्विनःशस्त्रांते अतिरिक्तोक्थ्यानि पूर्वोक्तप्र
१७० कारेण कुर्यात्।शिष्टं सर्वमतिरात्रवत्।यत्तु पृष्ठ्यादिसंस्था प्तोर्यामःकल्पांतरेणाप्यस्तीति केचित्।होता यक्ष
175 दश्विना सोमानां तिरोअह्न्यानां त्रिर्वर्तिर्यातं त्रिरहमादयेथामुनोतुरीयं नासत्या वाजिनाय धेनुःसजूरग्नीरो
हिदश्वो घृतस्नुःसजूरुषा अरुणीभिःसजूःसूर्य एतशेन सजोषावश्विना दंसोभिः करत एवाश्विना जुषेतांम
देतां वीतां पिबतां सोमं होतर्यज।इहेह मद एवमघवन्निंद्रते भ्यो वसुमतो रुद्रवत आदित्यवत ऋभुमतो विभु
मतो वाजवतो बृहस्पतिवतो विश्वदेव्यावतो भ्यःसुत्यामिंद्रायेन्द्राग्निभ्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रु
द्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यःसोम्येभ्यःसोमपेभ्यो ब्रह्मन्वाचं यच्छ।आश्विन प्रैषातिप्रैषौ॥
॥समाप्तोप्तोर्यामः॥ ॥अथाग्निष्टोमसंस्था कृतुपशुस्थाने पश्वैकादशिनीयमध्वर्यवः कुर्वंति।तत्र होतृक ए.म.०
र्मणि विशेष उच्यते।तत्र चेदनेक यूपान् कुर्वंति प्रथमयूपे यूपांजनीया अनुब्रूयात्।सर्वेष्वनुवचनेषु तत्रास्य १७५

एवानभिहिंकृतस्य यान्वोनरोदेव यंतोनिमिम्युरिति षड्भिः पञ्चभिर्वा सर्वान्‌नयूपान्संस्तुयात्‌। आग्नेयोत्तमयो।र्नि

रभ्यासः। नाभ्यस्येदित्येके। अहर्गणेषु यूपैकादशिन्यामन्वाह। एकैकश्चैकादशिनीइत्यस्मिन्पक्षेयद्यूपबहु

त्वंतयास्थानेएकतंत्रत्वंमाभूत्‌संस्तवनमित्येतदर्थमेकतंत्रइत्युच्यते। सपश्चावदितिवचनमुपश्राय यस्य संस्त

वनिवृत्त्यर्थे। पूर्वेद्युरुच्छ्रीयमाणानामपितस्मिंनहनि। अपशुत्वात्संस्तवनमपरेद्युरेव भवति। केचित्तु। एकतंत्रे

इत्येककर्म षष्ठीतिवर्णयंति। तथासतिसर्वः सोमएकंकर्म भवति। तस्माद्द्वोपवसथेहन्युच्छ्रितानां श्वः सपशूनामौ

पवसथ्येवसंस्तवनंकर्त्तव्यंइतिमन्यंते। तत्र एकादश्या पशुदेवताः। अग्निः सरस्वती सोमः पूषाबृहस्पतिर्विश्वे

देवाइन्द्रोमरुतइन्द्राग्नीसवितावरुणः। आवाहनेवैकल्पिकावाज्यभागावावात्य। एकादश्या पशुदेवता आवा

हयति। अग्निमावह। सरस्वतीमावह। सोममावह। पूषणमावह। बृहस्पतिमावह। विश्वान्देवानावह। इन्द्रमावह।

मरुत आवह। इन्द्राग्नी आवह। सवितारं ः ३ आवहेत्युच्चैः। वरुणमावह। वनस्पतिमावह। इन्द्रंवसुमंतमावहेस।

मं.टि.६ १७६ 176 द्रिसमानं।घोरइन्त्रिवद्ध्रिगुः।अथवपायागेविज्ञेषः।अग्नेनयसुपथारायेअस्मानित्यनुवाक्या।होतायक्षद
ग्निंछागस्यवपायामेदसोजुषतामितिप्रैषः।प्रवःशुक्रायभानवइतियाज्या।इत्यग्नेः।अथसरस्वत्याः।एकाचे
तत्सरस्वतीनदीनामित्यनुवाक्या।होतायक्षत्सरस्वतींमेष्याववपायामेदसोजुषतामितिप्रैषः।प्रक्षोदसाधाय
सासस्रएषेतियाज्या।अथसोमस्य।त्वंसोमप्रचिकितोमनीषेत्यनुवाक्या।होतायक्षत्सोमंछागस्यवपाया
मेदसोजुषतामितिप्रैषः।यातेधामानिदिवियापृथिव्यामितियाज्या।अथपूष्णः।यास्तेपूषंनावोअंतःस
मुद्रइत्यनुवाक्या।होतायक्षत्पूषणंछागस्यवपायामेदसोजुषतामितिप्रैषः।शुक्रंतेअन्यद्यजतंतेअन्यदिति
याज्या।अथबृहस्पतेः।बृहस्पतेयापरमापरावदित्यनुवाक्या।होतायक्षद्बृहस्पतिंछागस्यवपायामेदसोजु
षतामितिप्रैषः।तमत्नियाउपवाचःसचंतइतियाज्या।अथविश्वेषांदेवानां।विश्वेअद्यमरुतोविश्वऊतीत्य रामं. १७६
नुवाक्या।होतायक्षद्विश्वांदेवान्छागस्यवपायामेदसोजुषंतामितिप्रैषः।विश्वेदेवाःशृणुतेमंहवंमइतिया।

ज्या। अथैन्द्रस्य। इन्द्रं नरो नेमधिता हवंत इत्यनुवाक्या। होता यक्षदिन्द्रं छागस्य वपाया मेदसो जुषतामिति प्रे
षः। उरुं नो लोकमनु नेषि विद्वानिति याज्या। अथ मरुतः। शुची वो हव्या मरुतः शुचीनामित्यनुवाक्या। होता यक्ष
न्मरुतां छागस्य वपाया मेदसो जुषंतामिति प्रेषः। प्र चित्रमर्कं गृणते तुरायेति याज्या। अथ ऐन्द्राग्नस्य। आ वृत्र
हणा वृत्रहभिः शुष्मैरित्यनुवाक्या। होता यक्षदिन्द्राग्नी छागस्य वपाया मेदसो जुषेतामिति प्रेषः। शुचिं नु स्तोमं न
वजातमद्येति याज्या। अथ सवितुर्याज्यानुवाक्ये उपांशु। आ देवो यातु सविता सुरत्न इत्यनुवाक्या। होता यक्षत्स
वितारं उपांशु छागस्य वपाया मेदसो जुषतामित्युपांशुः। हविर्हैतर्यंजा। उदीरय कवितमं कवीनामिति याज्या।
अथ वरुणस्य। अव सिंधुं वरुणो द्यौरिव स्थादित्यनुवाक्या। होता यक्षद्वरुणं मेषस्य वपाया मेदसो जुषतामिति प्रे
षः। तत्त्वा यामि ब्रह्मणा वंदमान इति याज्या॥ ॥अथ माध्यंदिने सवने पुरोळाशानां करणपक्षे अनुवाक्याः प्रे
ष याज्या उच्यंते॥ अथ अग्नेः। अग्ने त्वं पारया नव्यो अस्मानित्यनुवाक्या। होता यक्षदग्निं पुरोळाशस्य जुषतामि

मं.टि.६ नितिप्रैषः। यथा विप्रस्य मनुष इति याज्या। अथ सरस्वत्याः। उत स्या नः सरस्वती जुषाणेत्यनुवाक्या। होता यक्षत्स
१७७ रस्वतीं पुरोळाशस्य जुषतामिति प्रैषः। पावीरवी कन्या चित्रायुरिति याज्या। अथ सोमस्य। त्वं सोम क्रतुभिः सुक्र
तुर्भूरित्यनुवाक्या। होता यक्षत्सोमं पुरोळाशस्य जुषतामिति प्रैषः। अषाळ्हं युत्सु पृतनासु पप्रिमिति याज्या
। अथ पूष्णः। पूषा सुबन्धुर्दिव आ पृथिव्या इत्यनुवाक्या। होता यक्षत्पूषणं पुरोळाशस्य जुषतामिति प्रैषः। प्र
177 पथे पथामजनिष्ट पूषेति याज्या। अथ बृहस्पतेः। बृहस्पतिः प्रथमं जायमान इत्यनुवाक्या। होता यक्षद्बृ
हस्पतिं पुरोळाशस्य जुषतामिति प्रैषः। सं यं स्तुभो वनयो न यन्तीति याज्या। अथ विश्वेषां देवानां। आ नो दे
वानामुप वेतु शंस इत्यनुवाक्या। होता यक्षद्विश्वान्देवान्पुरोळाशस्य जुषन्तामिति प्रैषः। ये के च ज्मा महि रा.म.०
नो अहिमाया इति याज्या। अथैन्द्रस्य। य इन्द्र सोम पवंनित्यनुवाक्या। होता यक्षदिन्द्रं पुरोळाशस्य जु १७७
षतामिति प्रैषः। प्रससाहिषे पुरुहूत शत्रूनिति याज्या। अथ मरुतां। नूष्ठिरं मरुतो वीरवन्त इत्यनुवाक्या।

होता यक्षन्मरुतां पुरोळाशस्य जुषंतामिति प्रैषः। अराइवेदचरमा अहेवेति याज्या। अथैन्द्राग्नस्य। आ
भरतं शिक्षतं वज्रबाहू इत्यनुवाक्या। होता यक्षदिन्द्राग्नी पुरोळाशस्य जुषेतां हविर्होतर्यजेति प्रैषः।
गीर्भिर्विप्रः प्रमतिमिच्छमान इति याज्या। अथ सवितुरुपांशु। स घा नो देवः सविता सहावेत्यनुवाक्या। होता
यक्षत् सवितारं इत्युपांशु। पुरोळाशस्य जुषतां इति उपांशु। हविर्होतर्यजेत्युच्चैः। भगं धियं वाजयंतः
पुरंधिमिति याज्या। अथ वरुणस्य॥ अयं सु तुभ्यं वरुण स्वधाव इति अनुवाक्या। होता यक्षद्वरुणं पुरोळाश
स्य जुषतामिति प्रैषः। तदिन्नक्तं तद्दिवा न त्यमाहुरिति याज्या। अथ यदि सवनीयानां पशूनां स्विष्टकृत्सहकृ
दैव क्रियते तदा सवनीया एव अनुवाक्या प्रैषयाज्या। पृथक्चेत् तदा पशुका एव॥ ॥अथ तृतीयसव
ने हविर्योगः। तत्र प्रति पशुं मनोताहूतिः। स कृद्देवेष्वेके॥ पाहि नो अग्ने पायुभिरजस्रैरित्यनुवाक्या। होता
यक्षदग्निं छागस्य हविष आवद्द्यम मध्यतो मेद उ॰ घसं नूनं॰ करद्देवाग्निर्जुषतामिति प्रैषः। प्रकारवो मन

मं०टि०६ नापच्यमानेतियाज्या। इत्यग्नेः। अथसरस्वत्याः। सरस्वत्यभिनोनेषिवस्यइत्यनुवाक्या। होतायक्षत्सरस्वतीं
१७८ मेष्याहविषआवदद्य० घसंनूनं० करद्देवंसरस्वतीजुषतामितिप्रेषः। यस्तेस्तनः शशयोयोमयोभूरितिया
178 ज्या। अथसोमस्य। त्वन्नःसोमविश्वतोवयोधाइत्यनुवाक्या। होतायक्षत्सोमंछागस्यहविषआवदद्य० घ
संनूनं० करद्देवंसोमोजुषतामितिप्रेषः। यामेधामानिहविषायजन्तीतियाज्या। अथपूष्णः। पूषेमाआशा
अनुवेदसर्वाइत्यनुवाक्या। होतायक्षत्पूषणंछागस्यहविषआवदद्य० घसंनूनं० करद्देवंपूषाजुषतामि
तिप्रेषः। पथस्पथःपरिपतिंवचस्येतियाज्या। अथबृहस्पतेः। बृहस्पतेअतियदर्योअर्हादित्यनुवाक्या। हो
तायक्षद्बृहस्पतिंछागस्यहविषआवदद्य० घसंनूनं० करद्देवंबृहस्पतिर्जुषतामितिप्रेषः॥ एवापित्रेविश्व
देवायवृष्णइतियाज्या। अथविश्वेषांदेवानां। आनोविश्वआस्क्रागमंतुदेवाइतिअनुवाक्या। होतायक्षद्वि रामं०
श्वांदेवांछागस्यहविषआवदद्य० घसन्नूनंघासे० करन्नेवविश्वेदेवाजुषतामितिप्रेषः। अग्नेयाहिदूत्यंमा १७८

रिष एष इति याज्या। अथैन्द्रस्य। इन्द्रो राजा जगतश्चर्षणीनामिति अनुवाक्या। होता यक्षदिन्द्रं छागस्य हविष
आत्तद्य॰ घसं नूनं॰ करद्देवेन्द्रो जुषतामिति प्रैषः। स्वस्तये वाजिभिश्च प्रणेतरिति याज्या। अथ मरुतां। आवो
होता जोहवीति सत्तरित्यनुवाक्या। होता यक्षन्मरुतः छागस्य हविष आत्तन्नद्य॰ घसन्नूनं॰ करन्नेवं मरुतो जु
षन्तामिति प्रैषः। या वः शर्म शशमानाय संतीति याज्या। अथैन्द्राग्नस्य। उभा वामिन्द्राग्नी आहुवध्या इत्यनुवा
क्या। होता यक्षदिन्द्राग्नी छागस्य हविष आत्तामद्य॰ घस्तां नूनं॰ करद्देवेन्द्राग्नी जुषेतामिति प्रैषः। प्रचर्षणि
भ्यः पृतनाहवेष्विति याज्या। अथ सवितुरुपांशु। इमा गिरः सवितारं सुजिह्वमित्यनुवाक्या। होता यक्षत्सवि
तारमित्युपांशु। छागस्य हविषः आत्तद्येत्युपांशु॰ मध्यतः॰ मेदः। घसदित्युपांशु॰ नूनं घासे॰ अजन्नानां क
रदित्युपांशु॰ सविता॰ जुषतामित्युपांशुः हविर्होतर्यज। अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्या इति याज्या। अथ वरु
णस्य। एवा वंदस्व वरुणं बृहंतमित्यनुवाक्या। होता यक्षद्वरुणं मेषस्य हविष आत्तद्य घः घसं नूनं॰ करद्देवं वरु

मं०टि०६ णोजुषतामिति प्रैषः। अस्त्वेवाद्यामसुरो विश्ववेदा इति याज्या। अथवनस्पतियागः। होता यक्षद्वनस्पतिम
१७९ भिहि पिष्टतमया रभिष्ठया रशनयाधित यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेष्या हविषः प्रिया धामानि यत्राग्नेः
छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेष्या हविषः॰ यत्र सोमस्य छागस्य हविषः॰ यत्र पूष्णः छाग
स्य हविषः॰ यत्र बृहस्पतेश्छागस्य हविषः॰ यत्र विश्वेषां देवानां छागस्य हविषः॰ यत्रेन्द्रस्य छागस्य॰ यत्र
मरुतां छागस्य हविषः॰ यत्रेन्द्राग्न्योः छागस्य हविषः॰ यत्र सवितुरिन्द्रपांशु॰ छागस्य॰ यत्र वरुणस्य मेषस्य
हविषः प्रिया धामानीति सर्वत्रानुषजति। यत्र वनस्पतेः प्रिया पाथांसी त्यादि। तत्रैताम्नस्तुसेवो य॰ इन्मीय
सइवकृतीकरदिति विशेषः। एवं स्विष्टकृत्सैषे प्रिया धामान्ययाळिति विशेषः। अथ सूक्तवाक प्रैषः। अ
ग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान् गृह्णन्नग्नये आज्यं गृह्णन्त्सोमाय सुत्यां बध्नन्नग्नये छागं बध्नन्स एम० १७९
रस्वत्यै मेषीं बध्नन्त्सोमाय पूष्णे बृहस्पतये विश्वेभ्यो देवेभ्य इन्द्राय मरुद्भ्य इन्द्राग्निभ्यां सवित्र इन्द्रोपांशुः छा

गान्व भ्रन्वरुणाय मेषंसुन्वन्निंद्रायसोमंम्रज्ञन्नित्यादि पूर्वस्मिन्निगमे। अथोत्तरे निगमे। हूपस्या अध्वरे
वोवनस्पतिरभवद्दग्नय आज्येन सोमायाज्येनाग्नये छागेन सरस्वत्यै मेष्या सोमाय पूष्णो बृहस्पतये विश्वेभ्यो
देवेभ्य इंद्राय मरुद्भ्य इंद्राग्निभ्यां सवित्रे इत्सपांशु० छागैर्वरुणाय मेषेणेन्द्राय सोमेन हरिभ्यां धानाभिः इ
त्यादि षोडशिवत्। सूक्तवाके होता। अग्निरिदं हविः०। सोम इदं हविः।०। अग्निरिदं हविः। सोम इदं हविः। पूषे
दं०। बृहस्पतिरिदं हविः०। विश्वेदेवा इदं हविरजुषंतावीवृधंत महोज्यायोकृतः इन्द्र इदं हविः०। मरुत इदं ह
विरजुषंतावीवृधंत महोज्यायोकृत। इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महोज्यायोक्रातां। सविता उ० इ
दं हविः०। वरुण इदं हविः०। वनस्पतिरिदं हविः०। अन्यत्सर्वं सवनीयेन पशुना समानं॥ ॥अथाग्निष्टोमोऽत्य
ग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रो प्तोर्याम इति संस्थाः। तासां संस्था नामधेया संस्थां कुर्वंति। तस्या अं
ते यज्ञपुच्छं नाम कर्तव्यं॥ ॥तस्य प्रयोग उच्यते॥ वाल्वसमाप्त्यनंतरं मृगतीर्थसर्पणं कृत्वा अनूयाजादि

मं॰रि॰६ ग्रं सुवाकांतं पशुवत् कुर्यात्। प्रैषसमाम्नाये यो द्वितीयस्सूक्तवाकप्रैषस्तमत्र ब्रूयात्। तत्र यथा दैवतं निगम
१८० नं कर्तव्यं। अतिरात्राप्तोर्यामे सर्वत्राग्निष्टोमे उक्थ्यादौ च। अवीवृधत पुरोळाशैरित्येव ब्रूयात्। पुरोळाशोस
त्वसति च। अवीवृधतेत्यस्यासमर्थ निगमत्वान्नोहः। सूक्तवाके यथावाहितं दैवतं निगमयेत्। इन्द्रो वसुमा
180 नित्याद्याः सवनदेवता निगमयेत्। आगूर्न भवति। सुन्वच्छब्दोनुवर्तत एव नामादेशश्च कर्तव्यः। अथ ग्रं सुवा
कानंतरं वाजिनयागः। तस्य वैश्वदेव्यामुक्तो विधिः। अथ हारियोजनयागः। उन्नेतरं अपाः सोममस्तमिन्द्र प्र
याहीत्यनुवाक्या। धाना सोमानामिन्द्राद्धि चपिब चेति प्रैषः। सुनज्मि ते ब्रह्मणा केशिना हरी इति याज्या। उ
क्तो नुवषट्कारः। अथात्र तं द्रोणकलशं इळामिव प्रतिगृह्य। उन्नेतरुपहवमिष्ट्वा द्रोणकलशस्थं सोमं
तूष्णीं भवेक्ष्य। हरिवतस्ते हारियोजनस्येत्यादिना भक्षयामीत्येतदंतेन मंत्रेण प्राणभक्षान्भक्षयित्वा द्रो राम॰
णकलशमुन्नेत्रे प्रदाय। अपाम सोमं। शंनो भवेति मुख हृदये अभिमृशेत्। अथ होता उद्गायुषेत्येतेनोपो १८०

स्यायापरेणसर्वौधिष्ण्यान्गत्वापूर्वयाद्वारानिष्क्रामति। एवमेवहोत्रकाश्चाच्छावाकवर्जं। अच्छावाकस्त्वपरया
द्वारानिष्क्रामति। ततःसर्वे आग्नीध्रीयंप्राप्यविनिःसृताहुतीर्जुह्वति। होतृप्रथमाग्नावस्कन्दंताः। प्रत्यगुर
गाहवनीयादवस्थायैस्यैवमादिनाधर्मेणस्थित्वा। अयंपीतइन्दुरिन्द्रंमदेधाइतिद्वाभ्यांमंत्राभ्यां। तत्राद्यस्य
सोमोदेवताद्वितीयस्याग्निः। अथतस्मांनिष्क्रम्याहवनीयेष्वद्वपद्वाकलान्यभ्यादधाति। प्रत्यगुदगाहव
नीयादवस्थाय। देवकृतस्यैनसोवयजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। मनुष्यकृतस्यैन
सोवयजनमसिस्वाहा। आत्मकृतस्यैनसोवयजनमसिस्वाहा। एनसएनसोवयजनमसिस्वाहा। यद्वोदे
वाश्चकृमजिह्वयागुर्विंतिचेसनयर्चावा। अथद्रोणकलशाद्धानाग्रहीत्वा। आपूर्यास्थामापूरयतेस्यादिना
पश्चंश्वेत्सनेनमंत्रेणावेक्ष्य। तूष्णीमवघ्रायांतःपरिधिदेशेनिवपेयुः। अथवाएतस्मिन्नेवमंत्रेपूर्वभागो
वेक्षणार्थः। उत्तरोवघ्राणार्थः। विनिःसृताहुतिप्रभृतिएतदंतं अस्मदीयैःसर्वैःकर्त्तव्यं। अथतेषांमध्येये

मं॰टि॰६ चमसिनः ते सव्याहृतो भूत्वा तीर्थदेशे जलपूर्णाश्चमसा अध्वर्युभिः स्थापिताः तान्प्रव्रजेयुः। प्रजित्वा स्व
१८१ स्वचमसस्य पश्चादुपविश्य दूर्वा निष्पीड्य दूर्वारसं स्वे चमसे प्रक्षिप्य ता अपो गृहीत्वा नासिरभिः स्वं स्वं आत्मा
नं दक्षिणैः पाणिभिरप्रदक्षिणं त्रिस्त्रिः पर्युक्षंते प्रदक्षिणं वा सव्यैः पाणिभिः। स्वधा पित्रे स्वधा पितामहा
य स्वधा प्रपितामहायेति त्रिभिर्मंत्रैः। यस्य पित्रादीनामन्यतमो जीवति तस्य तत्पर्युक्षणं नास्ति। पिण्ड
181 दानवत्। जुहुयाज्जीवेभ्य इत्युपायांतराभावात्। पर्युक्षणवर्जमन्यत्समानं कुर्यात्। अथ पाणी चमसे प्र
वधायोद्यम्य। अप्सु धूतस्य सोमस्य दिनामक्षयामीत्यंतेन मंत्रेण प्राणभक्षान्भक्षयित्वा माहं प्रजां परासिच
मित्येतेनात्माभिमुखं चमसान्भूमौ निषिच्य निषिक्तमुदकं० अच्छायंवो मरुतः श्लोक एत्विस्येतयाभि
मृश्रेयुः। ततः स यजमानाः सर्वे तीर्थदेशाग्नीध्रीयं गत्वा दधिक्राव्णो अकारिषमित्येतयर्चा दधिद्रप्सा राम॰
न्प्राश्याचम्य। उभा कवी युवेति मंत्रेण सख्यविसर्जनं कुर्यात्। प्रशास्तादिभिरन्वारब्धः सर्वप्रायश्चित्तानि १८१

जुहोति। नसंस्थाजपः। अनूबंध्यायाअकरणपक्षेपशुकर्तॄणांप्रत्यूलोहूासनंकर्मभवति। तत्रपशुतंत्रेव्या
ख्यातं। तत्रापिनसंस्थाजपः॥ ॥अथावभृथंव्रजंति॥ व्रजंतःसर्वेऋत्विजःसाम्नोनिधनंब्रूयुः। निधनमि
तिसाम्नःपञ्चमीविभक्तिरुच्यते। अथावभृथेप्याप्तिष्ठंतस्त्वरंति। साचेष्टिःप्रयाजाद्यनुयाजांता। स्यानावम
नेकृत्वातीर्थेनप्रविश्यपशु॑याद्यापनसुकृत्वाबर्हिर्वर्जांश्चतुरःप्रयाजान्यजति। उत्तमेप्रयाजेस्वाहाग्निंस्वाहा
सोमंस्वाहावरुणंस्वाहाग्नीवरुणौस्वाहादेवाइसारि। अप्स्वग्नेसधिष्टवासुमेसोमोअब्रवीदित्यस्तुमंतौ।
गायत्र्यावाज्यभागयोःपुरोनुवाक्ये। निसेयाज्ये। वरुणःप्रधानदेवता। अवतेहेळउदुत्तममितियाज्यानुवा
क्ये। अग्नीवरुणौस्विष्टकृद्देवता। त्वंनोअग्नेवरुणस्येतिपुरोनुवाक्या। येयजामहेग्निवरुणौसत्वंनोअग्ने
वमोभवोतीतियाज्या। निगदवर्जं। आवाहनाभावात्तत्कापिचनभवति। एतदन्ताचेष्टिः। अध्वर्युर्वज्ञात्तअ
नूयाजसद्ध्रावेवबर्हिर्वर्जंद्वावनूयाजौयजति। संस्थितायांसर्वेस्पृहीयाः। नमोवरुणायाभिष्ठितोवरुणस्यपा

मं॰टि॰६ ष्टाः। इति मंत्रेण पाशानुद्‌कांतेवर्‌ध्नुः। ततः भक्षस्यावभृथोसीति मंत्रेण। अपः पीत्वा प्रोष्यनिष्ठीवंति।
१८२ प्रोथनं नामांतराख्य विशेषणो धनार्थः क्रियाविशेषः। शैणे चार्थमाचमनं च कृत्वा। भक्षितस्यावभृथोसीति। पुन
रपः पीत्वा प्रतिगिरंति। शैणे चार्थमाचमनं कृत्वा भक्षं कृतस्यावभृथोसीति। पुनउपः पीत्वा प्रोष्य प्रतिगिरं
ति। शैणे चार्थमाचमनं कृत्वा ऽश्नुत्वा। आपो अस्मान्मातर इत्येका। इदमापः प्रवहतेत्येका। सुमित्र्यान आप ओ
182 षधय इत्येतैर्मंत्रैरभ्युक्षेरन्। अथैतान्त्वातान् उदकादुन्नेतोन्नयति। उन्नेतरुन्नोन्नयोन्नेतर्वस्त्रो अभ्यु
न्नयान इति। उन्नीयमानाजपंति। उत्तीर्य उद्वयंतमसस्परी आदित्यमुपतिष्ठंते। अथाग्नेः समिदसीति
समिदाहरणादि समिदाधानादि पशुवत्कुर्युः। ततो मैत्रावरुणाग्नीध्रवर्जाः सर्वे संस्थाजपं कुर्युः। अनूबं
ध्याया अकरणपक्षे मैत्रावरुणोपि संस्थाजपं करोति॥ ॥अथोदयनीयेष्टिः॥ शालामुखीये प्रायणीय राम॰
योक्ता। विशेषस्तूच्यते। अग्निः सोमः सविता पथ्यास्वस्तिरदितिर्दैवताक्रमः। यास्तत्रानुवाक्यास्ता इहया १८२

ज्याः। यास्तत्र याज्यास्ता इहानुवाक्याः। स्विष्टकृति न विपर्यासः। इळा सूक्तवाकश्च प्रकृत्या। मार्जनं कर्त्त
व्यं। अस्यामिष्टौ तंत्रस्वरो भवति। न प्रायणीयास्वरः। ये प्रायणीयां कृतवंतस्त एव ऋत्विजः कुर्युः। सर्वमस्य
प्रायणीयवत्॥ ॥संस्थितायामुदयनीयायां मैत्रावरुण्यनूबंध्या नामस्त्री पशुर्गोजातिः। तस्याग्नीषो
मीयवत्कल्पः। वपायाः। आ वां मित्रावरुणा हव्यजुष्टिमित्यनुवाक्या। होता यक्षन्मित्रावरुणावुस्राया व
पाया मेदसो जुषेतामिति प्रैषः। युवं वस्त्राणि पीवसा वसाथे इति याज्या। अथ पुरोळाशस्य। आ यातं
मित्रावरुणा सुशस्तीति पुरोनुवाक्या। होता यक्षन्मित्रावरुणौ पुरोळाशस्य जुषेतामिति प्रैषः। प्र बाह
वा सिसृतं जीवसे न इति याज्या। अथ हविषः। आ नो मित्रावरुणा हव्यजुष्टिमित्यनुवाक्या। होता यक्ष
न्मित्रावरुणावुस्राह विष आत्तामद्य० घस्तां नूनं० करत एवं मित्रावरुणौ जुषेतामिति प्रैषः। यद्बंहिष्ठं
नातिविधे सुदानू इति याज्या। सर्वत्र निगमेष्वग्नीषोमयोः स्थाने मित्रावरुणौ निगमयेत्। छागस्थाने उ

मं॰टि॰६ स्या। पश्चात् होत्रासनादि संस्याजपान्तं निरूढपशुवत्। कृत्स्नोप्ययं पशुरुत्तरवेदिसमीप एव कर्त्तव्य इत्ये
१८३ के मन्यन्ते। यदि पूर्वं सवनीयपशुस्थाने पश्वेकादशिनी कृता भवति। तथा सत्सु तस्यां बंध्याया वपायागानन्त
रं होतृमैत्रावरुणौ आग्नीध्रीयायतनं सदश्चोत्तरेणागत्वा पूर्वया द्वारा पत्नीशालां प्रविश्य शालामुखी
ये त्वाष्ट्रेण पशुनाचरन्ति। तस्य यूपाञ्जनादि पर्यग्निकरणान्तमग्नीषोमीयवत्। विशेषस्तूच्यते। आवाह
183 ने त्वष्टारमग्न आवह। देवां आज्यपां आवहेत्यादि। एतावद्देवतावाहनं। पर्यग्निकरणान्ते एतं पशुमुत्सृ
जन्ति। एतावानेव पशुयागो नातत ऊर्ध्वं कर्त्तव्यः। यदि त्वध्वर्यव आज्येन समापयेयुस्तदा स्वरीयैरपि तथा
कर्त्तव्यं। तस्मिन्पक्षे अग्निमग्न आवह। सोममावह। वनस्पतिमावह। त्वष्टारमावह। देवां आज्यपां इत्यादि रामं॰
प्रकृतिवत्। यद्यध्वर्यूणां प्रैषेषु देवतादेशाद्द्रव्यादेशाश्च क्रियन्ते। तद्देवा स्वरीयैरपि कर्त्तव्याः। निपातं १८३
स्तु पशुवदेव ब्रूयात्। निपातानाममन्त्रमध्यपठिताः। परेणैव समवेताभिधायित्वाद्वा। मेद उद्धृतं पार्श्वतः श्रो

णितन्नस्येवंप्रकाराः। सर्वमन्यत्संस्थाजपांतं निरूढवत्। यद्यनुबंध्यायाः पशुपुरोळाशानंतरं दे वि

काहवींष्यन्वायात्तयेयुः। तत्रायं देवताक्रमः। धाता॥ अनुमतिः। राका। सिनीवाली। कुहूरिति। धाताददातु

दाशुषे धाता प्रजानामुतराय ईशइति धातुर्याज्यानुवाक्ये कल्पजे। अनुनो द्यानुमतिरन्विदनुमतेत्व

मितिकल्पजेः अनुमत्याः। राकादीनां पत्नीसंयाजोक्ताः। आसां याज्यानुवाक्याउपांशु प्रयोज्याः। याज्या

सुदेवतादेशोनकर्तव्यः। अन्वायात्यत्वात्। अथदेवीनां चेद्धवींष्यन्वायातयेयुः। तत्र। सूर्यः। द्यौः। उषा।

गौः। पृथिवीइतिदेवताः। तरणिर्विश्वदर्शतश्चित्रंदेवानामितिसूर्यस्य। स्मतुरंधिर्नआगहीतिद्यौ दि

वः। आघांतनोगिरत्रिभिरावहंतीपोषावार्याणीत्युषसः। नतावर्वारेणुककाटोअश्नुतेनतानग्नोति

नदभातितस्करइतिगोः। बळित्थापर्वतानांदृळ्हाचिद्यावनस्पतीनितिपृथिव्याः। अत्रापन्वायात्यत्वा

त्उपांशुत्वंनदेवतादेशः। पश्वलाभेअनूबंध्यास्थानेमैत्रावरुणीपयस्याकर्तव्या। साआज्यभागप्रभृ

मं·टि·६ तिवाजिनां ता भवति। स्थानाचमने कृत्वा तीर्थेन प्रविश्य उत्तरवेदिसमीपे निरसनोपवेशने कृत्वा स्तु
१८४ गाह्वापनमाह। वार्त्रघ्नावाज्यभागौ प्रधानस्य। आ नो मित्रावरुणा यद्बंहिष्ठं नातिविधे सुदानू इति
याज्यानुवाक्ये। प्रकृत्या संयाज्ये। अनिगदे अनावाहन इति वचनात्। वाजिनयागो व्याख्यातः। कर्मि
णो वाजिनं भक्षयेयुः॥ ॥एषाश्वलायनमतिः॥ अथाध्वर्युमतस्यानुसारेण प्रधानयागप्रभृ
184 तीडान्ता भवति। अथ दैविकाहवींष्यनुनिर्वपेयुः। दैवीनां च हवींष्युक्तास्तेषां याज्यानुवाक्याः। सं
स्थितायां सर्वप्रायश्चित्तानि हुत्वा संस्थाजपेनोपतिष्ठन्ते। आग्नीध्रोऽपि संस्थाजपं करोति। अथ उदव
सानीयेष्टिः॥ तत्र पञ्चदश सामिधेन्यः। वार्त्रघ्नावाज्यभागौ। प्रधानस्याग्निर्देवता। अथा ह्यग्ने क्र
तोर्भद्रस्य इति अनुवाक्या। आतिष्ठे अद्य गीर्भिर्गृणन्त इति याज्या। अथ स्विष्टकृतः। एभिर्नो अर्कैरि राम० १८४
त्यनुवाक्या। ये३ऽग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाडग्नेः

मं॰टि॰६ प्रिया धामान्ययाडु देवानामाज्यपानामित्यादि॰ कृणोतु सो अध्वराज्जातवेदाजुषतांहविरग्नेत्तम
१८५ घाश्वंनस्तोमै॰ ओहे३ वौं३षट्। अन्यत्सर्वपौर्णमासवत्। पौनराधेयिकीअविकृताइतिवचनात्।
पूर्णाहुतिपक्षेहोतुर्नप्रयोगः॥ ॥इत्युदवसानीयासमाप्ता॥ ॥इतिमंचनाचार्यविरचितायां
आश्वलायनसूत्रप्रयोगदीपिकायांषष्ठोध्यायः॥ ॥ ॥संवत् १८ ६६

185

एम॰
१८५

१२००